# Mīmāmsā || pūrva mīmāmsā

## Jaimini's pūrva mīmāmsā sūtras

### Chapter 01

#### Sub Chapter 01

अथातो धर्मजिज्ञासा ॥ सूत्र - १.१.१ ॥
चोदनालक्षणोऽर्थो धर्मः ॥ सूत्र - १.१.२ ॥
तस्य निमित्तपरीष्टिः ॥ सूत्र - १.१.३ ॥
सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम् अनिमित्तं विद्यमानोपलम्भनत्वात् ॥ सूत्र - १.१.४ ॥
औत्पत्तिकस् तु शब्दस्यार्थेन संबन्धस् तस्य ज्ञानम् उपदेशो ऽव्यतिरेकश् चार्थे ऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ॥ सूत्र - १.१.५ ॥
कर्मैके तत्र दर्शनात् ॥ सूत्र - १.१.६ ॥
अस्थानात् ॥ सूत्र - १.१.७ ॥
करोति शब्दात् ॥ सूत्र - १.१.८ ॥
सत्वान्तरे च यौगपद्यात् ॥ सूत्र - १.१.९ ॥
प्रकृति विकृत्योश् च ॥ सूत्र - १.१.१० ॥
वृद्धिश् च कर्तृभूम्नास्य ॥ सूत्र - १.१.११ ॥
समं तु तत्र दर्शनम् ॥ सूत्र - १.१.१२ ॥
सतः परमदर्शनं विषयानागमात् ॥ सूत्र - १.१.१३ ॥
प्रयोगस्य परम् ॥ सूत्र - १.१.१४ ॥
आदित्यवद्यौगपद्यम् ॥ सूत्र - १.१.१५ ॥
वर्णान्तरम् अविकारः ॥ सूत्र - १.१.१६ ॥
नादवृद्धिपरा ॥ सूत्र - १.१.१७ ॥
नित्यस् तु स्याद् दर्शनस्य परार्थत्वात् ॥ सूत्र - १.१.१८ ॥
सर्वत्र यौगपद्यात् ॥ सूत्र - १.१.१९ ॥
संख्याभावात् ॥ सूत्र - १.१.२० ॥
अनपेक्षत्वात् ॥ सूत्र - १.१.२१ ॥
प्रख्याभावाच् च योगस्य ॥ सूत्र - १.१.२२ ॥
लिङ्गदर्शनाच् च ॥ सूत्र - १.१.२३ ॥
उत्पत्तौ वावचनाः स्युर् अर्थस्यातन्निमित्तत्वात् ॥ सूत्र - १.१.२४ ॥
तद्भूतानां क्रियार्थेन सामाम्नायो ऽर्थस्य तन्निमित्तत्वात् ॥ सूत्र - १.१.२५ ॥
लोके सन्नियमात् प्रयोगसन्निकर्षः स्यात् ॥ सूत्र - १.१.२६ ॥
वेदांश् चैके सन्निकर्षं पुरुषाख्याः ॥ सूत्र - १.१.२७ ॥
अनित्यदर्शनाच् च ॥ सूत्र - १.१.२८ ॥
उक्तं तु शब्दपूर्वत्वम् ॥ सूत्र - १.१.२९ ॥
आख्या प्रवचनात् ॥ सूत्र - १.१.३० ॥
परन्तु श्रुतिसामान्यमात्रम् ॥ सूत्र - १.१.३१ ॥
कृते वा विनियोगः स्यात् कर्मणः संबन्धात् ॥ सूत्र - १.१.३२ ॥

#### Sub Chapter 02

आम्नायस्य क्रियार्थत्वाद् आनर्थक्यम् अतदर्थानां तस्माद् अनित्यम् उच्यते ॥ सूत्र - १.२.१ ॥
शास्त्रदृष्टविरोधाच् च ॥ सूत्र - १.२.२ ॥
तथाफलाभावात् ॥ सूत्र - १.२.३ ॥
अन्यानर्थक्यात् ॥ सूत्र - १.२.४ ॥
अभागिप्रतिषेधाच् च ॥ सूत्र - १.२.५ ॥
अनित्यसंयोगात् ॥ सूत्र - १.२.६ ॥
विधिना त्व् एकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः ॥ सूत्र - १.२.७ ॥
तुल्यं च साम्प्रदायिकम् ॥ सूत्र - १.२.८ ॥
आप्ता चानुपपत्तिः प्रयोगे हि विरोधः स्याच् छब्दार्थस् त्व् अप्रयोगभूतस् तस्माद् उपपद्येत ॥ सूत्र - १.२.९ ॥
गुणवादस् तु ॥ सूत्र - १.२.१० ॥
रूपात् प्रायात् ॥ सूत्र - १.२.११ ॥
दूरभूयस्त्वात् ॥ सूत्र - १.२.१२ ॥
अपराधात् कर्तुश् च पुत्रदर्शनम् ॥ सूत्र - १.२.१३ ॥
आकालिकेप्सा ॥ सूत्र - १.२.१४ ॥
विद्याप्रशंसा ॥ सूत्र - १.२.१५ ॥
सर्वत्वम् आधिकारिकम् ॥ सूत्र - १.२.१६ ॥
फलस्य कर्मनिष्पत्तेस् तेषां लोकवत्परिमाणतः फलविशेषः स्यात् ॥ सूत्र - १.२.१७ ॥
अन्त्ययोर् यथोक्तम् ॥ सूत्र - १.२.१८ ॥
विधिर् वा स्याद् अपूर्वत्वाद् वादमात्रम ह्य् अनर्थकम् ॥ सूत्र - १.२.१९ ॥
लोकवद् इति चेत् ॥ सूत्र - १.२.२० ॥
न पूर्वत्वात् ॥ सूत्र - १.२.२१ ॥
उक्तं तु वाक्यशेषत्वम् ॥ सूत्र - १.२.२२ ॥
विधिश् चानर्थकः क्वचित् तस्मात् स्तुतिः प्रतीयेत तत्सामान्याद् इतरेषु तथात्वम् ॥ सूत्र - १.२.२३ ॥
प्रकरणे सम्भवन्नपकर्षो न कल्प्येत विध्यानर्थक्यं हि तं प्रति ॥ सूत्र - १.२.२४ ॥
विधौ च वाक्यभेदः स्यात् ॥ सूत्र - १.२.२५ ॥
हेतुर् वा स्याद् अर्थवत्वोपपत्तिभ्याम् ॥ सूत्र - १.२.२६ ॥
स्थितिस् तु शब्दपूर्वत्वादचोदनाच तस्य ॥ सूत्र - १.२.२७ ॥
व्यर्थे स्तुतिर् अन्याय्येति चेत् ॥ सूत्र - १.२.२८ ॥
अर्थस् तु विधिशेषत्वाद् यथा लोके ॥ सूत्र - १.२.२९ ॥
यदि च हेतुर् अवतिष्ठेत निर्देशात् सामान्याद् इति चेद् अवस्था विधीनां स्यात् ॥ सूत्र - १.२.३० ॥
तदर्थशास्त्रात् ॥ सूत्र - १.२.३१ ॥
वाक्यनियमात् ॥ सूत्र - १.२.३२ ॥
बुद्धिशास्त्रात् ॥ सूत्र - १.२.३३ ॥
अविद्यमानवचनात् ॥ सूत्र - १.२.३४ ॥
अचेतने ऽर्थबन्धनात् ॥ सूत्र - १.२.३५ ॥
अर्थविप्रतिषेधात् ॥ सूत्र - १.२.३६ ॥
स्वाध्यायवद्वचनात् ॥ सूत्र - १.२.३७ ॥
अविज्ञेयात् ॥ सूत्र - १.२.३८ ॥
अनित्यसंयोगान् मन्त्रार्थानर्थक्यम् ॥ सूत्र - १.२.३९ ॥
अविशिष्टस् तु वाक्यार्थः ॥ सूत्र - १.२.४० ॥
गुणार्थेन पुनः श्रुतिः ॥ सूत्र - १.२.४१ ॥
परिसंख्या ॥ सूत्र - १.२.४२ ॥
अर्थवादो वा ॥ सूत्र - १.२.४३ ॥
अविरुद्धं परम् ॥ सूत्र - १.२.४४ ॥
संप्रैषे कर्मगर्हानुपालम्भः संस्कारत्त्वात् ॥ सूत्र - १.२.४५ ॥
अभिधाने ऽर्थवादः ॥ सूत्र - १.२.४६ ॥
गुणाद् अप्रतिषेधः स्यात् ॥ सूत्र - १.२.४७ ॥
विद्यावचनम् असंयोगात् ॥ सूत्र - १.२.४८ ॥
सतः परमविज्ञानम् ॥ सूत्र - १.२.४९ ॥
उक्तश् चानित्यसंयोगः ॥ सूत्र - १.२.५० ॥
लिङ्गोपदेशश् च तदर्थवत् ॥ सूत्र - १.२.५१ ॥
ऊहः ॥ सूत्र - १.२.५२ ॥
विधिशब्दाश् च ॥ सूत्र - १.२.५३ ॥

#### Sub Chapter 03

धर्मस्य शब्दमूलत्वाद् अशब्दम् अनपेक्षं स्यात् ॥ सूत्र - १.३.१ ॥
अपि वा कर्तृसामान्यात् प्रमाणम् अनुमानं स्यात् ॥ सूत्र - १.३.२ ॥

विरोधे त्व् अनपेक्ष्यं स्याद् असति ह्य् अनुमानम् ॥ सूत्र - १.३.३ ॥
हेतुदर्शनाच् च ॥ सूत्र - १.३.४ ॥
शिष्टाकोपे ऽविरुद्धम् इति चेत् ॥ सूत्र - १.३.५ ॥
न शास्त्रपरिमाणत्वात् ॥ सूत्र - १.३.६ ॥
अपि वा कारणग्रहणे प्रयुक्तानि प्रतीयेरन् ॥ सूत्र - १.३.७ ॥
तेष्व् अदर्शनाद् विरोधस्य समा विप्रतिपत्तिः स्यात् ॥ सूत्र - १.३.८ ॥
शास्त्रस्था वा तन्निमित्तत्वात् ॥ सूत्र - १.३.९ ॥
चोदितं तु प्रतीयेताविरोधात् प्रमाणेन ॥ सूत्र - १.३.१० ॥
प्रयोगशास्त्रम् इति चेत् ॥ सूत्र - १.३.११ ॥
नासन्नियमात् ॥ सूत्र - १.३.१२ ॥
अवाक्यशेषाच् च ॥ सूत्र - १.३.१३ ॥
सर्वत्र च प्रयोगात् सन्निधानशास्त्राच् च ॥ सूत्र - १.३.१४ ॥
अनुमानव्यवस्थानात् तत्संयुक्तं प्रमाणं स्यात् ॥ सूत्र - १.३.१५ ॥
अपि वा सर्व धर्मः स्यात् तन्न्यायत्वाद् विधानस्य ॥ सूत्र - १.३.१६ ॥
दर्शनाद् विनियोगः स्यात् ॥ सूत्र - १.३.१७ ॥
लिङ्गाभावाच् च नित्यस्य ॥ सूत्र - १.३.१८ ॥
आख्या हि देशसंयोगात् ॥ सूत्र - १.३.१९ ॥
न स्याद् देशान्तरेष्व् इति चेत् ॥ सूत्र - १.३.२० ॥
स्याद्योगाख्या हि माथुरवत् ॥ सूत्र - १.३.२१ ॥
कर्मधर्मो वा प्रवणवत् ॥ सूत्र - १.३.२२ ॥
तुल्यं तु कर्तृधर्मेण ॥ सूत्र - १.३.२३ ॥
प्रयोगोत्पत्यशास्त्रत्वाच् छब्देषु न व्यवस्था स्यात् ॥ सूत्र - १.३.२४ ॥
शब्दे प्रयत्ननिष्पत्तेर् अपराधस्य भागित्वम् ॥ सूत्र - १.३.२५ ॥
अन्यायश् चानेकशब्दत्त्वम् ॥ सूत्र - १.३.२६ ॥
तत्र तत्त्वम् अभियोगविशेषात् स्यात् ॥ सूत्र - १.३.२७ ॥
तदशक्तिश् चानुरूपत्वात् ॥ सूत्र - १.३.२८ ॥
एक देशत्वाच् च विभाक्तिव्यत्यये स्यात् ॥ सूत्र - १.३.२९ ॥
प्रयोगचोदनाभावाद् अर्थैकत्वम् अविभागात् ॥ सूत्र - १.३.३० ॥
अद्रव्यशब्दत्वात् ॥ सूत्र - १.३.३१ ॥
अन्यदर्शनाच् च ॥ सूत्र - १.३.३२ ॥
आकृतिस् तु क्रियार्थत्वात् ॥ सूत्र - १.३.३३ ॥
न क्रिया स्याद् इति चेदर्थान्तरे विधानं न द्रव्यम् इति चेत् ॥ सूत्र - १.३.३४ ॥
तदर्थत्वात् प्रयोगस्याविभागः ॥ सूत्र - १.३.३५ ॥

### Sub Chapter 04

उक्तं समाम्नायैदम् अर्थ्यं तस्मात् सर्वं तदर्थं स्यात् ॥ सूत्र - १.४.१ ॥
अपि वा नामधेयं स्याद् यदुत्पत्तावपूर्वम् अविधायकत्वात् ॥ सूत्र - १.४.२ ॥
यस्मिन् गुणोपदेशः प्रधानतो ऽभिसम्बन्धः ॥ सूत्र - १.४.३ ॥
तत्प्रख्यञ् चान्यशास्त्रम् ॥ सूत्र - १.४.४ ॥
तद्व्यपदेशं च ॥ सूत्र - १.४.५ ॥
नामधेये गुणश्रुतेः स्याद् विधानम् इति चेत् ॥ सूत्र - १.४.६ ॥
तुल्यत्वात् क्रिययोर् न ॥ सूत्र - १.४.७ ॥
ऐकशब्द्ये परार्थवत् ॥ सूत्र - १.४.८ ॥
तद्गुणास् तु विधायेर् अन्नविभागाद् विधानार्थे न चेद् अन्येन शिष्टाः ॥ सूत्र - १.४.९ ॥
बर्हिराज्ययोर् असंस्कारे शब्दलाभाद् अतच्छब्दः ॥ सूत्र - १.४.१० ॥
प्रोक्षणीष्व् अर्थसंयोगात् ॥ सूत्र - १.४.११ ॥
तथानिर्मन्थ्ये ॥ सूत्र - १.४.१२ ॥
वैश्वदेवे विकल्प इति चेत् ॥ सूत्र - १.४.१३ ॥
न वा प्रकरणात् प्रत्यक्षविधानाच् च न हि प्रकरणं द्रव्यस्य ॥ सूत्र - १.४.१४ ॥
मिथश् चानर्थसम्बन्धः ॥ सूत्र - १.४.१५ ॥
परार्थत्वाद् गुणानाम् ॥ सूत्र - १.४.१६ ॥
पूर्ववन्तो ऽविधानार्थास् तत्सामर्थ्यं समाम्नाये ॥ सूत्र - १.४.१७ ॥
गुणस्य तु विधानार्थे तद्गुणाः प्रयोगे स्युर् अनर्थका न हि तं प्रत्यर्थवत्तास्ति ॥ सूत्र - १.४.१८ ॥
तच्छेषो नोपपद्यते ॥ सूत्र - १.४.१९ ॥
अविभागाद् विधानार्थे स्तुत्यर्थेनोपपद्येरन् ॥ सूत्र - १.४.२० ॥
कारणं स्याद् इति चेत् ॥ सूत्र - १.४.२१ ॥
आनर्थक्याद् अकारणं कर्तुर् हि कारणानि गुणार्थो हि विधीयते ॥ सूत्र - १.४.२२ ॥
तत्सिद्धिः ॥ सूत्र - १.४.२३ ॥
जातिः ॥ सूत्र - १.४.२४ ॥
सारूप्यात् ॥ सूत्र - १.४.२५ ॥
प्रशंसा ॥ सूत्र - १.४.२६ ॥
भूमा ॥ सूत्र - १.४.२७ ॥
लिङ्गसमवायात् ॥ सूत्र - १.४.२८ ॥
सन्दिग्धेषु वाक्यशेषात् ॥ सूत्र - १.४.२९ ॥
अर्थाद् वा कल्पनैकदेशत्वात् ॥ सूत्र - १.४.३० ॥

## Chapter 02

### Sub Chapter 01

भावार्थाः कर्मशब्दास् तेभ्यः क्रिया प्रतीयेतैष ह्य् अर्थो विधीयते ॥ सूत्र - २.१.१ ॥
सर्वेषां भावो ऽर्थ इति चेत् ॥ सूत्र - २.१.२ ॥

येषाम् उत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस् तानि नामानि तस्मात् तेभ्यः पराकाङ्क्षा भूतत्वात् स्वे प्रयोगै ॥ सूत्र - २.१.३ ॥

येषां तूत्पत्ताव् अर्थे स्वे प्रयोगो न विद्यते तान्य् आख्यातानि तस्मात् तेभ्यः प्रतीयेताश्रितत्वात् प्रयोगस्य ॥ सूत्र - २.१.४ ॥
चोदना पुनर् आरम्भः ॥ सूत्र - २.१.५ ॥
तानि द्वैधं गुणप्रधानभूतानि ॥ सूत्र - २.१.६ ॥
यैर् द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वात् ॥ सूत्र - २.१.७ ॥
यैस् तु द्रव्यं चिकीर्ष्यते गुणस् तत्र प्रतीयेत तस्य द्रव्यप्रधानत्वात् ॥ सूत्र - २.१.८ ॥
धर्ममात्रे तु कर्म स्याद् अनिर्वृत्तेः प्रयाजवत् ॥ सूत्र - २.१.९ ॥
तुल्यश्रुतित्वाद् वेतरैः सधर्मः स्यात् ॥ सूत्र - २.१.१० ॥
द्रव्योपदेश इति चेत् ॥ सूत्र - २.१.११ ॥
न तदर्थत्वाल् लोकवत् तस्य च शेषभूतत्वात् ॥ सूत्र - २.१.१२ ॥
स्तुतशस्त्रयोस् तु संस्कारो याज्यावद् देवताभिधानत्वात् ॥ सूत्र - २.१.१३ ॥
अर्थेन त्व् अपकृष्येत देवतानाम् अचोदनार्थस्य गुणभूतत्वात् ॥ सूत्र - २.१.१४ ॥
वशावद् वा गुणार्थं स्यात् ॥ सूत्र - २.१.१५ ॥
न श्रुतिसमवायित्वात् ॥ सूत्र - २.१.१६ ॥
व्यपदेशभेदाच् च ॥ सूत्र - २.१.१७ ॥
गुणश् चानर्थकः स्यात् ॥ सूत्र - २.१.१८ ॥
तथा याज्यापुरोरुचोः ॥ सूत्र - २.१.१९ ॥
वशायाम् अर्थसमवायात् ॥ सूत्र - २.१.२० ॥
यच् चेति वार्थवत्त्वात् स्यात् ॥ सूत्र - २.१.२१ ॥
न त्वाम्नातेषु ॥ सूत्र - २.१.२२ ॥
दृश्यते ॥ सूत्र - २.१.२३ ॥
अपि वा श्रुतिसंयोगात् प्रकरणे स्तौतिशंसती क्रियोत्पात्तिं विदध्याताम् ॥ सूत्र - २.१.२४ ॥
शब्दपृथक्त्वाच् च ॥ सूत्र - २.१.२५ ॥
अनर्थकं च तद्वचनम् ॥ सूत्र - २.१.२६ ॥
अन्यश् चार्थः प्रतीयते ॥ सूत्र - २.१.२७ ॥
अभिधानं च कर्मवत् ॥ सूत्र - २.१.२८ ॥

फलनिर्वृत्तिश् च ॥ सूत्र - २.१.२९ ॥
विधिमन्त्रयोर् ऐकार्थ्यम् ऐकशब्द्यात् ॥ सूत्र - २.१.३० ॥
अपि वा प्रयोगसामर्थ्यान् मन्त्रो ऽभिधानवाची स्यात् ॥ सूत्र - २.१.३१ ॥
तच्चोदकेषु मन्त्राख्या ॥ सूत्र - २.१.३२ ॥
शेषे ब्राह्मणशब्दः ॥ सूत्र - २.१.३३ ॥
अनाम्नातेष्व् अमन्त्रत्वमाम्नातेषु हि विभागः ॥ सूत्र - २.१.३४ ॥
तेषाम् ऋग्यत्रार्थवशेन पादव्यवस्था ॥ सूत्र - २.१.३५ ॥
गीतिषु स माख्या ॥ सूत्र - २.१.३६ ॥
शेषे यजुः शब्दाः ॥ सूत्र - २.१.३७ ॥
निगदो वा चतुर्थं स्याद् धर्मविशेषात् ॥ सूत्र - २.१.३८ ॥
व्यपदेशाच् च ॥ सूत्र - २.१.३९ ॥
यजूंषि वा तद्रूपत्वात् ॥ सूत्र - २.१.४० ॥
वचनाद् धर्मविशेषः ॥ सूत्र - २.१.४१ ॥
अर्थाच् च ॥ सूत्र - २.१.४२ ॥
गुणार्थो व्यपदेशः ॥ सूत्र - २.१.४३ ॥
सर्वेषाम् इति चेत् ॥ सूत्र - २.१.४४ ॥
न. ऋग्व्यपदेशात् ॥ सूत्र - २.१.४५ ॥
अर्थैकत्वाद् एकं वाक्यं साकाङ्क्षं चेद् विभागे स्यात् ॥ सूत्र - २.१.४६ ॥
समेषु वाक्यभेदः स्यात् ॥ सूत्र - २.१.४७ ॥
अनुषङ्गो वाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वात् ॥ सूत्र - २.१.४८ ॥
व्यवायान् नानुषज्येत ॥ सूत्र - २.१.४९ ॥

Sub Chapter 02

शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् ॥ सूत्र - २.२.१ ॥
एकस्यैवं पुनः श्रुतिर् अविशेषाद् अनर्थकं हि स्यात् ॥ सूत्र - २.२.२ ॥
प्रकरणं तु पौर्णमास्यां रूपावचनात् ॥ सूत्र - २.२.३ ॥
विशेषदर्शनाच् च सर्वेषां समेषु ह्य् अप्रवृत्तिः स्यात् ॥ सूत्र - २.२.४ ॥
गुणस् तु श्रुतिसंयोगात् ॥ सूत्र - २.२.५ ॥
चोदना वा गुणानां युगपच्छास्त्राच् चोदिते हि तदर्थत्वात् तस्यतस्योपदिश्येत ॥ सूत्र - २.२.६ ॥
व्यपदेशश् च तद्वत् ॥ सूत्र - २.२.७ ॥
लिङ्गदर्शनाच् च ॥ सूत्र - २.२.८ ॥
पौर्णमासीवद् उपांशुयाजः स्यात् ॥ सूत्र - २.२.९ ॥
चोदना वाप्रकृतत्वात् ॥ सूत्र - २.२.१० ॥
गुणोपबन्धात् ॥ सूत्र - २.२.११ ॥
प्राये वचनाच् च ॥ सूत्र - २.२.१२ ॥
आघाराग्निहोत्रम् अरूपत्वात् ॥ सूत्र - २.२.१३ ॥
संज्ञोपबन्धात् ॥ सूत्र - २.२.१४ ॥
अप्रकृतत्वाच् च ॥ सूत्र - २.२.१५ ॥
चोदना वा शब्दार्थस्य प्रयोगभूतत्वात् तत्सन्निधेर् गुणार्थेन पुनः श्रुतिः ॥ सूत्र - २.२.१६ ॥
द्रव्यसंयोगाच् चोदना पशुसोमयोः प्रकरणे ह्य् अनर्थको द्रव्यसंयोगो न हि तस्य गुणार्थेन ॥ सूत्र - २.२.१७ ॥
अचोदकाश् च संस्काराः ॥ सूत्र - २.२.१८ ॥
तद्भेदात् कर्मणो ऽभ्यासो द्रव्यपृथक्त्वाद् अनर्थकं हि स्याद् भेदो द्रव्यगुणीभावात् ॥ सूत्र - २.२.१९ ॥
संस्कारस् तु न भिद्येत परार्थत्वाद् द्रव्यस्य गुणभूतत्वात् ॥ सूत्र - २.२.२० ॥
पृथक्त्वनिवेशात् संख्यया कर्मभेदः स्यात् ॥ सूत्र - २.२.२१ ॥
संज्ञा चोत्पत्तिसंयोगात् ॥ सूत्र - २.२.२२ ॥
गुणाश् चापूर्वसंयोगे वाक्योः समत्वात् ॥ सूत्र - २.२.२३ ॥
अगुणे तु कर्मशब्दे गुणस् तत्र प्रतीयेत ॥ सूत्र - २.२.२४ ॥
फलश्रुतेस् तु कर्म स्यात् फलस्य कर्मयोगित्वात् ॥ सूत्र - २.२.२५ ॥
अतुल्यत्वात् तु वाक्ययोर् गुणे तस्य प्रतीयेत ॥ सूत्र - २.२.२६ ॥
समेषु कर्मयुक्तं स्यात् ॥ सूत्र - २.२.२७ ॥
सौभरे पुरुषश्रुतेर् निधनं कामसंयोगः ॥ सूत्र - २.२.२८ ॥
सर्वस्य वोक्तकामत्वात् तस्मिन् कामश्रुतिः स्यान् निधनार्था पुनः श्रुतिः ॥ सूत्र - २.२.२९ ॥

Sub Chapter 03

गुणस् तु क्रतुसंयोगात् कर्मान्तरं प्रयोजयेत् संयोगस्याशेषभूत्वात् ॥ सूत्र - २.३.१ ॥
एकस्य तु लिङ्गभेदात् प्रयोजनार्थम् उच्येतैकत्वं गुणवाक्यत्वात् ॥ सूत्र - २.३.२ ॥
अवेष्टौ यज्ञसंयोगात्क्रतुप्रधानमुच्यते ॥ सूत्र - २.३.३ ॥
आधाने सर्वशेषत्वात् ॥ सूत्र - २.३.४ ॥
अयनेषु चोदनान्तरं संज्ञोपबन्धात् ॥ सूत्र - २.३.५ ॥
अगुणाच् च कर्मचोदना ॥ सूत्र - २.३.६ ॥
समाप्तं च फले वाक्यम् ॥ सूत्र - २.३.७ ॥
विकारो वा प्रकरणात् ॥ सूत्र - २.३.८ ॥
लिङ्गदर्शनाच् च ॥ सूत्र - २.३.९ ॥
गुणात् संज्ञोपबन्धः ॥ सूत्र - २.३.१० ॥
समाप्तिर् अविशिष्टा ॥ सूत्र - २.३.११ ॥
संस्कारश् चाप्रकरणे ऽकर्मशब्दत्वात् ॥ सूत्र - २.३.१२ ॥
यावद् उक्तं वा कर्मणः श्रुतिमूलत्वात् ॥ सूत्र - २.३.१३ ॥
यजतिस् तु द्रव्यफलभोक्तृसंयोगाद् एतेषां कर्मसम्बन्धात् ॥ सूत्र - २.३.१४ ॥
लिङ्गदर्शनाच् च ॥ सूत्र - २.३.१५ ॥
विषये प्रायदर्शनात् ॥ सूत्र - २.३.१६ ॥
अर्थवादोपपत्तेश् च ॥ सूत्र - २.३.१७ ॥
संयुक्तस् त्व् अर्थशब्देन तदर्थः श्रुतिसंयोगात् ॥ सूत्र - २.३.१८ ॥
पात्नीवते तु पूर्वत्वाद् अवच्छेदः ॥ सूत्र - २.३.१९ ॥
अद्रव्यत्वात् कवेले कर्मशेषः स्यात् ॥ सूत्र - २.३.२० ॥
अग्निस् तु लिङ्गदर्शनात् क्रतुशब्दः प्रतीयेत ॥ सूत्र - २.३.२१ ॥
द्रव्यं वा स्याच् चोदनायास् तदर्थत्वात् ॥ सूत्र - २.३.२२ ॥
तत्संयोगात् क्रतुस् तदाख्यः स्यात् तेन धर्मविधानानि ॥ सूत्र - २.३.२३ ॥
प्रकरणान्तरे प्रयोजनान्यत्वम् ॥ सूत्र - २.३.२४ ॥
फलं चाकर्मसंनिधौ ॥ सूत्र - २.३.२५ ॥
संनिधौ त्व् अविभागात् फलार्थेन पुनः श्रुतिः ॥ सूत्र - २.३.२६ ॥
आग्नेयसूक्तहेतुत्वाद् अभ्यासेन प्रतीयेत ॥ सूत्र - २.३.२७ ॥
अविभागात् तु कर्मणां द्विरुक्तेर् न विधीयते ॥ सूत्र - २.३.२८ ॥
अन्यार्था वा पुनः श्रुतिः ॥ सूत्र - २.३.२९ ॥

Sub Chapter 04

यावज्जीविको ऽभ्यासः कर्मधर्मः प्रकरणात् ॥ सूत्र - २.४.१ ॥
कर्तुर् वा श्रुतिसंयोगात् ॥ सूत्र - २.४.२ ॥
लिङ्गदर्शनाच् च कर्मधर्मे हि प्रक्रमेण नियम्येत तत्रानर्थकम् अन्यत् स्यात् ॥ सूत्र - २.४.३ ॥
व्यपवर्गं च दर्शयति कालश् चेत् कर्मभेदः स्यात् ॥ सूत्र - २.४.४ ॥
अनित्यत्वात् तु नैवं स्यात् ॥ सूत्र - २.४.५ ॥
विरोधश् चापि पूर्ववत् ॥ सूत्र - २.४.६ ॥
कर्तुस् तु धर्मनियमात् कालशास्त्रं निमित्तं स्यात् ॥ सूत्र - २.४.७ ॥

नामरूपधर्मविशेषपुनरुक्तिनिन्दाशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच् छाखान्तरेषु कर्मभेदः स्यात् ॥ सूत्र - २.४.८ ॥
एकं वा संयोगरूपचोदनाख्याविशेषात् ॥ सूत्र - २.४.९ ॥
न नाम्ना स्याद् अचोदनाभिधानत्वात् ॥ सूत्र - २.४.१० ॥
सर्वेषां चैककर्म्यं स्यात् ॥ सूत्र - २.४.११ ॥
कृतकं चाभिधानम् ॥ सूत्र - २.४.१२ ॥
एकत्वे ऽपि परम् ॥ सूत्र - २.४.१३ ॥

विद्यायां धर्मशास्त्रम् ‖ सूत्र - २.४.१४ ‖
अग्नेयवत्पुनर्वचनम् ‖ सूत्र - २.४.१५ ‖
अद्विर्वचनं वा श्रुतिसंयोगाविशेषात् ‖ सूत्र - २.४.१६ ‖
अर्थासन्निधेश् च ‖ सूत्र - २.४.१७ ‖
न चैकं प्रतिशिष्यते ‖ सूत्र - २.४.१८ ‖
समाप्तिवच् च संप्रेक्षा ‖ सूत्र - २.४.१९ ‖
एकत्वे ऽपि पराणि निन्दाशक्तिसमाप्तिवचनानि ‖ सूत्र - २.४.२० ‖
प्रायश्चित्तं निमित्तेन ‖ सूत्र - २.४.२१ ‖
प्रक्रमाद् वा नियोगेन ‖ सूत्र - २.४.२२ ‖
समाप्तिः पूर्ववत्त्वाद्यथाज्ञाते प्रतीयेत ‖ सूत्र - २.४.२३ ‖
लिङ्गमविशिष्टं सर्वशेषत्वान् न हि तत्र कर्मचोदना तस्मात् द्वादशाहस्याहारव्यपदेशः स्यात् ‖ सूत्र - २.४.२४ ‖

द्रव्ये चाचोदितत्वाद् विधीनाम् अव्यवस्था स्यान् निर्देशाद् व्यतिष्ठेत तस्मान् नित्यानुवादः स्यात् ‖ सूत्र - २.४.२५ ‖
विहितप्रतिषेधात् पक्षे ऽतिरेकः स्यात् ‖ सूत्र - २.४.२६ ‖
सारस्वते विप्रतिषेधाद्यदेति स्यात् ‖ सूत्र - २.४.२७ ‖
उपहव्ये ऽप्रतिप्रसवः ‖ सूत्र - २.४.२८ ‖
गुणार्था वा पुनः श्रुतिः ‖ सूत्र - २.४.२९ ‖
प्रत्ययं चापि दर्शयति ‖ सूत्र - २.४.३० ‖
अपि वा क्रमसंयोगाद् विधिपृथक्त्वम् एकस्यां व्यवतिष्ठेत ‖ सूत्र - २.४.३१ ‖
विरोधिना त्व् असंयोगाद् ऐककर्म्ये तत्संयोगाद् विधीनां सर्वकर्मप्रत्ययः स्यात् ‖ सूत्र - २.४.३२ ‖

## Chapter 03

### Sub Chapter 01

अथातः शेषलक्षणम् ‖ सूत्र - ३.१.१ ‖
शेषः परार्थत्वात् ‖ सूत्र - ३.१.२ ‖
द्रव्यगुणसंस्कारेषु बादरिः ‖ सूत्र - ३.१.३ ‖
कर्माण्यपि जैमिनिः फलार्थत्वात् ‖ सूत्र - ३.१.४ ‖
फलं च पुरुषार्थत्वात् ‖ सूत्र - ३.१.५ ‖
पुरुषश् च कर्मार्थत्वात् ‖ सूत्र - ३.१.६ ‖
तेषाम् अर्थेन सबन्धः ‖ सूत्र - ३.१.७ ‖
विहितस् तु सर्वधर्मः स्यात् संयोगतो ऽविशेषात् प्रकरणाविशेषाच् च ‖ सूत्र - ३.१.८ ‖
अर्थलोपाद् अकर्मे स्यात् ‖ सूत्र - ३.१.९ ‖
फलं तु सह चेष्टया शब्दार्थो ऽभावाद् विप्रयोगे स्यात् ‖ सूत्र - ३.१.१० ‖
द्रव्यं चोत्पत्तिसंयोगात् तद् अर्थम् एव चोद्येत ‖ सूत्र - ३.१.११ ‖
अर्थैकत्वे द्रव्यगुणयोर् ऐककर्म्यान् नियमः स्यात् ‖ सूत्र - ३.१.१२ ‖
एकत्वयुक्तम् एकस्य श्रुतिसंयोगात् ‖ सूत्र - ३.१.१३ ‖
सर्वेषां वा लक्षणत्वाद् अविशिष्टं हि लक्षणम् ‖ सूत्र - ३.१.१४ ‖
चोदितेतुपरार्थत्वाद् यथाश्रुति प्रतीयेता ‖ सूत्र - ३.१.१५ ‖
संस्काराद् वागुणानाम् अव्यवस्था स्यात् ‖ सूत्र - ३.१.१६ ‖
व्यवस्थावार्थस्य श्रुतिसंयोगात् तस्य शब्द प्रमाणत्वात् ‖ सूत्र - ३.१.१७ ‖
आनर्थक्यात्तदङ्गेषु ‖ सूत्र - ३.१.१८ ‖
कर्तृगुणे तु कर्मासमवायाद् वाक्यभेदः स्यात् ‖ सूत्र - ३.१.१९ ‖
साकाङ्क्षं त्व् एकवाक्यं स्याद् असमाप्तं हि पूर्वेण ‖ सूत्र - ३.१.२० ‖
सन्दिग्धे तुब्यवायाद् वाक्यभेदः स्यात् ‖ सूत्र - ३.१.२१ ‖
गुणानां च परार्थत्वाद् असम्बन्धः समत्वात् स्यात् ‖ सूत्र - ३.१.२२ ‖
मिथश् चानर्थसम्वन्धात् ‖ सूत्र - ३.१.२३ ‖
आनन्तर्यम् अचोदना ‖ सूत्र - ३.१.२४ ‖
बाक्यानां च समाप्तत्वात् ‖ सूत्र - ३.१.२५ ‖
शेषस् तु गुणसंयुक्तः साधारणः प्रतीयेत मिथस् तेषाम् असम्बन्धात् ‖ सूत्र - ३.१.२६ ‖
व्यवस्था वार्थसंयोगाल् लिङ्गस्यार्थेन सम्बन्धाल्लक्षणार्था गुणश्रुतिः ‖ सूत्र - ३.१.२७ ‖

### Sub Chapter 02

अर्थाभिधानसामर्थ्यान् मन्त्रेषु शेषभावः स्यात् तस्माद् उत्पत्तिसम्बन्धो ऽर्थेन नित्यसंयोगात् ‖ सूत्र - ३.२.१ ‖
संस्कारकत्वाद् अचोदितेन स्यात् ‖ सूत्र - ३.२.२ ‖
वचनात् त्व् अयथार्थम् ऐन्द्री स्यात् ‖ सूत्र - ३.२.३ ‖
गुणाद् वाप्य् अभिधानं स्यात् सम्बन्धस्याशास्त्रहेतुत्वात् ‖ सूत्र - ३.२.४ ‖
तथाह्वानम् अपीति चेत् ‖ सूत्र - ३.२.५ ‖
नकालविधिश् चोदितत्वात् ‖ सूत्र - ३.२.६ ‖
गुणाभावात् ‖ सूत्र - ३.२.७ ‖
लिङ्गाच् च ‖ सूत्र - ३.२.८ ‖
विधिकोपश् चोपदेशे स्यात् ‖ सूत्र - ३.२.९ ‖
तथोत्थानविसर्जने ‖ सूत्र - ३.२.१० ‖
सूक्तवाके च कालविधिः परार्थत्वात् ‖ सूत्र - ३.२.११ ‖
उपदेशो वा याज्याशब्दो हि नाकस्मात् ‖ सूत्र - ३.२.१२ ‖
सदेवतार्थस् तत्संयोगात् ‖ सूत्र - ३.२.१३ ‖
प्रतिपत्तिर् इति चेत् स्विष्टकृद्वदुभयसंस्कारः स्यात् ‖ सूत्र - ३.२.१४ ‖
कृत्स्नोपदेशाद् उभयत्र सर्ववचनम् ‖ सूत्र - ३.२.१५ ‖
यथार्थं वा शेषभूतसंस्कारात् ‖ सूत्र - ३.२.१६ ‖
वचनाद् इति चेत् ‖ सूत्र - ३.२.१७ ‖
प्रकरणाविभागाद् उभे प्रति कृत्स्नशब्दः ‖ सूत्र - ३.२.१८ ‖
लिङ्गक्रमसमाख्यानात् काम्ययुक्तं समामनानम् ‖ सूत्र - ३.२.१९ ‖
अधिकारे च मन्त्रविधिर् अतदाख्येषु शिष्टत्वात् ‖ सूत्र - ३.२.२० ‖
तदाख्यो वा प्रकरणोपपत्तिभ्याम् ‖ सूत्र - ३.२.२१ ‖
अनर्थकश् चोपदेशः स्याद् असम्बन्धात् फलवता न ह्य् उपस्थानं फलवत् ‖ सूत्र - ३.२.२२ ‖
सर्वेषां चोपदिष्टत्वात् ‖ सूत्र - ३.२.२३ ‖
लिङ्गसमाख्यानाभ्यां भक्षार्थतानुवाकस्य ‖ सूत्र - ३.२.२४ ‖
तस्य रूपोपदेशाभ्याम् अपकर्षो ऽर्थस्य चोदितत्वात् ‖ सूत्र - ३.२.२५ ‖
गुणाभिधानान् मन्द्रादिर् एकमन्त्रः स्यात् तयोर् एकार्थसंयोगात् ‖ सूत्र - ३.२.२६ ‖
लिङ्गविशेषनिर्देशात् समानविधानेष्व् अनैन्द्राणाम् अमन्त्रत्वम् ‖ सूत्र - ३.२.२७ ‖
यथादेवतं वा तत्प्रकृतित्वं हि दर्शयति ‖ सूत्र - ३.२.२८ ‖
पुनरभ्युन्नीतेषु सर्वेषाम् उपलक्षणं द्विशेषत्वात् ‖ सूत्र - ३.२.२९ ‖
अनयाद् वा पूर्वस्यानुपलक्षणम् ‖ सूत्र - ३.२.३० ‖
ग्रहणाद् वापनयः स्यात् ‖ सूत्र - ३.२.३१ ‖
पात्नीवते तु पूर्ववत् ‖ सूत्र - ३.२.३२ ‖
ग्रहणाद् वापनीतं स्यात् ‖ सूत्र - ३.२.३३ ‖
त्वष्टारं तूपलक्षयेत् पानात् ‖ सूत्र - ३.२.३४ ‖
अतुल्यत्वात् तु नैवं स्यात् ‖ सूत्र - ३.२.३५ ‖
त्रिंशच् च परार्थत्वात् ‖ सूत्र - ३.२.३६ ‖
वषट्कारश् च कर्तृवत् ‖ सूत्र - ३.२.३७ ‖
छन्दः प्रतिषेधस् तु सर्वगामित्वात् ‖ सूत्र - ३.२.३८ ‖
ऐन्द्राग्ने तु लिङ्गभाबात् स्यात् ‖ सूत्र - ३.२.३९ ‖
एकस्मिन् वा देवतान्तराद् विभागवत् ‖ सूत्र - ३.२.४० ‖
छन्दश् च देवतावत् ‖ सूत्र - ३.२.४१ ‖
सर्वेषु वाभावाद् एकच्छन्दसः ‖ सूत्र - ३.२.४२ ‖
सर्वेषां वैकमन्त्र्यम् ऐतिशायनस्य भक्तिपानत्वात् सवनाधिकारो हि ‖ सूत्र - ३.२.४३ ‖

### Sub Chapter 03

श्रुतेर् जाताधिकारः स्यात् ‖ सूत्र - ३.३.१ ‖
वेदो वा प्रायदर्शनात् ‖ सूत्र - ३.३.२ ‖

लिङ्गाच् च ‖ सूत्र - ३.३.३ ‖
धर्मोपदेशाच् च न हि द्रव्येण सम्बन्धः ‖ सूत्र - ३.३.४ ‖
त्रयीविद्याख्या च तद्विद् धि ‖ सूत्र - ३.३.५ ‖
व्यक्तिक्रमे यथाश्रुतीति चेत् ‖ सूत्र - ३.३.६ ‖
न सर्वस्मिन् निवेशात् ‖ सूत्र - ३.३.७ ‖
वेदसंयोगान् न प्रकरणेन बाध्यते ‖ सूत्र - ३.३.८ ‖
गुणमुख्यव्यतिक्रमे तदर्थत्वान् मुख्येन वेदसंयोगः ‖ सूत्र - ३.३.९ ‖
भूयस्त्वेनोभयश्रुति ‖ सूत्र - ३.३.१० ‖
असंयुक्तं प्रकरणाद् इति कर्तव्यतार्थित्वात् ‖ सूत्र - ३.३.११ ‖
क्रमश् च देशसामान्यात् ‖ सूत्र - ३.३.१२ ‖
आख्या चैवम तदर्थत्वात् ‖ सूत्र - ३.३.१३ ‖
श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्यम् अर्थविप्रकर्षात् ‖ सूत्र - ३.३.१४ ‖
अहीनो वा प्रकरणाद् गौणः ‖ सूत्र - ३.३.१५ ‖
असंयोगात् तु मुख्यस्य तस्माद् अपकृष्येत ‖ सूत्र - ३.३.१६ ‖
द्वित्वबहुत्वयुक्तं वा चोदनात् तस्य ‖ सूत्र - ३.३.१७ ‖
पक्षेणार्थकृतस्येति चेत् ‖ सूत्र - ३.३.१८ ‖
नकृतेर् एकसंयोगात् ‖ सूत्र - ३.३.१९ ‖
जाघनी चैकदेशत्वात् ‖ सूत्र - ३.३.२० ‖
चोदना वापूर्वत्वात् ‖ सूत्र - ३.३.२१ ‖
एकदेश इति चेत् ‖ सूत्र - ३.३.२२ ‖
न प्रकृतेर् अशास्त्रनिष्पत्तेः ‖ सूत्र - ३.३.२३ ‖
सन्तर्दनं प्रकृतौ क्रयणवदनर्थलोपात् स्यात् ‖ सूत्र - ३.३.२४ ‖
उत्कर्षो वा ग्रहणाद् विशेषस्य ‖ सूत्र - ३.३.२५ ‖
कर्तृतो वा विशेषस्य तन्निमित्तत्वात् ‖ सूत्र - ३.३.२६ ‖
क्रतुतो वार्थवादान् उपपत्तेः स्यात् ‖ सूत्र - ३.३.२७ ‖
संस्थाश् च कर्तृवद् धारणार्थाविशेषात् ‖ सूत्र - ३.३.२८ ‖
उक्थ्यादिषु वार्थस्य विद्यमानत्वात् ‖ सूत्र - ३.३.२९ ‖
अविशेषात् स्तुतिर् व्यर्थेति चेत् ‖ सूत्र - ३.३.३० ‖
स्याद् अनित्यत्वात् ‖ सूत्र - ३.३.३१ ‖
सङ्ख्यायुक्तं क्रतोः प्रकरणात् स्यात् ‖ सूत्र - ३.३.३२ ‖
नैमित्तिकं वा कर्तृसंयोगाल् लिङ्गस्य तन्निमित्तत्वात् ‖ सूत्र - ३.३.३३ ‖
पौष्णं पैषणं विकृतौ प्रतीयेताचोदनात् प्रकृतौ ‖ सूत्र - ३.३.३४ ‖
तत्सर्वार्थम् अविशेषात् ‖ सूत्र - ३.३.३५ ‖
चरौवार्थोक्तं पुरोडाशे ऽर्थविप्रतिषेधात् पशौ न स्यात् ‖ सूत्र - ३.३.३६ ‖
चराव् अपीति चेत् ‖ सूत्र - ३.३.३७ ‖
न पक्तिनामत्वात् ‖ सूत्र - ३.३.३८ ‖
एकस्मिन्न् एकसंयोगात् ‖ सूत्र - ३.३.३९ ‖
धर्माविप्रतिषेधाच् च ‖ सूत्र - ३.३.४० ‖
अपि वा सद्वितीये स्याद् देवतानिमित्तत्वात ‖ सूत्र - ३.३.४१ ‖
लिङ्गदर्शनाच् च ‖ सूत्र - ३.३.४२ ‖
वचनात् सर्वपेषणं तं प्रति शास्त्रवत्वाद् अर्थाभावाद् विचराव् अपेषणं भवति ‖ सूत्र - ३.३.४३ ‖
एकस्मिन् वार्थधर्मत्वाद् ऐन्द्राग्नव् अदुभयोर् न स्याद् अचोदितत्वात् ‖ सूत्र - ३.३.४४ ‖
हेतुमात्रम् अदन्तत्वम् ‖ सूत्र - ३.३.४५ ‖
वचनं परम् ‖ सूत्र - ३.३.४६ ‖

## Sub Chapter 04

निवीताम् इति मनुष्यधर्मः शब्दस्य तत्प्रधानत्वात् ‖ सूत्र - ३.४.१ ‖
अपदेशो वार्थस्य विद्यमानतत्त्वात् ‖ सूत्र - ३.४.२ ‖
विधिस्तवर्पूर्वत्वात् स्यात् ‖ सूत्र - ३.४.३ ‖
स प्रायात् कर्मधर्मः स्यात् ‖ सूत्र - ३.४.४ ‖
वाक्यशेषत्वात् ‖ सूत्र - ३.४.५ ‖
तत्प्रकरणे यत् तत् संयुक्तम् अविप्रतिषेधात् ‖ सूत्र - ३.४.६ ‖
तत्प्रधाने वा तुल्यवत् प्रसंख्यानाद् इतरस्य तदर्थत्वात् ‖ सूत्र - ३.४.७ ‖
अर्थवादो वा प्रकरणात् ‖ सूत्र - ३.४.८ ‖
विधिना चैकवाक्यत्वात् ‖ सूत्र - ३.४.९ ‖
दिग्विभागश् च तद्वत् सम्बन्धस्यार्थहेतुत्वात् ‖ सूत्र - ३.४.१० ‖
परुषि दितपूर्णघृतविदग्धं च तद्वत् ‖ सूत्र - ३.४.११ ‖
अकर्म क्रतुसंयुक्तं संयोगान् नित्यानुवादः स्यात् ‖ सूत्र - ३.४.१२ ‖
विधिर् वा संयोगान्तरात् ‖ सूत्र - ३.४.१३ ‖
अहीनवत् पुरुषस् तदर्थत्वात् ‖ सूत्र - ३.४.१४ ‖
प्रकरणविशेषाद् वा तद्युक्तस्य संस्कारो द्रव्यवत् ‖ सूत्र - ३.४.१५ ‖
व्यपदेशाद् अपकृष्येत ‖ सूत्र - ३.४.१६ ‖
शंयौ च सर्वपरिदानात् ‖ सूत्र - ३.४.१७ ‖
प्रागपरोधान् मलवद् वाससः ‖ सूत्र - ३.४.१८ ‖
अन्नप्रतिषेधाच् च ‖ सूत्र - ३.४.१९ ‖
अप्रकरणे तु तद्धर्मस् ततो विशेषात् ‖ सूत्र - ३.४.२० ‖
अद्रव्यत्वात् तु शेषः स्यात् ‖ सूत्र - ३.४.२१ ‖
वेदसंयोगात् ‖ सूत्र - ३.४.२२ ‖
द्रव्यसंयोगाच् च ‖ सूत्र - ३.४.२३ ‖
स्याद् वास्य संयोगवत् फलेन सम्बन्धस् तस्मात् कर्मैतिशायनः ‖ सूत्र - ३.४.२४ ‖
शेषाः प्रकरणे ऽविशेषात् सर्वकर्मणाम् ‖ सूत्र - ३.४.२५ ‖
होमास् तु व्यवतिष्ठेर् अन्नाहवनीयसंयोगात् ‖ सूत्र - ३.४.२६ ‖
शेषश् च समाख्यानात् ‖ सूत्र - ३.४.२७ ‖
दोषात् त्व् इष्टिर् लौकिके स्याच् छास्त्राद् धि वैदिक न दोषः स्यात् ‖ सूत्र - ३.४.२८ ‖
अर्थवादो वानुपपातत् तस्माद् यज्ञे प्रतीयेत ‖ सूत्र - ३.४.२९ ‖
अचोदित च कर्मभेदात् ‖ सूत्र - ३.४.३० ‖
लिङ्गाद् आर्त्विजे स्यात् ‖ सूत्र - ३.४.३१ ‖
पानव्यापच् च तद्वत् ‖ सूत्र - ३.४.३२ ‖
दोषात् तु वैदिके स्याद् अर्थाद् धि लौकिके न दोषः स्यात् ‖ सूत्र - ३.४.३३ ‖
तत्सर्वत्राविशेषात् ‖ सूत्र - ३.४.३४ ‖
स्वामिनो वा तदर्थत्वात् ‖ सूत्र - ३.४.३५ ‖
लिङ्गदर्शनाच् च ‖ सूत्र - ३.४.३६ ‖
सर्वप्रदानं हविषस् तदर्थत्वात् ‖ सूत्र - ३.४.३७ ‖
निरवदानात् तु शेषः स्यात् ‖ सूत्र - ३.४.३८ ‖
उपायो वा तदर्थत्वात् ‖ सूत्र - ३.४.३९ ‖
कृतत्वात् तु कर्मणः सकृत् स्याद् द्रव्यस्य गुणभूतत्वात् ‖ सूत्र - ३.४.४० ‖
शेषदर्शनाच् च ‖ सूत्र - ३.४.४१ ‖
अप्रयोजकत्वाद् एकस्मात् क्रियेरञ् छेषस्य गुणभूतत्वात् ‖ सूत्र - ३.४.४२ ‖
संस्कृतत्वाच् च ‖ सूत्र - ३.४.४३ ‖
सर्वेभ्यो वा कारणाविशेषात् संस्कारस्य तदर्थत्वात् ‖ सूत्र - ३.४.४४ ‖
लिङ्गदर्शनाच् च ‖ सूत्र - ३.४.४५ ‖
एकस्माच् चेद् यथाकाम्यम् अविशेषात् ‖ सूत्र - ३.४.४६ ‖
मुख्याद् वा पूर्वकालत्वात् ‖ सूत्र - ३.४.४७ ‖
भक्षाश्रवणाद् दानशब्दः परिक्रये ‖ सूत्र - ३.४.४८ ‖
तत्संस्तवाच् च ‖ सूत्र - ३.४.४९ ‖
भक्षार्थो वा द्रव्ये समत्वात् ‖ सूत्र - ३.४.५० ‖
व्यादेशाद् दानसंस्तुतिः ‖ सूत्र - ३.४.५१ ‖

## Sub Chapter 05

आज्याच् च सर्वसंयोगात् ‖ सूत्र - ३.५.१ ‖
कारणाच् च ‖ सूत्र - ३.५.२ ‖
एकस्मिन्त् समवत्तशब्दात् ‖ सूत्र - ३.५.३ ‖
आज्ये च दर्शनात्स्विष्टकृदर्थवदस्य ‖ सूत्र - ३.५.४ ‖
अशेषत्वात् तु नैवं स्यात् सर्वादानाद् अशेषता ‖ सूत्र - ३.५.५ ‖
साधारण्यान् न ध्रुवायां स्यात् ‖ सूत्र - ३.५.६ ‖
अवत्तत्वाच् च जुह्वां तस्य च होमसंयोगात् ‖ सूत्र - ३.५.७ ‖
चमसवद् इति चेत् ‖ सूत्र - ३.५.८ ‖
न चोदनाविरोधाद् धविः प्रकल्पनात्वाच् च ‖ सूत्र - ३.५.९ ‖
उत्पन्नाधिकारात् सति सर्ववचनम् ‖ सूत्र - ३.५.१० ‖
जातिविशेषात् परम् ‖ सूत्र - ३.५.११ ‖
अन्त्यम् अरेकार्थे ‖ सूत्र - ३.५.१२ ‖
साकम्प्रस्थाय्ये स्विष्टकृद् इडं च तद्वत् ‖ सूत्र - ३.५.१३ ‖
सौत्रामण्यां च ग्रहेषु ‖ सूत्र - ३.५.१४ ‖
तद्वच् च शेषवचनम् ‖ सूत्र - ३.५.१५ ‖
द्रव्यैकत्वे कर्मभेदात् प्रतिकर्म क्रियेरन् ‖ सूत्र - ३.५.१६ ‖
अविभागाच् च शेषस्य सर्वान् प्रत्यविशिष्ठत्वात् ‖ सूत्र - ३.५.१७ ‖
ऐन्द्रवायवे तु वचनात् प्रतिकर्म भक्षः स्यात् ‖ सूत्र - ३.५.१८ ‖
सोमे ऽवचनाद् भक्षो न विद्यते ‖ सूत्र - ३.५.१९ ‖
स्याद् वान्यार्थदर्शनात् ‖ सूत्र - ३.५.२० ‖
वचनानि त्व् अपूर्वत्वात् तस्माद् यथोपदेशं स्युः ‖ सूत्र - ३.५.२१ ‖
चमसेषु समाख्यानात् संयोगस्य तन्निमित्तत्त्वात् ‖ सूत्र - ३.५.२२ ‖
उद्गातृचमसमेकः श्रुतिसंयोगात् ‖ सूत्र - ३.५.२३ ‖
सर्वे वा सर्वसंयोगात् ‖ सूत्र - ३.५.२४ ‖
स्तोत्रकारिणां वा तत्संयोगाद् बहुश्रुतेः ‖ सूत्र - ३.५.२५ ‖
सर्वे तु वेदसंयोगात् कारणाद् एकदेशे स्यात् ‖ सूत्र - ३.५.२६ ‖
ग्रावस्तुतो भक्षो न विद्यते ऽनाम्नानात् ‖ सूत्र - ३.५.२७ ‖
हारियोजने वा सर्वसंयोगात् ‖ सूत्र - ३.५.२८ ‖
चमसिनां वा सन्निधानात् ‖ सूत्र - ३.५.२९ ‖
सर्वेषां तु विधित्वात् तदर्था चमसिश्रुतिः ‖ सूत्र - ३.५.३० ‖
वषट्काराच् च भक्षयेत् ‖ सूत्र - ३.५.३१ ‖
होमाभिषबाभ्यां च ‖ सूत्र - ३.५.३२ ‖
प्रत्यक्षोपदेशाच् चमसानाम् अव्यक्तः शेषे ‖ सूत्र - ३.५.३३ ‖
स्याद् वा कारणभावाद् अनिर्देशश् चमसानां कर्तुस् तद्वचनत्वात् ‖ सूत्र - ३.५.३४ ‖
चमसे चान्यदर्शनात् ‖ सूत्र - ३.५.३५ ‖
एकपात्रे क्रमाद् अध्वर्युः पूर्वो भक्षयेत् ‖ सूत्र - ३.५.३६ ‖
होता वा मन्त्रवर्णात् ‖ सूत्र - ३.५.३७ ‖
वचनाच् च ‖ सूत्र - ३.५.३८ ‖
कारणानुपूर्व्याच् च ‖ सूत्र - ३.५.३९ ‖
वचनाद् अनुज्ञातभक्षणम् ‖ सूत्र - ३.५.४० ‖
तदुपहूत उपह्वयस्वेत्य् अनेनानुज्ञापयेलिङ्गात् ‖ सूत्र - ३.५.४१ ‖
तत्रार्थात् प्रतिवचनम् ‖ सूत्र - ३.५.४२ ‖
तदेकत्राणां समवायात् ‖ सूत्र - ३.५.४३ ‖
याज्यापनयेनापनीतो भक्षः प्रवरवत् ‖ सूत्र - ३.५.४४ ‖
यष्टुर् वा कारणागमात् ‖ सूत्र - ३.५.४५ ‖
प्रवृत्तत्वात् प्रवरस्यानपायः ‖ सूत्र - ३.५.४६ ‖
फलचमसो नैमित्तिको भक्षविकारः श्रुतिसंयोगात् ‖ सूत्र - ३.५.४७ ‖
इज्याबिकारो वा संस्कारस्य तदर्थत्वात् ‖ सूत्र - ३.५.४८ ‖
होमात् ‖ सूत्र - ३.५.४९ ‖
चमसैश् च तुल्यकालत्वात् ‖ सूत्र - ३.५.५० ‖
लिङ्गदर्शनाच् च ‖ सूत्र - ३.५.५१ ‖
अनुप्रसर्पिषु सामान्यात् ‖ सूत्र - ३.५.५२ ‖
ब्रह्मणा वा तुल्यशब्दत्वात् ‖ सूत्र - ३.५.५३ ‖

## Sub Chapter 06

तत् सर्वार्थम् अप्रकरणात् ‖ सूत्र - ३.६.१ ‖
प्रकृतौ वाद्विरुक्तत्वात् ‖ सूत्र - ३.६.२ ‖
तद्वर्जं तु वचनप्राप्ते ‖ सूत्र - ३.६.३ ‖
दर्शनाद् इति चेत् ‖ सूत्र - ३.६.४ ‖
न चोदनैकार्थ्यात् ‖ सूत्र - ३.६.५ ‖
उत्पत्तिर् इति चेत् ‖ सूत्र - ३.६.६ ‖
न तुल्यत्वात् ‖ सूत्र - ३.६.७ ‖
चोदनार्थकात्स्न्यात् तु मुख्यविप्रतिषेधात् प्रकृत्यर्थः ‖ सूत्र - ३.६.८ ‖
प्रकरणविशेषात् तु विकृतौ विरोधि स्यात् ‖ सूत्र - ३.६.९ ‖
नैमित्तिकं तु प्रकृतौ तद्विकारः संयोगविशेषात् ‖ सूत्र - ३.६.१० ‖
इष्टयर्थमग्न्याधेयं प्रकरणात् ‖ सूत्र - ३.६.११ ‖
न वा तासां तदर्थत्वात् ‖ सूत्र - ३.६.१२ ‖
लिङ्गदर्शनाच् च ‖ सूत्र - ३.६.१३ ‖
तत्प्रकृत्यर्थं यथान्ये ऽनारभ्यवादाः ‖ सूत्र - ३.६.१४ ‖
सर्वार्थ वाग्न्यधानस्य स्वकालत्वात् ‖ सूत्र - ३.६.१५ ‖
तासाम् अग्निः प्रकृतितः प्रयाजवत् स्यात् ‖ सूत्र - ३.६.१६ ‖
न वा तासां तदर्थत्वात् ‖ सूत्र - ३.६.१७ ‖
तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात् ‖ सूत्र - ३.६.१८ ‖
स्थानाच् च पूर्वस्य ‖ सूत्र - ३.६.१९ ‖
श्वस् त्व् एकेषां तत्र प्राक्श्रुतिर् गुणार्था ‖ सूत्र - ३.६.२० ‖
तेनोत्कृष्टस्य कालविधिर् इति चेत् ‖ सूत्र - ३.६.२१ ‖
नैकदेशत्वात् ‖ सूत्र - ३.६.२२ ‖
अर्थेनेति चेत् ‖ सूत्र - ३.६.२३ ‖
न श्रुतिविप्रतिषेधात् ‖ सूत्र - ३.६.२४ ‖
स्थानात् तु पूर्वस्य संस्कारस्य तदर्थत्वात् ‖ सूत्र - ३.६.२५ ‖
लिङ्गदर्शनाच् च ‖ सूत्र - ३.६.२६ ‖
अचोदना गुणार्थेन ‖ सूत्र - ३.६.२७ ‖
दोहयोः कालभेदाद् असंयुक्तं शृतं स्यात् ‖ सूत्र - ३.६.२८ ‖
प्रकरणविभागाद् वा तत्संयुक्तस्य कालशास्त्रम् ‖ सूत्र - ३.६.२९ ‖
तद्वत् सवनान्तरे ग्रहाम्नानम् ‖ सूत्र - ३.६.३० ‖
रशना च लिङ्गदर्शनात् ‖ सूत्र - ३.६.३१ ‖
आराच् छिष्टम् असंयुक्तम् इतरैः सन्निधानात् ‖ सूत्र - ३.६.३२ ‖
संयुक्तं वा तदर्थत्वाच् छेषस्य तन्निमित्तत्वात् ‖ सूत्र - ३.६.३३ ‖
निर्देशाद् व्यवतिष्ठेत ‖ सूत्र - ३.६.३४ ‖
अग्न्यङ्गम् अप्रकरणे तद्वत् ‖ सूत्र - ३.६.३५ ‖
नैमित्तिकम् अतुल्यत्वाद् असमानविथानां स्यात् ‖ सूत्र - ३.६.३६ ‖
प्रतिनिधिश् च मिमांसा-३.६.३७ ‖
तद्वत्प्रयोजनैकत्वात् ‖ सूत्र - ३.६.३८ ‖
अशास्त्रलक्षणत्वाच्च ‖ सूत्र - ३.६.३९ ‖
नियमार्था गुणश्रुतिः ‖ सूत्र - ३.६.४० ‖
संस्थास् तु समानविधानाः प्रकरणाविशेषात् ‖ सूत्र - ३.६.४१ ‖

व्यपदेशश् च तुल्यवत् ॥ सूत्र - ३.६.४२ ॥
विकासस् तु कामसंयोगे नित्यस्य समत्वात् ॥ सूत्र - ३.६.४३ ॥
अपि वा द्विरुक्तत्वात् प्रकृतेर् भविष्यन्तीति ॥ सूत्र - ३.६.४४ ॥
बचनात् तु समुच्चयः ॥ सूत्र - ३.६.४५ ॥
प्रतिषेधाच् च पूर्वलिङ्गनाम् ॥ सूत्र - ३.६.४६ ॥
गुणविशेषाद् एकस्य व्यपदेशः ॥ सूत्र - ३.६.४७ ॥

## Sub Chapter 07

प्रकरणविशेषाद् असंयुक्तं प्रधानस्य ॥ सूत्र - ३.७.१ ॥
सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात् ॥ सूत्र - ३.७.२ ॥
आरादपीति चेत् ॥ सूत्र - ३.७.३ ॥
न तद्वाक्यं हि तदर्थत्वात् ॥ सूत्र - ३.७.४ ॥
लिङ्गदर्शनाच् च ॥ सूत्र - ३.७.५ ॥
फलसंयोगात् तु स्वामियुक्तं प्रधानस्य ॥ सूत्र - ३.७.६ ॥
चिकीर्षयो च संयोगात् ॥ सूत्र - ३.७.७ ॥
तथाभिधानेन ॥ सूत्र - ३.७.८ ॥
तद्युक्ते तु फलश्रुतिस् तस्मात् सर्वचिकीर्षा स्यात् ॥ सूत्र - ३.७.९ ॥
गुणाभिधानात् सर्वार्थम् अभिधानम् ॥ सूत्र - ३.७.१० ॥
दीक्षादक्षिणं तु वचनात् प्रधानस्य ॥ सूत्र - ३.७.११ ॥
निवृत्तिदर्शनाच्च ॥ सूत्र - ३.७.१२ ॥
तथा यूपस्य वेदि ॥ सूत्र - ३.७.१३ ॥
देशमात्रं वा शिष्टेनैकवाक्यत्वात् ॥ सूत्र - ३.७.१४ ॥
सामधेनीस् तद् अन्वाहूर् इति हविर् द्धानयोर् वचनात् सामधेनीनाम् ॥ सूत्र - ३.७.१५ ॥
देशमात्रं वा प्रत्यक्षं ह्य् अर्थकर्म सोमस्य ॥ सूत्र - ३.७.२६ ॥
समाख्यानं च तद्वत् ॥ सूत्र - ३.७.१७ ॥
शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात् तस्मात् स्वयं प्रयोगे स्यात् ॥ सूत्र - ३.७.१८ ॥
उत्सर्गे तु प्रधानत्वाच् छेषकारी प्रधानस्य तस्माद् अन्यः स्वयं वा स्यात् ॥ सूत्र - ३.७.१९ ॥
अन्यो वा स्यात् परिक्रयाम्नानाद् विप्रतिषेधात् प्रत्यग् आत्मनि ॥ सूत्र - ३.७.२० ॥
तत्रार्थात् कर्तृपरिमाणं स्याद् अनियमो ऽविशेषात् ॥ सूत्र - ३.७.२१ ॥
अपि वा श्रुति भेदात् प्रतिनामधेयं स्युः ॥ सूत्र - ३.७.१२ ॥
एकस्य कर्मभेदाद् इति चेत् ॥ सूत्र - ३.७.१३ ॥
नोत्पत्तौ हि ॥ सूत्र - ३.७.१४ ॥
चमसाध्वर्यवश् च तैर् व्यपदेशात् ॥ सूत्र - ३.७.१५ ॥
उत्पत्तौ तु बहुश्रुतेः ॥ सूत्र - ३.७.१६ ॥
दशत्वं लिङ्गदर्शनात् ॥ सूत्र - ३.७.१७ ॥
शमिता च शब्दभेदात् ॥ सूत्र - ३.७.१८ ॥
प्रकरणाद् वोत्पत्त्यसंयोगात् ॥ सूत्र - ३.७.२९ ॥
उपगाश् च लिङ्गदर्शनात् ॥ सूत्र - ३.७.३० ॥
विक्रयी त्वन्यः कर्मणो ऽचोदित्वात् ॥ सूत्र - ३.७.३१ ॥
कर्मकार्यात् सर्वेषाम् ऋत्विक्त्वम् अविशेषात् ॥ सूत्र - ३.७.३२ ॥
न वा परिसंख्यानात् ॥ सूत्र - ३.७.३३ ॥
पक्षेणेति चेत् ॥ सूत्र - ३.७.३४ ॥
न सर्वेषाम् अधिकारः ॥ सूत्र - ३.७.३५ ॥
नियमस् तु दक्षिणाभिः श्रुतिसंयोगात् ॥ सूत्र - ३.७.३६ ॥
उक्त्वा च यजमानत्वं तेषां दीक्षाबिधानात् ॥ सूत्र - ३.७.३७ ॥
स्वामिसप्तदशाः कर्मसामान्यात् ॥ सूत्र - ३.७.३८ ॥
ते सर्वार्थाः प्रयुक्तत्वाद् अग्नयश् च स्वकालत्वात् ॥ सूत्र - ३.७.३९ ॥
तत्सयोगात् कर्मणो व्यवस्था स्यात् संयोगास्यार्थवत्वात् ॥ सूत्र - ३.७.४० ॥
तस्योपदेशसमाख्यानेन निर्देशः ॥ सूत्र - ३.७.४१ ॥
तद्वच् च लिङ्गदर्शम् ॥ सूत्र - ३.७.४२ ॥
प्रैषानुवचनं मैत्रावरुणस्योपदेशात् ॥ सूत्र - ३.७.४३ ॥
पुरो ऽनुवाक्याधिकारो वा प्रैषसन्निधानात् ॥ सूत्र - ३.७.४४ ॥
प्रातर् अनुवाके च होतृदर्शनात् ॥ सूत्र - ३.७.४५ ॥
चमसांश्चमसाध्वर्यवः सामाख्यानात् ॥ सूत्र - ३.७.४६ ॥
अध्वर्युर्वा तन्न्यायत्वात् ॥ सूत्र - ३.७.४७ ॥
चमसे चान्यदर्शनात् ॥ सूत्र - ३.७.४८ ॥
अशक्तौ ते प्रतीयेरन् ॥ सूत्र - ३.७.४९ ॥
वेदोपदेशात् पूर्ववद्वेदान्यत्वे यथोपदेशं स्युः ॥ सूत्र - ३.७.५० ॥
तद्गुणाद् वा स्वधर्मः स्याद् अधिकारसामथ्यात् सहाङ्गैर् अव्यक्तः शेषे ॥ सूत्र - ३.७.५१ ॥

## Sub Chapter 08

स्वामिकर्मपरिक्रयः कर्मणस् तदर्थत्वात् ॥ सूत्र - ३.८.१ ॥
वचनाद् इतरेषां स्यात् ॥ सूत्र - ३.८.२ ॥
संस्कारास् तु पुरुषसामर्थ्ये यथावेदं कर्मवदव्यवतिष्ठेरन् ॥ सूत्र - ३.८.३ ॥
याजमानास् तु तत्प्रधानत्वात् कर्मवत् ॥ सूत्र - ३.८.४ ॥
व्यपदेशाच् च ॥ सूत्र - ३.८.५ ॥
गुणत्वे तस्य निर्देशः ॥ सूत्र - ३.८.६ ॥
चोदना प्रति भावाच् च ॥ सूत्र - ३.८.७ ॥
अतुल्यत्वाद् असमानविधानाः स्युः ॥ सूत्र - ३.८.८ ॥
तपश् च फलसिद्धित्वाल् लोकवत् ॥ सूत्र - ३.८.९ ॥
वाक्यशेषश् च तद्वत् ॥ सूत्र - ३.८.१० ॥
वचनाद् इतरेषां स्यात् ॥ सूत्र - ३.८.११ ॥
गुणत्वाच् च वेदेन न व्यवस्था स्यात् ॥ सूत्र - ३.८.१२ ॥
तथा कामो ऽर्थसंयोगात् ॥ सूत्र - ३.८.१३ ॥
व्यपदेशाद् इतरेषां स्यात् ॥ सूत्र - ३.८.१४ ॥
मन्त्राश् चाकर्मकरणास् तद्वत् ॥ सूत्र - ३.८.१५ ॥
विप्रयोगे च दर्शनात् ॥ सूत्र - ३.८.१६ ॥
द्व्याम्नातेषूभौ द्व्याम्नानस्यार्थवत्त्वात् ॥ सूत्र - ३.८.१७ ॥
ज्ञाते च वाचनं न ह्य् अविद्वान् विहितो ऽस्ति ॥ सूत्र - ३.८.१८ ॥
याजमाने समाख्यानात् कर्माणि याजमानं स्युः ॥ सूत्र - ३.८.१९ ॥
अध्वर्युर् वा तदर्थो हि न्यायपूर्वे समाख्यानम् ॥ सूत्र - ३.८.२० ॥
विप्रतिषेधे करणः समावायविशेषाद् इतरम् अन्यस् तेषां यतो विशेषः स्यात् ॥ सूत्र - ३.८.२१ ॥
प्रैषेणु च पराधिकारात् ॥ सूत्र - ३.८.२२ ॥
अध्वर्युस् तु दर्शनात् ॥ सूत्र - ३.८.२३ ॥
गौणो वा कर्मसामान्यात् ॥ सूत्र - ३.८.२४ ॥
ऋत्विक् फलं करणेष्व् अर्थत्वात् ॥ सूत्र - ३.८.२५ ॥
स्वामिनो वा तदर्थत्वात् ॥ सूत्र - ३.८.२६ ॥
लिङ्गदर्शनाच् च ॥ सूत्र - ३.८.२७ ॥
कर्मार्थं फलं तेषां स्वामिनं प्रत्यर्थवत्त्वात् ॥ सूत्र - ३.८.२८ ॥ व्यपदेशाच् च ॥ सूत्र - ३.८.२९ ॥
द्रव्यसंस्कारः प्रकारणाविशेषात् सर्वकर्मणाम् ॥ सूत्र - ३.८.३० ॥
निर्देशात् तु विकृताव् अपूर्वस्यानधिकारः ॥ सूत्र - ३.८.३१ ॥
विरोधे च श्रुतिविशेषाद् अव्यक्तः शेषे ॥ सूत्र - ३.८.३२ ॥
अपनयस् त्व् एकदेशस्य विद्यमानसंयोगात् ॥ सूत्र - ३.८.३३ ॥
विकृतौ सर्वार्थः शेषः प्रकृतिवत् ॥ सूत्र - ३.८.३४ ॥
मुख्यार्थो वाङ्गस्याचोदितत्वात् ॥ सूत्र - ३.८.३५ ॥
सन्निधानाविशेषाद् असम्भवेद् अतदङ्गानाम् ॥ सूत्र - ३.८.३६ ॥
आधाने ऽपि तथेति चेत् ॥ सूत्र - ३.८.३७ ॥
नाप्रकरणत्वाद् अङ्गस्यातन्निमित्तत्वात् ॥ सूत्र - ३.८.३८ ॥

तत्काले वा लिङ्गदर्शनात् ‖ सूत्र - ३.८.३९ ‖
सर्वेषां वाविशेषात् ‖ सूत्र - ३.८.४० ‖
न्यायोक्ते लिङ्गदर्शनम् ‖ सूत्र - ३.८.४१ ‖
मांसं तु सवनीयानां चोदनाविशेषात् ‖ सूत्र - ३.८.४२ ‖
भक्तिर् असन्निधावन्याय्येति चेत् ‖ सूत्र - ३.८.४३ ‖
स्यात् प्रकृतिलिङ्गाद् वैराजवत् ‖ सूत्र - ३.८.४४ ‖

## Chapter 04

### Sub Chapter 01

अथातः क्रत्वर्थपुरुषार्थयोर् जिज्ञासा ‖ सूत्र - ४.१.१ ‖
यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्सार्थलक्षणाविभक्तत्वात् ‖ सूत्र - ४.१.२ ‖
तदुत्सर्गे कर्माणि पुरुषार्थाय शास्त्रस्यानतिशङ्क्यत्वान् न च द्रव्यं चिकीर्ष्यते तेनार्थेनाभिसम्बन्धात् क्रियायां पुरुषश्रुतिः ‖ सूत्र - ४.१.३ ‖
अविशेषात् तु शास्त्रस्य यथाश्रुति फलानि स्युः ‖ सूत्र - ४.१.४ ‖
अपि वा कारणाग्रहणे तदर्थम् अर्थस्यानभिसम्बन्धात् ‖ सूत्र - ४.१.५ ‖
तथा च लोकभूतेषु ‖ सूत्र - ४.१.६ ‖
द्रव्याणि त्व् अविशेषेणानर्थक्यात् प्रदीयेरन् ‖ सूत्र - ४.१.७ ‖
स्वेन त्वर्थे न सम्बन्धो द्रव्याणां पृथगर्थत्वात् तस्माद् यथाश्रुति स्युः ‖ सूत्र - ४.१.८ ‖
चोद्यन्ते चार्थकर्मसु ‖ सूत्र - ४.१.९ ‖
लिङ्गदर्शनाच् च ‖ सूत्र - ४.१.१० ‖
तत्रैकत्वमयज्ञाङ्गम् अर्थस्य गुणभूतत्वात् ‖ सूत्र - ४.१.११ ‖
एकश्रुतित्वाच् च ‖ सूत्र - ४.१.१२ ‖
प्रतीयते इति चेत् ‖ सूत्र - ४.१.१३ ‖
नाशब्दं तत्प्रमाणत्वात् पूर्ववत् ‖ सूत्र - ४.१.१४ ‖
शब्दवत् तूपलभ्यते तदागमे हि तद्दृश्यते तस्य ज्ञानं हि यथान्येषाम् ‖ सूत्र - ४.१.१५ ‖
तद्वच् च लिङ्गदर्शनम् ‖ सूत्र - ४.१.१६ ‖
तथा च लिङ्गम् ‖ सूत्र - ४.१.१७ ‖
आश्रयिष्व् अविशेषेण भावो ऽर्थः प्रतीयेत ‖ सूत्र - ४.१.१८ ‖
चोदनायां त्व् अनारम्भो ऽविभक्तत्वान् न ह्य् अन्येन विधीयते ‖ सूत्र - ४.१.१९ ‖
स्याद् वा द्रव्यचिकीर्षायां भावो ऽर्थे च गुणभूतताश्रयाद् धि गुणीभावः ‖ सूत्र - ४.१.२० ‖
अर्थे समवैषम्यतो द्रव्यकर्मणाम् ‖ सूत्र - ४.१.२१ ‖
एकनिष्पत्तेः सर्वे समं स्यात् ‖ सूत्र - ४.१.२२ ‖
संसर्गरसनिश्पत्तेरामिक्षा वा प्रधानं स्यात् ‖ सूत्र - ४.१.२३ ‖
मुख्यशब्दाभिसंस्तवाच् च ‖ सूत्र - ४.१.२४ ‖
पदकर्माप्रयोजकं नयनस्य परार्थत्वात् ‖ सूत्र - ४.१.२५ ‖
अर्थाभिधानकर्म च भविष्यता संयोगस्य तन्निमित्तत्वात् तदर्थो हि विधीयते ‖ सूत्र - ४.१.२६ ‖
पशाव् अनालम्भाल् लोहितशकृतोर् अकर्मत्वम् ‖ सूत्र - ४.१.२७ ‖
एकदेशद्रव्यश् चोत्पत्तौ वद्यमानसंयोगात् ‖ सूत्र - ४.१.२८ ‖
निर्देशात् तस्यान्यद् अर्थाद् इति चेत् ‖ सूत्र - ४.१.२९ ‖
न शेषसन्निधानात् ‖ सूत्र - ४.१.३० ‖
कर्मकार्यात् ‖ सूत्र - ४.१.३१ ‖
लिङ्गदर्शनाच् च ‖ सूत्र - ४.१.३२ ‖
अभिघारणे विप्रकर्षाद् अनूयाजवत् पात्रभेदः स्यात् ‖ सूत्र - ४.१.३३ ‖
न वा पात्रत्वाद् अपात्रत्वं त्व् एकदेशत्वात् ‖ सूत्र - ४.१.३४ ‖
हेतुत्वाच् च सहप्रयोगस्य ‖ सूत्र - ४.१.३५ ‖
अभावदर्शनाच् च ‖ सूत्र - ४.१.३६ ‖
सति सव्यवचनम् ‖ सूत्र - ४.१.३७ ‖
न तस्येति चेत् ‖ सूत्र - ४.१.३८ ‖
स्यात् तस्य मुख्यत्वात् ‖ सूत्र - ४.१.३९ ‖
समानयनं तु मुख्यं स्याल् लिङ्गदर्शनात् ‖ सूत्र - ४.१.४० ‖
वचने हि हेत्वसामर्थ्यम् ‖ सूत्र - ४.१.४१ ‖
तत्रोत्पत्तिर् अविभक्ता स्यात् ‖ सूत्र - ४.१.४२ ‖
तत्र जौहवम् अनूयाजप्रतिषेधार्थम् ‖ सूत्र - ४.१.४३ ‖
औपभृतं तथेति चेत् ‖ सूत्र - ४.१.४४ ‖
स्याज् जुहूप्रतिषेधान् नित्यानुवादः ‖ सूत्र - ४.१.४५ ‖
तदष्टसङ्ख्यं श्रवणात् ‖ सूत्र - ४.१.४६ ‖
अनुग्रहाच् च जौहवस्य ‖ सूत्र - ४.१.४७ ‖
द्वयोस् तु हेतुसामर्थयं श्रवणं च समानयने ‖ सूत्र - ४.१.४८ ‖

### Sub Chapter 02

स्वरुस् त्व् अनेकनिष्पत्तिः स्वकर्मशब्दत्वात् ‖ सूत्र - ४.२.१ ‖
जात्यन्तराच् च शङ्कते ‖ सूत्र - ४.२.२ ‖
तदेकदेशो वा स्वरुत्वस्य तन्निमित्तत्वात् ‖ सूत्र - ४.२.३ ‖
शकलश्रुतेश् च ‖ सूत्र - ४.२.४ ‖
प्रतियूपं च दर्शनात् ‖ सूत्र - ४.२.५ ‖
आदाने करोतिशब्दः ‖ सूत्र - ४.२.६ ‖
शाखायां तत्प्रधानत्वात् ‖ सूत्र - ४.२.७ ‖
शाखायां तत्प्रधानत्वाद् उपवेषेण विभागः स्याद् वैषम्यं तत् ‖ सूत्र - ४.२.८ ‖
श्रुत्यपायाच् च ‖ सूत्र - ४.२.९ ‖
हरणे तु जुहोतिर् योगसामान्याद् द्रव्याणां चार्थशेषत्वात् ‖ सूत्र - ४.२.१० ‖
प्रतिपत्तिर् वा शब्दस्य तत्प्रधानत्वात् ‖ सूत्र - ४.२.११ ‖
अर्थे ऽपि चेत् ‖ सूत्र - ४.२.१२ ‖
न तस्यानधिकाराद् अर्थस्य च कृतत्वात् ‖ सूत्र - ४.२.१३ ‖
उत्पत्त्यसंयोगात् प्रणीतानाम् आज्यवद् विभागः स्यात् ‖ सूत्र - ४.२.१४ ‖
संयवनार्थानां वा प्रतिपत्तिर् इतरासां तत्प्रधानत्वात् ‖ सूत्र - ४.२.१५ ‖
प्रासनवन् मैत्रावरुणस्य दण्डप्रदानं कृतार्थत्वात् ‖ सूत्र - ४.२.१६ ‖
अर्थकर्म वा कर्तृसंयोगात् स्रग्वत् ‖ सूत्र - ४.२.१७ ‖
कर्मयुक्ते च दर्शनात् ‖ सूत्र - ४.२.१८ ‖
उत्पत्तौ येन संयुक्तं तदर्थं तच्छ्रुतिहेतुत्वात् तस्यार्थान्तरगमने शेषत्वात् प्रतिपत्तिः स्यात् ‖ सूत्र - ४.२.१९ ‖
सौमिके च कृतार्थत्वात् ‖ सूत्र - ४.२.२० ‖
अर्थकर्म वाभिधानसंयोगात् ‖ सूत्र - ४.२.२१ ‖
प्रतिपत्तिर् वा तन्न्यायत्वाद् देशार्थावभृथश्रुतिः ‖ सूत्र - ४.२.२२ ‖
कर्तृदेशकालानाम् अचोदनं प्रयोगे नित्यसमवायात् ‖ सूत्र - ४.२.२३ ‖
नियमार्था वा श्रुतिः ‖ सूत्र - ४.२.२४ ‖
तथा द्रव्येषु गुणश्रुतिर् उत्पत्तिसंयोगात् ‖ सूत्र - ४.२.१५ ‖
संस्कारे च तत्प्रधानत्वात् ‖ सूत्र - ४.२.२६ ‖
यजति चोदनाद्रव्यदेवताक्रियं समुदाये कृतार्थत्वात् ‖ सूत्र - ४.२.२७ ‖
तदुक्ते श्रवणाज् जुहोतिर् आसेचनाधिकः स्यात् ‖ सूत्र - ४.२.२८ ‖
विधेः कर्मापवर्गित्वाद् अर्थान्तरे विधिप्रदेशः स्यात् ‖ सूत्र - ४.२.२९ ‖
अपि वोत्पत्तिसंयोगाद् अर्थसम्बन्धो ऽविशिष्टानां प्रयोगैकत्वहेतुः स्यात् ‖ सूत्र - ४.२.३० ‖

### Sub Chapter 03

द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिर् अर्थवादः स्यात् ‖ सूत्र - ४.३.१ ‖
उत्पत्तेश् चातत्प्रधानत्वात् ‖ सूत्र - ४.३.२ ‖
फलं तु तत्प्रधानायाम् ‖ सूत्र - ४.३.३ ‖
नैमित्तिके विकारत्वात् क्रतुप्रधानम् अन्यत् स्यात् ‖ सूत्र - ४.३.४ ‖
एकस्य तूभयत्वे संयोगपृथक्त्वम् ‖ सूत्र - ४.३.५ ‖
शेष इति चेत् ‖ सूत्र - ४.३.६ ‖
नार्थपृथक्त्वात् ‖ सूत्र - ४.३.७ ‖

द्रव्याणान्तु क्रियार्थानां संस्कारः क्रतुधर्मस्यात् ‖ सूत्र - ४.३.८ ‖
पृथक्त्वाद्व्यवतिष्ठेत ‖ सूत्र - ४.३.९ ‖
चोदनायां फलाश्रुतेः कर्ममात्रं विधीयेत न ह्य् अशब्दं प्रतीयते ‖ सूत्र - ४.३.१० ‖
अपि वाम्नानसामथर्थ्याच् चोदनार्थेन गम्येतार्थानां ह्य् अर्थत्वेन वचनानि प्रतीयन्ते ऽर्थतोप्य् असमर्थानाम् आनन्तर्ये ऽप्य्
असम्बन्धस् तस्माच् छ्रुत्येकदेशः सः ‖ सूत्र - ४.३.११ ‖
वाक्यार्थश् च गुणार्थवत् ‖ सूत्र - ४.३.१२ ‖
तत्सर्वार्थम् अनादेशात् ‖ सूत्र - ४.३.१३ ‖
एकं वा चोदनैकत्वात् ‖ सूत्र - ४.३.१४ ‖
स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वात् ‖ सूत्र - ४.३.१५ ‖
प्रत्ययाच् च ‖ सूत्र - ४.३.१६ ‖
क्रतौ फलार्थवादमङ्गवत् कार्ष्णाजिनिः ‖ सूत्र - ४.३.१७ ‖
फलमात्रेयो निर्देशाद् अश्रुतौ ह्य् अनुमानं स्यात् ‖ सूत्र - ४.३.१८ ‖
अङ्गेषु स्तुतिः परार्थत्वात् ‖ सूत्र - ४.३.१९ ‖
काम्ये कर्मणि नित्यः स्वर्गे यथा यज्ञाङ्गे क्रत्वर्थः ‖ सूत्र - ४.३.२० ‖
वीते च कारणे नियमात् ‖ सूत्र - ४.३.२१ ‖
कामो वा तत्संयोगेन चोद्यते ‖ सूत्र - ४.३.२२ ‖
अङ्गेषु स्तुतिः परार्थत्वात् ‖ सूत्र - ४.३.२३ ‖
वीते च नियमस् तदर्थम् ‖ सूत्र - ४.३.२४ ‖
सर्वकाम्यम् अङ्गकामैः प्रकरणात् ‖ सूत्र - ४.३.२५ ‖
फलोपदेशो वा प्रधानशब्दसंयोगात् ‖ सूत्र - ४.३.२६ ‖
तत्र सर्वे ऽविशेषात् ‖ सूत्र - ४.३.२७ ‖
योगसिद्धिर् वार्थस्योत्पत्यसंयोगित्वात् ‖ सूत्र - ४.३.२८ ‖
समवाये चोदनासंयोगस्यार्थवत्वात् ‖ सूत्र - ४.३.२९ ‖
कालश्रुतौ काल इति चेत् ‖ सूत्र - ४.३.३० ‖
नासमवायात्प्रयोजनेन ‖ सूत्र - ४.३.३१ ‖
उभयार्थाम् इति चेत् ‖ सूत्र - ४.३.३२ ‖
न शब्दैकत्वात् ‖ सूत्र - ४.३.३३ ‖
प्रकरणाद् इति चेत् ‖ सूत्र - ४.३.३४ ‖
नोत्पत्तिसंयोगात् ‖ सूत्र - ४.३.३५ ‖
अनुत्पत्तौ तु कालः स्यात् प्रयोजनेन सम्बन्धात् ‖ सूत्र - ४.३.३६ ‖ उतपत्तिकालविशये कालः स्याद् वाक्यस्य तत्प्रधानत्वात् ‖
सूत्र - ४.३.३७ ‖
फलसंयोगस् त्व् अचोदिते न स्याद् अशेषभूतत्वात् ‖ सूत्र - ४.३.३८ ‖
अङ्गानां तूपघातसंयोगो निमित्तार्थः ‖ सूत्र - ४.३.३९ ‖
प्रधानेनाभिसंयोगाद् अङ्गानां मुख्यकालत्वम् ‖ सूत्र - ४.३.४० ‖
अपवृत्ते तु चोदना तत्सामान्यात् स्वकाले स्यात् ‖ सूत्र - ४.३.४१ ‖

### Sub Chapter 04

प्रकरणाविभागे च विप्रतिषिद्धं ह्य् उभयम् ‖ सूत्र - ४.४.१ ‖
अपि वाङ्गमनिज्याः स्युस् ततो विशिष्टत्वात् ‖ सूत्र - ४.४.२ ‖
मध्यस्थं यस्य तन्मध्ये ‖ सूत्र - ४.४.३ ‖
सर्वासां वा समत्वाच् चोदनातः स्यान् न हि तस्य प्रकरणं देशार्थम् उच्यते मध्ये ‖ सूत्र - ४.४.४ ‖
प्रकरणाविभागे च विप्रतिषिद्धं ह्य् उभयम् ‖ सूत्र - ४.४.५ ‖
अपि वा कालमात्रं स्याद् अदर्शनाद् विशेशस्य ‖ सूत्र - ४.४.६ ‖
फलवद् वोक्तहेतुत्वाद् इतरस्य प्रधानं स्यात् ‖ सूत्र - ४.४.७ ‖
दधिग्रहो नैमित्तिकः श्रुतिसंयोगात् ‖ सूत्र - ४.४.८ ‖
नित्यश् च ज्येष्ठशब्दात् ‖ सूत्र - ४.४.९ ‖
सार्वरूप्याच् च ‖ सूत्र - ४.४.१० ‖
नित्यो वा स्याद् अर्थवादस्तयोः कर्मण्य् असम्बन्धाद् भङ्गित्वाच् चान्तरायस्य ‖ सूत्र - ४.४.११ ‖
वैश्वानरश् च नित्यः स्यान् नित्यैः समानसङ्ख्यत्वात् ‖ सूत्र - ४.४.१२ ‖
पक्षे वोत्पन्नसंयोगात् ‖ सूत्र - ४.४.१३ ‖
षट्चितिः पूर्ववत्त्वात् ‖ सूत्र - ४.४.१४ ‖
ताभिश् च तुल्यसंख्यानात् ‖ सूत्र - ४.४.१५ ‖
अर्थवादोपपत्तेश् च ‖ सूत्र - ४.४.१६ ‖
एकचितिर् वा स्याद् अपवृक्ते हि चोद्यते निमित्तेन ‖ सूत्र - ४.४.१७ ‖
विप्रतिषेधात् ताभिः समानसङ्ख्यत्वम् ‖ सूत्र - ४.४.१८ ‖
पितृयज्ञः स्वकालत्वाद् अनङ्गं स्यात् ‖ सूत्र - ४.४.१९ ‖
तुल्यवच् च प्रसङ्ख्यानात् ‖ सूत्र - ४.४.२० ‖
प्रतिषिद्धे च दर्शनात् ‖ सूत्र - ४.४.२१ ‖
पश्वङ्ग रशमा स्यात् तदागमे विधानात् ‖ सूत्र - ४.४.२२ ‖
यूपाङ्गं वा तत्संस्कारात् ‖ सूत्र - ४.४.२३ ‖
अर्थवादश् च तदर्थवत् ‖ सूत्र - ४.४.२४ ‖
स्वरुश्चाप्य् एकदेशत्वात् ‖ सूत्र - ४.४.२५ ‖
निष्क्रयश् च तदङ्गवत् ‖ सूत्र - ४.४.२६ ‖
पश्वङ्गं वार्थकर्मत्वात् ‖ सूत्र - ४.४.२७ ‖
भक्त्या निष्क्रयवादः स्यात् ‖ सूत्र - ४.४.२८ ‖
दर्शपूर्णमासयोर् इज्याः प्रधानान्य् अविशेषात् ‖ सूत्र - ४.४.२९ ‖
अपि वाङ्गानि कानि चिद्येश्वङ्गत्वेन संस्तुतिः सामान्यो ह्य् अभिसंस्तवः ‖ सूत्र - ४.४.३० ‖
तथा चान्यार्थदर्शनम् ‖ सूत्र - ४.४.३१ ‖
अवशिष्टं तु कारणं प्रधानेषु गुणस्य विद्यमानत्वात् ‖ सूत्र - ४.४.३२ ‖
नानुक्ते ऽन्यार्थदर्शनं परार्थत्वात् ‖ सूत्र - ४.४.३३ ‖
पृथवत्वे त्व् अभिधानयोर् निवेशः श्रुतितो व्यपदेशाच् च तत्पुनर्मुख्यलक्षणं यत्फलवत्वं तत्सन्निधाव् असंयुक्तं
तदङ्गंस्याद्भागित्वात् कारणस्याश्रुतश् चान्यसम्बन्धः ‖ सूत्र - ४.४.३४ ‖
गुणाश् च नामसंयुक्ता विधीयन्ते नाङ्गेषूपपद्यन्ते ‖ सूत्र - ४.४.३५ ‖
तुल्या च कारणश्रुतिर् अन्यैर् अङ्गाङ्गिसम्बन्धः ‖ सूत्र - ४.४.३६ ‖
उत्पत्ताव् अभिसम्बन्धस् तस्माद् अङ्गोपदेशः स्यात् ‖ सूत्र - ४.४.३७ ‖
तथा चान्यार्थदर्शनम् ‖ सूत्र - ४.४.३८ ‖
ज्योतिष्टोमे तुल्यान्य् अविशिष्टं हि कारणम् ‖ सूत्र - ४.४.३९ ‖
गुणानां तूत्पत्तिवाक्येन सम्बन्धात् कारणश्रुतिस् तस्मात् सोमः प्रधानं स्यात् ‖ सूत्र - ४.४.४० ‖
तथा चान्यार्थदर्शनम् ‖ सूत्र - ४.४.४१ ‖

## Chapter 05

### Sub Chapter 01

श्रुतिलक्षणम् आनुपूर्व्यं तत्प्रमाणत्वात् ‖ सूत्र - ५.१.१ ‖
अर्थाच् च ‖ सूत्र - ५.१.२ ‖
अनियमो ऽन्यत्र ‖ सूत्र - ५.१.३ ‖
क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात् ‖ सूत्र - ५.१.४ ‖
अशाब्द इति चेत् स्याद् वाक्यशब्दत्वात् ‖ सूत्र - ५.१.५ ‖

अर्थकृते वानुमानं स्यात् क्रत्वेकत्वे परार्थत्वात् स्वेन त्व् अर्थेन सम्बन्धस् तस्मात् स्वशब्दम् उच्येत ‖ सूत्र - ५.१.६ ‖
तथा चान्यार्थदर्शनम् ‖ सूत्र - ५.१.७ ‖
प्रवृत्या तुल्यकालानां गुणानां तदुपक्रमात् ‖ सूत्र - ५.१.८ ‖
सर्वम् इति चेत् ‖ सूत्र - ५.१.९ ‖
नाकृतत्वात् ‖ सूत्र - ५.१.१० ‖
क्रत्वन्तरवद् इति चेत् ‖ सूत्र - ५.१.११ ‖
नासमवायात् ‖ सूत्र - ५.१.१२ ‖
स्थानाच् चोत्पत्तिसंयोगात् ‖ सूत्र - ५.१.१३ ‖
मुख्यक्रमेण वाङ्गानां तदर्थत्वात् ‖ सूत्र - ५.१.१४ ‖
प्रकृतौ तु स्वशब्दत्वाद्याक्रमं प्रतीयेत ‖ सूत्र - ५.१.१५ ‖

मन्त्रतस् तु विरोधे स्यात् प्रयोगरूपसामर्थ्यात् तस्माद् उत्पत्तिदेशः सः ॥ सूत्र - ५.१.१६ ॥
तद्वचनाद् विकृतौ यथा प्रधानं स्यात् ॥ सूत्र - ५.१.१७ ॥
विप्रतिपत्तौ वा प्रकृत्यन्वयाद् यथाप्रकृति ॥ सूत्र - ५.१.१८ ॥
विकृतिः प्रकृतिधर्मत्वात् तत्काला स्याद् यथा शिष्टम् ॥ सूत्र - ५.१.१९ ॥
अपि वा क्रमकालसंयुक्ता सद्यः क्रियेत तत्र विधेर् अनुमानात् प्रकृतिधर्मलोपः स्यात् ॥ सूत्र - ५.१.२० ॥
कालोत्कर्ष इति चेत् ॥ सूत्र - ५.१.२१ ॥
न तत्सम्बन्धात् ॥ सूत्र - ५.१.२२ ॥
अङ्गानां मुख्यकालत्वाद् यथोक्तम् उत्कर्षे स्यात् ॥ सूत्र - ५.१.२३ ॥
तदादि वाभिसम्बन्धात् तदन्तम् अपकर्षे स्यात् ॥ सूत्र - ५.१.२४ ॥
प्रवृत्या कृतकालानाम् ॥ सूत्र - ५.१.२५ ॥
शब्दविप्रतिषेधाच् च ॥ सूत्र - ५.१.२६ ॥
असंयोगात् तु वैकृतं तद् एव प्रतिकृष्येत. मिमांसा-५.१.२७ ॥
प्रासङ्गिकं च नोत्कर्षेद् असंयोगात् ॥ सूत्र - ५.१.२८ ॥
तथापूर्वम् ॥ सूत्र - ५.१.२९ ॥
सान्तपनीया तूत्कर्षेद् अग्निहोत्रं सवनवद् वैगुण्यात् ॥ सूत्र - ५.१.३० ॥
अन्यवायाच् च मिमांसा-५.१.३१ ॥
असम्बन्धात् तु नोत्कर्षेत् ॥ सूत्र - ५.१.३२ ॥
प्रापणाच् च निमित्तस्य ॥ सूत्र - ५.१.३३ ॥
सम्बन्धात् सवनोत्कर्मः ॥ सूत्र - ५.१.३४ ॥
षोडशी चोक्थ्यसंयोगात् ॥ सूत्र - ५.१.३५ ॥

## Sub Chapter 02

सन्निपाते प्राधानानाम् एकैकस्य गुणानां सर्वकर्म स्यात् ॥ सूत्र - ५.२.१ ॥
सर्वेषां वैकजातीयं कृतानुपूर्व्यत्वात् ॥ सूत्र - ५.२.२ ॥
कारणाद् अभ्यावृत्तिः ॥ सूत्र - ५.२.३ ॥
मुष्टिकपालावदानाञ्जनाभ्यञ्जनवपनपावनेषु चैकेन ॥ सूत्र - ५.२.४ ॥
सर्वाणि त्व् एककार्यत्वादेषां तद्गुणत्वात् ॥ सूत्र - ५.२.५ ॥
संयुक्ते तु प्रक्रमात् तदङ्गं स्याद् इतरस्य तदर्थत्वात् ॥ सूत्र - ५.२.६ ॥
वचनात् तु परिव्याणान्तम् अञ्जनादिः स्यात् ॥ सूत्र - ५.२.७ ॥
कारणाद्वा(न) वसर्गः स्याद् यथा पात्रवृद्धिः ॥ सूत्र - ५.२.८ ॥
न वा शब्दकृतत्वान् न्यायमात्रमितरदर्थात् पात्रविवृद्धिः ॥ सूत्र - ५.२.९ ॥
पशुगणे तस्यतस्यापवर्जयेत् पश्वैकत्वात् ॥ सूत्र - ५.२.१० ॥
दैवतैर् वैककर्म्यात् ॥ सूत्र - ५.२.११ ॥
मन्त्रस्य चार्थवत्त्वात् ॥ सूत्र - ५.२.१२ ॥
नानाबीजेष्वेकमुलूखलं विभवात् ॥ सूत्र - ५.२.१३ ॥
विवृद्धिर् वा नियामादानुपूर्व्यस्य तदर्थत्वात् ॥ सूत्र - ५.२.१४ ॥
एकं वा तण्डुलभावाद् धन्तेस् तदर्थत्वात् ॥ सूत्र - ५.२.१५ ॥
विकारे त्व् अनूयाजानां पात्रभेदो ऽर्थभेदात् स्यात् ॥ सूत्र - ५.२.१६ ॥
प्रकृतेः पूर्वोक्तत्वाद् अपूर्वम् अन्ते स्यान् न ह्य् अचोदितस्य शेषाम्नानम् ॥ सूत्र - ५.२.१७ ॥
मुख्यानन्तर्यमात्रेयस् तेन तुल्यश्रुतित्वाद् अशब्दत्वात् प्राकृतानां व्यवायः स्यात् ॥ सूत्र - ५.२.१८ ॥
अन्ते तु बादरायणस् तेषां प्रधानशब्दत्वात् ॥ सूत्र - ५.२.१९ ॥
तथा चान्यार्थदर्शनम् ॥ सूत्र - ५.२.२० ॥
कृतदेशात् तु पूर्वेषां स देशः स्यात् तेन प्रत्यक्षसंयोगान् नयायमात्रमितरत् ॥ सूत्र - ५.२.२१ ॥
प्रकृताच् च पुरस्ताद् यत् ॥ सूत्र - ५.२.२२ ॥
सन्निपातश् चेद् यथोक्तमन्ते स्यात् ॥ सूत्र - ५.२.२३ ॥

## Sub Chapter 03

विवृद्धिः कर्मभेदात् पृषदाज्यवत् तस्यतस्योपदिश्येत ॥ सूत्र - ५.३.१ ॥
अपि वा सर्वसङ्ख्यत्वाद् विकारः प्रतीयेत ॥ सूत्र - ५.३.२ ॥
स्वस्थानात् तु विवृध्येरन् कृतानुपूर्व्यत्वात् ॥ सूत्र - ५.३.३ ॥
समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्याः स्युर् द्यावापृथिव्योरन्तरालं समर्हणात् ॥ सूत्र - ५.३.४ ॥
तच्छब्दो वा ॥ सूत्र - ५.३.५ ॥
उष्णिक्ककुभोरन्ते दर्शनात् ॥ सूत्र - ५.३.६ ॥
स्तोमविवृद्धौ वहिष्पवमाने पुरस्तात् पर्यासाद् आगन्तवः स्युस् तथा हि दृष्टं द्वादशाहे ॥ सूत्र - ५.३.७ ॥
पर्यास इति चान्ताख्या ॥ सूत्र - ५.३.८ ॥
अन्ते वा तदुक्तम् ॥ सूत्र - ५.३.९ ॥
वचनात् तु द्वादशाहे ॥ सूत्र - ५.३.१० ॥
अतद्विकारश् च ॥ सूत्र - ५.३.११ ॥
तद्विकारे ऽप्य् अपूर्वत्वात् ॥ सूत्र - ५.३.१२ ॥
अन्ते तूत्तरयोर् दध्यात् ॥ सूत्र - ५.३.१३ ॥
अपि वा गायत्रीबृहत्यनुष्टुप्सु वचनात् ॥ सूत्र - ५.३.१४ ॥
ग्रहेष्टकम् औपानुवाक्यं सवनचितिशेषः स्यात् ॥ सूत्र - ५.३.१५ ॥
क्रत्वग्निशेषा वा चोदितत्वाद् अचोदनानुपूर्वस्य ॥ सूत्र - ५.३.१६ ॥
अन्ते स्युर् अव्यवायात् ॥ सूत्र - ५.३.१७ ॥
लिङ्गदर्शनाच् च ॥ सूत्र - ५.३.१८ ॥
मध्यमायां तु वचनाद् ब्राह्मणवत्यः ॥ सूत्र - ५.३.१९ ॥
प्राग्लोकम्पृणायास् तस्याः सम्पूरणार्थत्वात् ॥ सूत्र - ५.३.२० ॥
संस्कृते कर्म संस्काराणां तदर्थत्वात् ॥ सूत्र - ५.३.२१ ॥
अनन्तरं व्रतं तद्भूतत्वात् ॥ सूत्र - ५.३.२२ ॥
पूर्वं च लिङ्गदर्शनात् ॥ सूत्र - ५.३.२३ ॥ अर्थवादो वार्थस्य विद्यमानत्वात् ॥ सूत्र - ५.३.२४ ॥
न्यायविप्रतिषेधाच् च ॥ सूत्र - ५.३.२५ ॥
सञ्चिते त्व् अग्निचिद् युक्तं प्रापणान् निमित्तस्य ॥ सूत्र - ५.३.२६ ॥
क्रत्वन्ते वा प्रयोगवचनाभावात् ॥ सूत्र - ५.३.२७ ॥
अग्नेः कर्मत्वनिर्देशात् ॥ सूत्र - ५.३.२८ ॥
परेणावेदनाद् दीक्षितः स्यात् सर्वैर् दीक्षाभिसम्बन्धात् ॥ सूत्र - ५.३.२९ ॥
इष्ट्यन्ते वा तदर्था ह्य् अविशेषार्थसन्वन्धात् ॥ सूत्र - ५.३.३० ॥
समाख्यानं च तद्वत् ॥ सूत्र - ५.३.३१ ॥
अङ्गवत् क्रतूनाम् आनुपूर्व्यम् ॥ सूत्र - ५.३.३२ ॥
न वासम्बन्धात् ॥ सूत्र - ५.३.३३ ॥
काम्यत्वाच् च ॥ सूत्र - ५.३.३४ ॥
आनर्थक्यान् नेति चेत् ॥ सूत्र - ५.३.३५ ॥
स्याद् विद्यार्थत्वाद् यथा परेषु सर्वस्वारात् ॥ सूत्र - ५.३.३६ ॥
य एतेनेत्य् अग्निष्टोमः प्रकरणात् ॥ सूत्र - ५.३.३७ ॥
लिङ्गाच् च ॥ सूत्र - ५.३.३८ ॥
अथान्येनेति संस्थानां सन्निधानात् ॥ सूत्र - ५.३.३९ ॥
तत्प्रकृतेर् वापत्तिविहारौ न तुल्येषूपपद्यते ॥ सूत्र - ५.३.४० ॥
प्रशसा च विहरणाभावात् ॥ सूत्र - ५.३.४१ ॥
विधिप्रत्ययाद् वा न ह्य् अकस्मात् प्रशंसा स्यात् ॥ सूत्र - ५.३.४२ ॥
एकस्तोमे वा क्रतुसंयोगात् ॥ सूत्र - ५.३.४३ ॥
सर्वेषां वा चोदनाविशेषात् प्रशंसा स्तोमानाम् ॥ सूत्र - ५.३.४४ ॥

## Sub Chapter 04

क्रमकोयो ऽर्थशब्दाभ्यां श्रुतिविशेषाद् अर्थपरत्वाच् च ॥ सूत्र - ५.४.१ ॥
अवदानाभिघारणासादनेष्व् आनुपूर्व्यं प्रवृत्या स्यात् ॥ सूत्र - ५.४.२ ॥
यथारप्रदानं वा तदर्थत्वात् ॥ सूत्र - ५.४.३ ॥
लिङ्गदर्शनाच् च ॥ सूत्र - ५.४.४ ॥
वचनाद् इष्टिपूर्वत्वम् ॥ सूत्र - ५.४.५ ॥
सोमश् चैकेषाम् अग्नयाधेयस्यर्तुनक्षत्रातिक्रमवचनात् तदन्तेनानर्थकं हि स्यात् ॥ सूत्र - ५.४.६ ॥
तदर्थवचनाच् च नाविशेषात् तदर्थत्वं ॥ सूत्र - ५.४.७ ॥

अयक्ष्यमाणस्य च पवमानहविषां कालनिर्देशाद् आनन्तर्याद् विशङ्का स्यात् ॥ सूत्र - ५.४.८ ॥
इष्टिर् अयक्ष्यमाणस्य तदर्थ्ये न सोमपूर्वत्वम् ॥ सूत्र - ५.४.९ ॥
उत्कर्षाद् ब्राह्मणस्य सोमः स्यात् ॥ सूत्र - ५.४.१० ॥
पौर्णमासी वा श्रुतिसंयोगात् ॥ सूत्र - ५.४.११ ॥
सर्वस्य वैककर्म्यात् ॥ सूत्र - ५.४.१२ ॥
स्याद् वा विधिस् तदर्थेन ॥ सूत्र - ५.४.१३ ॥
प्रकरणात् तु कालः स्यात् ॥ सूत्र - ५.४.१४ ॥
स्वकाले स्याद् अविप्रतिषेधात् ॥ सूत्र - ५.४.१५ ॥
अपनयो वाधानस्य सर्वकालत्वात् ॥ सूत्र - ५.४.१६ ॥
पौर्णमास्य् ऊर्ध्वं सोमाद् ब्राह्मणस्य वचनात् ॥ सूत्र - ५.४.१७ ॥
एकं वा शब्दसामर्थ्यात् प्राक् कृत्स्नविधानम् ॥ सूत्र - ५.४.१८ ॥
पुरोडाशस् त्व् अनिर्देशे तद्युक्ते देवताभावात् ॥ सूत्र - ५.४.१९ ॥
आज्यमपीति चेत् ॥ सूत्र - ५.४.२० ॥
न मिश्रदेवतत्वाद् ऐन्द्राग्नवत् ॥ सूत्र - ५.४.२१ ॥
विकृतेः प्रकृतिकालत्वात् सद्यस्कालोत्तरा विकृतिस् तयोः प्रत्यक्षशिष्टत्वात् ॥ सूत्र - ५.४.२२ ॥
द्वैयहकाल्ये तु यथान्यायम् ॥ सूत्र - ५.४.२३ ॥
वचनाद् वैककाल्यं स्यात् ॥ सूत्र - ५.४.२४ ॥
सन्नाय्याग्नीषोमीयविकारा ऊर्ध्वं सोमात्प्रकृतिवत् ॥ सूत्र - ५.४.२५ ॥
तथा सोमविकारा दर्शपूर्णमासाभ्याम् ॥ सूत्र - ५.४.२६ ॥

## Chapter 06

### Sub Chapter 01

द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः ॥ सूत्र - ६.१.१ ॥
असाधकं तु तादर्थ्यात् ॥ सूत्र - ६.१.२ ॥
प्रत्यर्थं चाभिसंयोगात्कर्मतो ह्य् अभिसम्बन्धस् तस्मात् कर्मोपदेशः स्यात् ॥ सूत्र - ६.१.३ ॥
फलार्थत्वात् कर्मणः शास्त्रं सर्वाधिकारं स्यात् ॥ सूत्र - ६.१.४ ॥
कर्तुर् वा श्रुतिसंयोगाद् विधिः कात्स्न्र्येन गम्यते ॥ सूत्र - ६.१.५ ॥
लिङ्गविशेषनिर्देशात् पुंयुक्तम् ऐतिशायनः ॥ सूत्र - ६.१.६ ॥
तदुक्तित्वाच् च दोषश्रुतिर् अविज्ञाते ॥ सूत्र - ६.१.७ ॥
जातिं तु बादरायणो ऽविशेषात् तस्मात् स्त्र्य् अपि प्रतीयेत जात्यर्थस्याविशिष्टत्वात् ॥ सूत्र - ६.१.८ ॥
चोदितत्वाद् यथाश्रुति ॥ सूत्र - ६.१.९ ॥

द्रव्यवत्त्वात् तु पुंसां स्याद् द्रव्यसंयुक्तं क्रयविक्रयाभ्याम् अद्रव्यत्वं स्त्रीणां द्रव्यैः समानयोगित्वात् ॥ सूत्र - ६.१.१० ॥
तथा चान्यार्थदर्शनम् ॥ सूत्र - ६.१.११ ॥
तादर्थ्यात् कर्म तादर्थ्यम् ॥ सूत्र - ६.१.१२ ॥
फलोत्साहाविशेषात् तु ॥ सूत्र - ६.१.१३ ॥
अर्थेन च समवेतत्वात् ॥ सूत्र - ६.१.१४ ॥
क्रयस्य धर्ममात्रत्वम् ॥ सूत्र - ६.१.१५ ॥
स्ववत्ताम् अपि दर्शयति ॥ सूत्र - ६.१.१६ ॥
स्ववतोस् तु वचनाद् ऐककर्म्यं स्यात् ॥ सूत्र - ६.१.१७ ॥
लिङ्गदर्शनाच् च ॥ सूत्र - ६.१.१८ ॥
क्रीतत्वात् तु भक्त्या स्वामित्वम् उच्यते ॥ सूत्र - ६.१.१९ ॥
फलार्थित्वात् तु स्वामित्वेनाभिसम्बन्धः ॥ सूत्र - ६.१.२० ॥
फलवत्तां च दर्शयति ॥ सूत्र - ६.१.२१ ॥
द्व्याधानं च द्वियज्ञवत् ॥ सूत्र - ६.१.२२ ॥
गुणस्य तु विधानत्वात् पत्न्या द्वितीयशब्दः स्यात् ॥ सूत्र - ६.१.२३ ॥
तस्या यावदुक्तम् आशीर् ब्रह्मचर्यम् अतुल्यत्वात् ॥ सूत्र - ६.१.२४ ॥
चातुर्वर्ण्यम् अविशेषात् ॥ सूत्र - ६.१.२५ ॥
निर्देशाद् वा त्रयाणां स्याद् अग्न्याधेये ऽसम्बन्धः क्रतुषु ब्राह्मणश्रुतेर् इत्य् आत्रेयः ॥ सूत्र - ६.१.२६ ॥
निमित्तार्थे न बादरिस् तस्मात् सर्वाधिकारं स्यात् ॥ सूत्र - ६.१.२७ ॥
अपि वान्यार्थदर्शनाद् यथाश्रुति प्रतीयेत ॥ सूत्र - ६.१.२८ ॥
निर्देशात् तु पक्षे स्यात् ॥ सूत्र - ६.१.२९ ॥
वैगुण्यान् नेति चेत् ॥ सूत्र - ६.१.३० ॥
न काम्यत्वात् ॥ सूत्र - ६.१.३१ ॥
संस्कारे च तत्प्रधानत्वात् ॥ सूत्र - ६.१.३२ ॥
अपि वा वेदनिर्देशाद् अपशूद्राणां प्रतीयेत ॥ सूत्र - ६.१.३३ ॥
गुणार्थित्वान् नेति चेत् ॥ सूत्र - ६.१.३४ ॥
संस्कारस्य तदर्थत्वाद् विद्यायां पुरुषश्रुतिः ॥ सूत्र - ६.१.३५ ॥
विद्यानिर्देशान् नेति चेत् ॥ सूत्र - ६.१.३६ ॥
अवैद्यत्वाद् अभावः कर्मणि स्यात् ॥ सूत्र - ६.१.३७ ॥
तथा चान्यार्थदर्शनम् ॥ सूत्र - ६.१.३८ ॥
त्रयाणां द्रव्यसम्पन्नः कर्मणी द्रव्यसिद्धत्वात् ॥ सूत्र - ६.१.३९ ॥
अनित्यत्वात् तु नैवं स्याद् अर्थाद् धि द्रव्यसंयोगः ॥ सूत्र - ६.१.४० ॥
अङ्गहीनश् च तद्धर्मा ॥ सूत्र - ६.१.४१ ॥
उत्पत्तौ नित्यसंयोगात् ॥ सूत्र - ६.१.४२ ॥
अत्र्यार्षेयस्य हानं स्यात् ॥ सूत्र - ६.१.४३ ॥
वचनाद् रथकारस्याधाने ऽस्य सर्वशेषत्वात् ॥ सूत्र - ६.१.४४ ॥
न्याय्यो वा कर्मसंयोगाच् छूद्रस्य प्रतिषिद्धतत्वात् ॥ सूत्र - ६.१.४५ ॥
अकर्मत्वात् तु नैवं स्यात् ॥ सूत्र - ६.१.४६ ॥
आनर्थक्यं च संयोगात् ॥ सूत्र - ६.१.४७ ॥
गुणार्थेनेति चेत् ॥ सूत्र - ६.१.४८ ॥
उक्तम् अनिमित्तत्वम् ॥ सूत्र - ६.१.४९ ॥
सौधन्वनास् तु हीनत्वान् मन्त्रवर्णात् प्रतीयेरन् ॥ सूत्र - ६.१.५० ॥
रथपतिर् निषादः स्याच् छब्दसामर्थ्यात् ॥ सूत्र - ६.१.५१ ॥
लिङ्गदर्शनाच् च ॥ सूत्र - ६.१.५२ ॥

### Sub Chapter 02

पुरुषार्थैकसिद्धित्वात् तस्य तस्याधिकारः स्यात् ॥ सूत्र - ६.२.१ ॥
अपि चोत्पत्तिसंयोगो यथा स्यात् सत्वदर्यशनं तथाभावो विभागे स्यात् ॥ सूत्र - ६.२.२ ॥
प्रयोगे पुरुषश्रुतेर् यथाकामी प्रयोगे स्यात् ॥ सूत्र - ६.२.३ ॥
प्रत्यर्थं श्रुतिभाव इति चेत् ॥ सूत्र - ६.२.४ ॥
तादर्थ्ये न गुणार्थतानुक्ते ऽर्थान्तरत्वात् कर्तुः प्रधानभूतत्वात् ॥ सूत्र - ६.२.५ ॥
अपि वा कामसंयोगे सम्बन्धात् प्रयोगायोपदिश्येत प्रत्यर्थं हि विधिश्रुतिर् विषाणावत् ॥ सूत्र - ६.२.६ ॥
अन्यस्य स्याद् इति चेत् ॥ सूत्र - ६.२.७ ॥
अन्यार्थेनाभिसम्बन्धः ॥ सूत्र - ६.२.८ ॥
फलकामो निमित्तम् इति चेत् ॥ सूत्र - ६.२.९ ॥
न नित्यत्वात् ॥ सूत्र - ६.२.१० ॥
कर्म तथेति चेत् ॥ सूत्र - ६.२.११ ॥
न समवायात् ॥ सूत्र - ६.२.१२ ॥
प्रकमात् तु नियम्येतारम्भस्य क्रियानिमित्तत्वात् ॥ सूत्र - ६.२.१३ ॥
फलार्थित्वाद् वानियमो यथानुपक्रान्ते ॥ सूत्र - ६.२.१४ ॥
नियमो वा तन्निमित्तत्वात् कर्तुस् तत्कारणं स्यात् ॥ सूत्र - ६.२.१५ ॥
लोके कर्माणि वेदवत् ततो ऽधिपुरुषज्ञानम् ॥ सूत्र - ६.२.१६ ॥
अपराधे ऽपि च तैः शास्त्रम् ॥ सूत्र - ६.२.१७ ॥
अशास्त्रात् तूपसम्प्राप्तिः शास्त्रं स्यान् न प्रकल्पकं तस्माद् अर्थेन गम्येताप्राप्ते शास्त्रम् अर्थवत् ॥ सूत्र - ६.२.१८ ॥
प्रतिषेधेष्व् अकर्मत्वात् क्रिया स्यात् प्रतिषिद्धानां विभक्तत्वाद् अकर्मणाम् ॥ सूत्र - ६.२.१९ ॥
शास्त्राणां त्व् अर्थवत्त्वेन पुरुषार्थो विधीयते तयोर् असमवायित्वात् तादर्थ्ये विध्यतिक्रमः ॥ सूत्र - ६.२.२० ॥
तस्मिंस् तु शिष्यमाणानि जननेन प्रवर्तेरन् ॥ सूत्र - ६.२.२१ ॥

अपि वा वेदतुल्यत्वाद् उपायेन प्रवर्तेरन् ॥ सूत्र - ६.२.२२ ॥
अभ्यासो ऽकर्मशेषत्वात् पुरुषार्थो विधीयते ॥ सूत्र - ६.२.२३ ॥
तस्मिन्न् असम्भवन्न् अर्थात् ॥ सूत्र - ६.२.२४ ॥
न कालेभ्य उपदिश्यन्ते ॥ सूत्र - ६.२.२५ ॥
दर्शनात् काललिङ्गानां कालविधानम् ॥ सूत्र - ६.२.२६ ॥
तेषाम् औत्पत्तिकत्वाद् आगमेन प्रवर्तेत ॥ सूत्र - ६.२.२७ ॥
तथा हि लिङ्गदर्शनम् ॥ सूत्र - ६.२.२८ ॥
तथान्तःक्रतुप्रयुक्तानि ॥ सूत्र - ६.२.२९ ॥ आचाराद् गृह्यमाणेषु तथा स्यात् पुरुषार्थत्वात् ॥ सूत्र - ६.२.३० ॥
ब्राह्मणस्य तु सोमविद्याप्रजम् ऋणवाक्येन संयोगात् ॥ सूत्र - ६.२.३१ ॥

## Sub Chapter 03

सर्वशक्तौ प्रवृत्तिः स्यात् तथाभूतोपदेशात् ॥ सूत्र - ६.३.१ ॥
अपि वाप्य् एकदेशे स्यात् प्रधाने ह्य् अर्थनिर्वृत्तिर् गुणमात्रम् इतरत् तदर्थत्वात् ॥ सूत्र - ६.३.२ ॥
तदकर्मणि च दोषस् तस्मात् ततो विशेषः स्यात् प्रधानेनाभिसम्बन्धात् ॥ सूत्र - ६.३.३ ॥
कर्माभेदं तु जैमिनिः प्रयोगवचनैकत्वात् सर्वेषाम् उपदेशः स्याद् इति ॥ सूत्र - ६.३.४ ॥
अर्थस्य व्यपवर्गित्वाद् एकस्यापि प्रयोगे स्याद् यथा क्रत्वन्तरेषु ॥ सूत्र - ६.३.५ ॥
विध्यपराधे च दर्शनात् समाप्तेः ॥ सूत्र - ६.३.६ ॥
प्रायश्चित्तविधानाच् च ॥ सूत्र - ६.३.७ ॥
काम्येषु चैवम् अर्थित्वात् ॥ सूत्र - ६.३.८ ॥
असंयोगात् तु नैवं स्याद् विधेः शब्दप्रमाणत्वात् ॥ सूत्र - ६.३.९ ॥
अकर्मणि चाप्रत्यवायात् ॥ सूत्र - ६.३.१० ॥
क्रियाणाम् आश्रितत्वाद् द्रव्यान्तरे विभागः स्यात् ॥ सूत्र - ६.३.११ ॥
अपि वाव्यतिरेकाद् रूपशब्दाविभागाच् च गोत्ववद् ऐककर्म्यं स्यान् नामधेयं च सत्त्ववत् ॥ सूत्र - ६.३.१२ ॥
श्रुतिप्रमाणत्वाच् छिष्टाभावे ऽनागमो ऽन्यस्याशिष्टत्वात् ॥ सूत्र - ६.३.१३ ॥
क्वचिद् विधानाच् च ॥ सूत्र - ६.३.१४ ॥
आगमो वा चोदनार्थाविशेषात् ॥ सूत्र - ६.३.१५ ॥
नियमार्थः क्वाचिद् विधिः ॥ सूत्र - ६.३.१६ ॥
तन् नित्यं तच्चिकीर्षा हि ॥ सूत्र - ६.३.१७ ॥
न देवताग्निशब्दक्रियमन्यार्थसंयोगात् ॥ सूत्र - ६.३.१८ ॥
देवतायां च तदर्थत्वात् ॥ सूत्र - ६.३.१९ ॥
प्रतिषिद्धं चाविशेषेण हि तच्छ्रुतिः ॥ सूत्र - ६.३.२० ॥
तथा स्वामिनः फलसमवायात् फलस्य कर्मयोगित्वात् ॥ सूत्र - ६.३.२१ ॥
बहूनां तु प्रवृत्ते ऽन्यमागमयेद् अवैगुण्यात् ॥ सूत्र - ६.३.२२ ॥
स स्वामी स्यात् संयोगात् ॥ सूत्र - ६.३.२३ ॥
कर्मकरो वा भृतत्वात् ॥ सूत्र - ६.३.२४ ॥
तस्मिंश् च फलदर्शनात् ॥ सूत्र - ६.३.२५ ॥
स तद्धर्मा स्यात् कर्मसंयोगात् ॥ सूत्र - ६.३.२६ ॥
सामान्यं तच्चिकीर्षा हि ॥ सूत्र - ६.३.२७ ॥
निर्देशात् तु विकल्पे यत् प्रवृत्तम् ॥ सूत्र - ६.३.२८ ॥
अशब्दम् इति चेत् ॥ सूत्र - ६.३.२९ ॥
नानङ्गत्वात् ॥ सूत्र - ६.३.३० ॥
वचनाच् चान्याय्यम् अभावे तत्सामान्येन प्रतिनिधिर् अभावाद् इतरस्य ॥ सूत्र - ६.३.३१ ॥
न प्रतिनिधौ समत्वात् ॥ सूत्र - ६.३.३२ ॥
स्याच् छ्रुतिलक्षणे नियतत्वात् ॥ सूत्र - ६.३.३३ ॥
न तदीप्सा हि ॥ सूत्र - ६.३.३४ ॥
मुख्याधिगमे मुख्यम् आगमो हि तदभावात् ॥ सूत्र - ६.३.३५ ॥
प्रबृत्ते ऽपीति चेत् ॥ सूत्र - ६.३.३६ ॥
नानर्थकत्वात् ॥ सूत्र - ६.३.३७ ॥
द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वात् ॥ सूत्र - ६.३.३८ ॥
अर्थद्रव्यविरोधे ऽर्थो द्रव्याभावे तदुत्पत्तेर् द्रव्याणाम् अर्थशेषत्वात् ॥ सूत्र - ६.३.३९ ॥
विधिर् अप्य् एकदेशे स्यात् ॥ सूत्र - ६.३.४० ॥

अपि वार्थस्य शक्यत्वाद् एकदेशेन निर्वर्तेतार्थानाम् अविभक्तत्वाद् गुणमात्रम् इतरत् तदर्थत्वात् ॥ सूत्र - ६.३.४१ ॥

## Sub Chapter 04

शेषाद् द्व्यवदाननाशे स्यात् तदर्थत्वात् ॥ सूत्र - ६.४.१ ॥
निर्देशाद् वान्यद् आगमयेत् ॥ सूत्र - ६.४.२ ॥
अपि वा शेषभाजां स्याद् विशिष्टकारणत्वात् ॥ सूत्र - ६.४.३ ॥
निर्देशाच् छेषभक्षो ऽन्यैः प्रधानवत् ॥ सूत्र - ६.४.४ ॥
सर्वैर् वा समवायात् स्यात् ॥ सूत्र - ६.४.५ ॥
निर्देशस्य गुणार्थत्वम् ॥ सूत्र - ६.४.६ ॥
प्रधाने श्रुतिलक्षणम् ॥ सूत्र - ६.४.७ ॥
अर्थवद् इति चेत् ॥ सूत्र - ६.४.८ ॥
न चोदनाविरोधात् ॥ सूत्र - ६.४.९ ॥
अर्थसमवायत् प्रायश्चित्तम् एकदेशे ऽपि ॥ सूत्र - ६.४.१० ॥
न त्व् अशेषे वैगुण्यात् तदर्थं हि ॥ सूत्र - ६.४.११ ॥
स्याद् वा प्राप्तनिमित्तत्वाद् अतद्धर्मो नित्यसंयोगान् न हितस्य गुणार्थेनानित्यत्वात् ॥ सूत्र - ६.४.१२ ॥
गुणानां च परार्थत्वाद् वचनाद् व्यपाश्रय स्यात् ॥ सूत्र - ६.४.१३ ॥
भेदार्थम् इति ॥ सूत्र - ६.४.१४ ॥
न शेषभूतत्वात् ॥ सूत्र - ६.४.१५ ॥
अनर्थकश् च सर्वनाशे स्यात् ॥ सूत्र - ६.४.१६ ॥
क्षामे तु सर्वदाहे स्याद् एकदेशस्यावर्जनीयत्वात् ॥ सूत्र - ६.४.१७ ॥
दर्शनाद् एकदेशे स्यात् ॥ सूत्र - ६.४.१८ ॥
अन्येन वैतच् छास्त्राद् धि कारणप्राप्तिः ॥ सूत्र - ६.४.१९ ॥
तद्धविःशब्दान् नेति चेत् ॥ सूत्र - ६.४.२० ॥
स्याद् अन्यायत्वादिज्यागामी हविः शब्दस् तल्लिङ्गसंयोगात् ॥ सूत्र - ६.४.२१ ॥
यथाश्रुतीति चेत् ॥ सूत्र - ६.४.२२ ॥
न तल्लक्षणत्वाद् उपपातो हि कारणम् ॥ सूत्र - ६.४.२३ ॥
होमाभिषवभक्षणं च तद्वत् ॥ सूत्र - ६.४.२४ ॥
उभाभ्यां वा न हि तयोर् धर्मशास्त्रम् ॥ सूत्र - ६.४.२५ ॥
पुनर् आधेयम् ओदनवत् ॥ सूत्र - ६.४.२६ ॥
द्रव्योत्पत्तेर् वोभयोः स्यात् ॥ सूत्र - ६.४.२७ ॥
पञ्चशरावस् तु द्रव्यश्रुतेः प्रतिनिधिः स्यात् ॥ सूत्र - ६.४.२८ ॥
चोदना वा द्रव्यदेवताविधिर् अवाच्ये हि ॥ सूत्र - ६.४.२९ ॥
स प्रत्यामनेत् स्थानात् ॥ सूत्र - ६.४.३० ॥
अङ्गविधिर् वा निमित्तसंयोगात् ॥ सूत्र - ६.४.३१ ॥
विश्वजित्वप्रवृत्ते भावः कर्मणि स्यात् ॥ सूत्र - ६.४.३२ ॥
निष्क्रयवादाच् च ॥ सूत्र - ६.४.३३ ॥
वत्ससंयोगे व्रतचोदना स्यात् ॥ सूत्र - ६.४.३४ ॥
कालो वोत्पन्नसंयोगाद् यथोक्तस्य ॥ सूत्र - ६.४.३५ ॥
अर्थापरिमाणाच् च ॥ सूत्र - ६.४.३६ ॥
वत्सस् तु श्रुतिसंयोगात् तदङ्गं स्यात् ॥ सूत्र - ६.४.३७ ॥
कालस् तु स्याद् अचोदनात् ॥ सूत्र - ६.४.३८ ॥
अनर्थकश् च कर्मसंयोगे ॥ सूत्र - ६.४.३९ ॥
अवचनाच् च स्वशब्दस्य ॥ सूत्र - ६.४.४० ॥
कालश् चेत् सन्नयत्पक्षे तल्लिङ्गसंयोगात् ॥ सूत्र - ६.४.४१ ॥
कालार्थत्वाद् वोभयोः प्रतीयेत ॥ सूत्र - ६.४.४२ ॥
प्रस्तरे शाखाश्रयणवत् ॥ सूत्र - ६.४.४३ ॥

कालविधिर् वोभयोर् विद्यामानत्वात् ॥ सूत्र - ६.४.४४ ॥
अतत्संस्कारार्थत्वाच् च ॥ सूत्र - ६.४.४५ ॥
तस्माच् च विप्रयोगे स्यात् ॥ सूत्र - ६.४.४६ ॥
उपवेषश् च पक्षे स्यात् ॥ सूत्र - ६.४.४७ ॥

## Sub Chapter 05

अभ्युदये कालापराधाद् इज्याचोदना स्याद् यथा पञ्चशरावे ॥ सूत्र - ६.५.१ ॥
अपनयो वा विद्यानत्वात् ॥ सूत्र - ६.५.२ ॥
तद्रूपत्वाच् च शब्दानाम् ॥ सूत्र - ६.५.३ ॥
आतञ्चनाभ्यासस्य दर्शनात् ॥ सूत्र - ६.५.४ ॥
अपूर्वत्वाद् विधानं स्यात् ॥ सूत्र - ६.५.५ ॥
पयोदोषात् पञ्चशरावे ऽदुष्टं हीतरत् ॥ सूत्र - ६.५.६ ॥
सान्नाय्यो ऽपि तथेति चेत् ॥ सूत्र - ६.५.७ ॥
न तस्याद्दुष्टत्वाद् अविशिष्टं हि कारणम् ॥ सूत्र - ६.५.८ ॥
लक्षणार्थाश्रुतिः ॥ सूत्र - ६.५.९ ॥
उपांशुयाजे ऽवचनाद् यथाप्रकृति ॥ सूत्र - ६.५.१० ॥
अपनयो वा प्रवृत्या यथेतरेषाम् ॥ सूत्र - ६.५.११ ॥
निरुप्ते स्यात् तत्संयोगात् ॥ सूत्र - ६.५.१२ ॥
प्रवृत्ते वा प्रापणान् निमित्तस्य ॥ सूत्र - ६.५.१३ ॥
लक्षणमात्रम् इतरत् ॥ सूत्र - ६.५.१४ ॥
तथा चान्यार्थदर्शनम् ॥ सूत्र - ६.५.१५ ॥
अनिरुप्ते ऽभ्युदिते प्राकृतीभ्यो निर्वपेद् इत्य् आश्मरथ्यस् तण्डुलभूतेष्व् अपनयात् ॥ सूत्र - ६.५.१६ ॥
व्यूर्ध्वभाग्भ्यस् त्व् आलेखनस् तत्कारित्वाद् देवतापनयस्य ॥ सूत्र - ६.५.१७ ॥
विनिरुप्ते न मुष्टीनाम् अपनयस् तद्गुणत्वात् ॥ सूत्र - ६.५.१८ ॥
अप्राकृतेन हि संयोगस् तत्स्थानीयत्वात् ॥ सूत्र - ६.५.१९ ॥
अभावाच् चेतरस्य स्यात् ॥ सूत्र - ६.५.२० ॥
सान्नाय्यसंयोगान् नासन्नायतः स्यात् ॥ सूत्र - ६.५.२१ ॥
औषधसंयोगाद् वोभयोः ॥ सूत्र - ६.५.२२ ॥
वैगुण्यान् नेति चेत् ॥ सूत्र - ६.५.२३ ॥
नातत्संस्कारत्वात् ॥ सूत्र - ६.५.२४ ॥
साम्युत्थाने विश्वजित्क्रीते विभागसंयोगात् ॥ सूत्र - ६.५.२५ ॥
प्रवृते वा प्रापणान् निमित्तस्य ॥ सूत्र - ६.५.२६ ॥
आदेशार्थेतरा श्रुतिः ॥ सूत्र - ६.५.२७ ॥
दीक्षापरिमाणे यथाकाम्यविशेषात् ॥ सूत्र - ६.५.२८ ॥
द्वादशाहस् तु लिङ्गात् स्यात् ॥ सूत्र - ६.५.२९ ॥
पौर्णमास्याम् अनियमो ऽविशेषात् ॥ सूत्र - ६.५.३० ॥
आनन्तर्यात् तु चैत्री स्यात् ॥ सूत्र - ६.५.३१ ॥
माघी वैकाष्टकाश्रुतेः ॥ सूत्र - ६.५.३२ ॥
अन्या अपीति चेत् ॥ सूत्र - ६.५.३३ ॥
न भक्तित्वाद् एषा हि लोके ॥ सूत्र - ६.५.३४ ॥
दीक्षापराधे चानुग्रहात् ॥ सूत्र - ६.५.३५ ॥
उत्थाने चानुप्ररोहात् ॥ सूत्र - ६.५.३६ ॥
अस्यां च सर्वलिङ्गानि ॥ सूत्र - ६.५.३७ ॥
दीक्षाकालस्य शिष्टत्वाद् अतिक्रमे नियतानाम् अनुत्कर्षः प्राप्तकालत्वात् ॥ सूत्र - ६.५.३८ ॥

उत्कर्षो वा दीक्षितत्वाद् अविशिष्टं हि कारणम् ॥ सूत्र - ६.५.३९ ॥ तत्र प्रतिहोमो न विद्यते यथा पूर्वेषाम् ॥ सूत्र - ६.५.४० ॥
कालप्राधान्याच् च ॥ सूत्र - ६.५.४१ ॥
प्रतिषेधाच् चोर्ध्वम् अवभृथादेष्टे ॥ सूत्र - ६.५.४२ ॥
प्रतिहोमश् चेत् सायम् अग्निहोत्रप्रभृतीनि हूयेरन् ॥ सूत्र - ६.५.४३ ॥
प्रातस् तु षोडशिनि ॥ सूत्र - ६.५.४४ ॥
प्रायश्चित्तम् अधिकारे सर्वत्र दोषमामान्यात् ॥ सूत्र - ६.५.४५ ॥
प्रकरणे वा शब्दहेतुत्वात् ॥ सूत्र - ६.५.४६ ॥
अतिद्विकारश् च ॥ सूत्र - ६.५.४७ ॥
व्यापन्नस्याप्सु गतौ यद् अभोज्यम् आर्याणां तत् प्रतीयेत ॥ सूत्र - ६.५.४८ ॥
विभागश्रुतेः प्रायश्चित्तं यौगपद्ये न विद्यते ॥ सूत्र - ६.५.४९ ॥
स्याद् वा प्राप्तनिमित्तत्वात् कालमात्रम् एकम् ॥ सूत्र - ६.५.५० ॥
तत्र विप्रतिषेधाद् विकल्पः स्यात् ॥ सूत्र - ६.५.५१ ॥
प्रयोगान्तरे वोभयानुग्रहः स्यात् ॥ सूत्र - ६.५.५२ ॥
न चैकसंयोगात् ॥ सूत्र - ६.५.५३ ॥
पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् ॥ सूत्र - ६.५.५४ ॥
यद्य् उद्गाता जघन्यः स्यात् पुनर् यज्ञे सर्ववेदसं दद्याद् यथेतरस्मिन् ॥ सूत्र - ६.५.५५ ॥
अहर्गणे यस्मिन्न् अपच्छेदस् तद् आवर्तेत कर्म पृथक्त्वात् ॥ सूत्र - ६.५.५६ ॥

## Sub Chapter 06

सन्निपाते वैगुण्यात् प्रकृतिवत् तुल्यकल्पा यजेरन् ॥ सूत्र - ६.६.१ ॥
वचनाद् वाशिरोवत्स्यात् ॥ सूत्र - ६.६.२ ॥
न वानारभ्यवादत्वात् ॥ सूत्र - ६.६.३ ॥
स्याद् वा यज्ञार्थत्वाद् औदुम्बरीवत् ॥ सूत्र - ६.६.४ ॥
न तत्प्रधानत्वात् ॥ सूत्र - ६.६.५ ॥
औदुम्बर्याः परार्थत्वात् कपालवत् ॥ सूत्र - ६.६.६ ॥
अन्येनापीति चेत् ॥ सूत्र - ६.६.७ ॥
नैकत्वात्तस्य चानधिकाराच् छब्दस्य चाविभक्तत्वात् ॥ सूत्र - ६.६.८ ॥
सन्निपातात् तु निमित्तविघातः स्याद् बृहद्रथन्तरवद् विभक्तशिष्टत्वाद् वसिष्ठनिर्वर्त्ये ॥ सूत्र - ६.६.९ ॥
अपि वा कृत्स्नसंयोगाद् अविघातः प्रतीयेत स्वामित्वेनाभिसंबन्धात् ॥ सूत्र - ६.६.१० ॥
साम्नोः कर्मवृद्ध्यैकदेशेन संयोगे गुणत्वेनाभिसंबन्धस् तस्मात् तत्र विघातः स्यात् ॥ सूत्र - ६.६.११ ॥
वचनात् तु द्विसंयोगस् तस्माद् एकस्य पाणिवत् ॥ सूत्र - ६.६.१२ ॥
अर्थाभावात् तु नैवं स्यात् ॥ सूत्र - ६.६.१३ ॥
अर्थानां च विभक्तत्वान् न तच्छ्रुतेन संबन्धः ॥ सूत्र - ६.६.१४ ॥
प्राणेः प्रत्यङ्गभावाद् असंबन्धः प्रतीयेत ॥ सूत्र - ६.६.१५ ॥
सत्राणि सर्ववर्णामाम् अविशेषात् ॥ सूत्र - ६.६.१६ ॥
लिङ्गदर्शनाच् च ॥ सूत्र - ६.६.१७ ॥
ब्राह्मणानां वेतरयोर् आर्त्विज्यभावात् ॥ सूत्र - ६.६.१८ ॥
वचनाद् इति चेत् ॥ सूत्र - ६.६.१९ ॥
न स्वामित्वं हि विधीयते ॥ सूत्र - ६.६.२० ॥
गार्हपते वा स्याताम् अविप्रतिषेधात् ॥ सूत्र - ६.६.२१ ॥
न वा कल्पविरोधात् ॥ सूत्र - ६.६.२२ ॥
स्वामित्वाद् इतरेषाम् अहीने लिङ्गदर्शनम् ॥ सूत्र - ६.६.२३ ॥
वासिष्ठानां वा ब्रह्मत्वनियमात् ॥ सूत्र - ६.६.२४ ॥
सर्वेषां वा प्रतिप्रसवात् ॥ सूत्र - ६.६.२५ ॥
विश्वामित्रस्य हौत्रनियमाद् भृगुशुनकवसिष्ठानाम् अनधिकारः ॥ सूत्र - ६.६.२६ ॥
विहारस्य प्रभुत्वाद् अनग्नीनाम् अपि स्यात् ॥ सूत्र - ६.६.२७ ॥
सारस्वते च दर्शनात् ॥ सूत्र - ६.६.२८ ॥
प्रायश्चित्तविधानाच् च ॥ सूत्र - ६.६.२९ ॥
साग्नीनां वेष्टिपूर्वत्वात् ॥ सूत्र - ६.६.३० ॥
स्वार्थेन च प्रयुक्तत्वात् ॥ सूत्र - ६.६.३१ ॥
सन्निवापं च दर्शयति ॥ सूत्र - ६.६.३२ ॥
जुह्वादीनाम् अप्रयुक्तत्वात् संदेहे यथाकामी प्रतीयेत ॥ सूत्र - ६.६.३३ ॥
अपि वान्यानि पात्राणि साधारणानि कुर्वीरन् विप्रतिषेधाच् छास्त्रकृतत्वात् ॥ सूत्र - ६.६.३४ ॥

प्रायश्चित्तम् आपदि स्यात् ‖ सूत्र - ६.६.३५ ‖

पुरुषकल्पेन विकृतौ कर्तृनियमः स्याद् यज्ञस्य तद्गुणत्वाद् अभावाद् इतरान् प्रत्येकस्मिन्न् अधिकारः स्यात् ‖ सूत्र - ६.६.३६ ‖
लिङ्गाच् चेज्याविशेषवत् ‖ सूत्र - ६.६.३७ ‖
न वा संयोगपृथक्त्वाद् गुणस्येज्याप्रधानत्वाद् असंयुक्ता हि चोदना ‖ सूत्र - ६.६.३८ ‖
इज्यायां तद्गुणत्वाद् विशेषेण नियमयेत ‖ सूत्र - ६.६.३९ ‖

## Sub Chapter 07

स्वदाने सर्वम् अविशेषात् ‖ सूत्र - ६.७.१ ‖
यस्य वा प्रभुः स्याद् इतरस्याशक्यत्वात् ‖ सूत्र - ६.७.२ ‖
न भूमिः स्यात् सर्वान् प्रत्यविशिष्टत्वात् ‖ सूत्र - ६.७.३ ‖
अकार्यत्वाच् च ततः पुनर् विशेषः स्यात् ‖ सूत्र - ६.७.४ ‖
नित्यत्वाच् चानित्यैर् नास्ति संबन्धः ‖ सूत्र - ६.७.५ ‖
शूद्रश् च धर्मशास्त्रत्वात् ‖ सूत्र - ६.७.६ ‖
दक्षिणाकाले यत् स्वं तत् प्रतीयेत तद्दानसंयोगात् ‖ सूत्र - ६.७.७ ‖
अशेषत्वात् तदन्तः स्यात् कर्मणो द्रव्यसिद्धित्वात् ‖ सूत्र - ६.७.८ ‖
अपि वा शेषकर्म स्यात् क्रतोः प्रत्यक्षशिष्टत्वात् ‖ सूत्र - ६.७.९ ‖
तथा चान्यार्थदर्शनम् ‖ सूत्र - ६.७.१० ‖
अशेषं तु समञ्जसादानेन शेषकर्म स्यात् ‖ सूत्र - ६.७.११ ‖
नादानस्यानित्यत्वात् ‖ सूत्र - ६.७.१२ ‖
दीक्षासु विनिर्देशाद् अक्रत्वर्थेन संयोगस् तस्माद् अविरोधः स्यात् ‖ सूत्र - ६.७.१३ ‖
अहर्गणे च तद्धर्मः स्यात् सर्वेषाम् अविशेषात् ‖ सूत्र - ६.७.१४ ‖
द्वादशशतं वा प्रकृतिवत् ‖ सूत्र - ६.७.१५ ‖
अतद्गुणत्वात् नैवं स्यात् ‖ सूत्र - ६.७.१६ ‖
लिङ्गदर्शनाच् च ‖ सूत्र - ६.७.१७ ‖
विकारः सन्न् उभयतो ऽविशेषात् ‖ सूत्र - ६.७.१८ ‖
अधिकं वा प्रतिप्रसवात् ‖ सूत्र - ६.७.१९ ‖
अनुग्रहाच् च पादवत् ‖ सूत्र - ६.७.२० ‖
अपरिमिते शिष्टस्य सङ्ख्याप्रतिषेधस् तच्छ्रुतित्वात् ‖ सूत्र - ६.७.२१ ‖
कल्पान्तरं वा तुल्यवत् प्रसङ्ख्यानात् ‖ सूत्र - ६.७.२२ ‖
अनियमो ऽविशेषात् ‖ सूत्र - ६.७.२३ ‖
अधिकं वा स्याद् बह्वर्थत्वाद् इतरेषां सन्निधानात् ‖ सूत्र - ६.७.२४ ‖
अर्थवादश् च तदर्थवत् ‖ सूत्र - ६.७.२५ ‖
परकृतिपुराकल्पं च मनुष्यधर्मः स्याद् अर्थाय ह्य् अनुकीर्तनम् ‖ सूत्र - ६.७.२६ ‖
तद्युक्ते च प्रतिषेधात् ‖ सूत्र - ६.७.२७ ‖
निर्देशाद् वा तद्धर्मः स्यात् पञ्चावत्तवत् ‖ सूत्र - ६.७.२८ ‖
विधौ तु वेदसंयोगाद् उपदेशः स्यात् ‖ सूत्र - ६.७.२९ ‖
अर्थवादो वा विधिशेषत्वात् तस्मान् नित्यानुवादः स्यात् ‖ सूत्र - ६.७.३० ‖
सहस्रसंवत्सरं तदायुषाम् असंभवान् मनुष्येषु ‖ सूत्र - ६.७.३१ ‖
अपि वा तदधिकारान् मनुष्यधर्मः स्यात् ‖ सूत्र - ६.७.३२ ‖
नासामर्थ्यात् ‖ सूत्र - ६.७.३३ ‖
सम्बन्धादर्शनात् ‖ सूत्र - ६.७.३४ ‖
स कुलकल्पः स्याद् इति कार्ष्णाजिनिर् एकस्मिन्न् असंभवात् ‖ सूत्र - ६.७.३५ ‖
अपि वा कृत्स्नसंयोगाद् एकस्यैव प्रयोगः स्यात् ‖ सूत्र - ६.७.३६ ‖
विप्रतिषेधात् तु गुण्यन्यतरः स्याद् इति लावुकायनः ‖ सूत्र - ६.७.३७ ‖
संवत्सरो विचालित्वात् ‖ सूत्र - ६.७.३८ ‖
सा प्रकृतिः स्याद् अधिकारात् ‖ सूत्र - ६.७.३९ ‖
अहानि वाभिसंख्यत्वात् ‖ सूत्र - ६.७.४० ‖

## Sub Chapter 08

इष्टिपूर्वत्वाद् अक्रतुशेषो होमः संस्कृतेष्व् अग्निषु स्याद् पूर्वो ऽप्य् आधानस्य सर्वशेषत्वात् ‖ सूत्र - ६.८.१ ‖
इष्टित्वे न तु संस्तवश् चतुर्होतॄन् असंस्कृतेषु दर्शयति ‖ सूत्र - ६.८.२ ‖
उपदेशस् त्व् अपूर्वत्वात् ‖ सूत्र - ६.८.३ ‖
स सर्वेषाम् अविशेषात् ‖ सूत्र - ६.८.४ ‖
अपि वा क्रत्वभावाद् अनाहिताग्नेर् अशेषभूतनिर्देशः ‖ सूत्र - ६.८.५ ‖
जपो वानग्निसंयोगात् ‖ सूत्र - ६.८.६ ‖
इष्टित्वेन संस्तुते होमः स्याद् अनारभ्याग्निसंयोगाद् इतरेषाम् अवाच्यत्वात् ‖ सूत्र - ६.८.७ ‖
उभयोः पितृयज्ञवत् ‖ सूत्र - ६.८.८ ‖
निर्देशो वानाहिताग्नेर् अनारभ्याग्निसंयोगात् ‖ सूत्र - ६.८.९ ‖
पितृयज्ञे संयुक्तस्य पुनर् वचनम् ‖ सूत्र - ६.८.१० ‖
उपनयन्न् आदधीत होमसंयोगात् ‖ सूत्र - ६.८.११ ‖
स्थपतीष्टवल् लौकिके वा विद्याकर्मानुपूर्वत्वात् ‖ सूत्र - ६.८.१२ ‖
आधानं च भार्यासंयुक्तम् ‖ सूत्र - ६.८.१३ ‖
अकर्म चोर्ध्वम् आधानात् तत्समवायो हि कर्मभिः ‖ सूत्र - ६.८.१४ ‖
श्राद्धवद् इति चेत् ‖ सूत्र - ६.८.१५ ‖
न श्रुतिविप्रतिषेधात् ‖ सूत्र - ६.८.१६ ‖
सर्वार्थत्वाच् च पुत्रार्थो न प्रयोजयेत् ‖ सूत्र - ६.८.१७ ‖
सोमपानात् तु प्रापणं द्वितीयस्य तस्माद् उपयच्छेत् ‖ सूत्र - ६.८.१८ ‖
पितृयज्ञे तु दर्शनात् प्राग् आधानात् प्रतीयेत ‖ सूत्र - ६.८.१९ ‖
स्थपतीष्टिः प्रयाजवद् अग्नयाधेयं प्रयोजयेत् तादर्थ्याच् चापवृज्येत ‖ सूत्र - ६.८.२० ‖
अपि वा लौकिके ऽग्नौ स्याद् आधानस्यासर्वशेषत्वात् ‖ सूत्र - ६.८.२१ ‖
अवकीर्णिपशुश् च तद्वद् आधानस्याप्राप्तकलत्वात् ‖ सूत्र - ६.८.२२ ‖
उदगयनपूर्वपक्षाहः पुण्याहेषु दैवानि स्मृतिरूपान्य् आर्थदर्शनात् ‖ सूत्र - ६.८.२३ ‖
अहनि च कर्मसाकल्यम् ‖ सूत्र - ६.८.२४ ‖
इतरेषु तु पित्र्याणि ‖ सूत्र - ६.८.२५ ‖
याच्ञाक्रयणम् अविद्यमाने लोकवत् ‖ सूत्र - ६.८.२६ ‖
नियतं वार्थवत्वात् स्यात् ‖ सूत्र - ६.८.२७ ‖
तथा भक्षप्रैषाच् छादनसंज्ञप्तहोमद्वेषम् ‖ सूत्र - ६.८.२८ ‖
अनर्थकं त्व् अनित्यं स्यात् ‖ सूत्र - ६.८.२९ ‖
पशुचोदनायाम् अनियमो ऽविशेषात् ‖ सूत्र - ६.८.३० ‖
छागो वा मन्त्रवर्णात् ‖ सूत्र - ६.८.३१ ‖
न चोदनाविरोधात् ‖ सूत्र - ६.८.३२ ‖
आर्षेयवद् इति चेत् ‖ सूत्र - ६.८.३३ ‖ न तत्र ह्य् अचोदित्वात् ‖ सूत्र - ६.८.३४ ‖
नियमो वैकार्थ्यं ह्य् अर्थभेदाद् भेदः पृथक्त्वेनाभिधानात् ‖ सूत्र - ६.८.३५ ‖
अनियमो वार्थान्तरत्वाद् अन्यत्वं व्यतिरेकशब्दभेदाभ्याम् ‖ सूत्र - ६.८.३६ ‖
रूपाल् लिङ्गाच् च ‖ सूत्र - ६.८.३७ ‖
छागे न कर्माख्या रूपलिङ्गाभ्याम् ‖ सूत्र - ६.८.३८ ‖
रूपान्यत्वान् न जातिशब्दः स्यात् ‖ सूत्र - ६.८.३९ ‖
विकारो नौत्पत्तिकत्वात् ‖ सूत्र - ६.८.४० ‖
स नैमित्तिकः पशोर् गुणस्याचोदितत्वात् ‖ सूत्र - ६.८.४१ ‖
जातेर् वा तत्प्रायवचनार्थवत्वाभ्याम् ‖ सूत्र - ६.८.४२ ‖

# Chapter 07

## Sub Chapter 01

श्रुतिप्रमाणत्वाच् छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् ‖ सूत्र - ७.१.१ ‖
उत्पत्त्यर्थाविभागाद् वा सत्त्ववद् ऐकधर्म्यं स्यात् ‖ सूत्र - ७.१.२ ‖
चोदनाशेषभावाद् वा तद्भेदाद् व्यवतिष्ठेरन्न् उत्पत्तेर् गुणभूतत्वात् ‖ सूत्र - ७.१.३ ‖
सत्वे लक्षणसंयोगात् सार्वत्रिकं प्रतीयेत ‖ सूत्र - ७.१.४ ‖
अविभागात् तु नैवं स्यात् ‖ सूत्र - ७.१.५ ‖

द्व्यर्थत्वं च विप्रतिषिद्धम् ॥ सूत्र - ७.१.६ ॥
उत्पत्तौ विध्यभावाद् वा चोदनायां प्रवृत्तिः स्यात् ततश् च कर्मभेदः स्यात् ॥ सूत्र - ७.१.७ ॥
यदि वाप्य् अभिधानवत् सामान्यात् सर्वधर्मः स्यात् ॥ सूत्र - ७.१.८ ॥
अर्थस्य त्व् अविभक्तत्वात् तथा स्याद् अभिधानेषु पूर्ववत्त्वात् प्रयोगस्य कर्मणः शब्दभाव्यत्वाद् विभागाच् छेषाणाम् अप्रवृत्तिः स्यात् ॥ सूत्र - ७.१.९ ॥
स्मृतिर् इति चेत् ॥ सूत्र - ७.१.१० ॥
न पूर्ववत्वात् ॥ सूत्र - ७.१.११ ॥
अर्थस्य शब्दभाव्यत्वात् प्रकरणनिबन्धनाच् छब्दाद् एवान्यत्र भावः स्यात् ॥ सूत्र - ७.१.१२ ॥
सामाने पूर्ववत्वाद् उत्पन्नाधिकारः स्यात् ॥ सूत्र - ७.१.१३ ॥
श्येनस्येति चेति ॥ सूत्र - ७.१.१४ ॥
नासन्निधानात् ॥ सूत्र - ७.१.१५ ॥
अपि वा यद्य् अपूर्वत्वाद् इतरदधिकार्थे ज्यौतिष्टोमिकाद् विधेस् तद्वाचकं समानं स्यात् ॥ सूत्र - ७.१.१६ ॥
पञ्चसञ्चरेष्व् अर्थवादातिदेशः सन्निधानात् ॥ सूत्र - ७.१.१७ ॥
सर्वस्य वैकशब्द्यात् ॥ सूत्र - ७.१.१८ ॥
लिङ्गदर्शनाच् च ॥ सूत्र - ७.१.१९ ॥
विहिताम्नानान् नेति चेत् ॥ सूत्र - ७.१.२० ॥
नेतरार्थत्वात् ॥ सूत्र - ७.१.२१ ॥
एककपालैन्द्राग्नौ च तद्वत् ॥ सूत्र - ७.१.२२ ॥

एककपालानां वैश्वदेविकः प्रकृतिर् आग्रयणे सर्वहोमापरिवृत्तिदर्शनाद् अवभृथे च सकृद् द्व्यवदानस्य वचनात् ॥ सूत्र - ७.१.२३ ॥

## Sub Chapter 02

साम्नो ऽभिधानशब्देन प्रवृत्तिः स्याद् यथाशिष्टम् ॥ सूत्र - ७.२.१ ॥
शब्दैस् त्व् अर्थविधित्वाद् अर्थान्तरे ऽप्रवृत्तिः स्यात् पृथग्भावात् क्रियाया ह्य् अभिसम्बन्धः ॥ सूत्र - ७.२.२ ॥
स्वार्थे वा स्यात् प्रयोजनं क्रियायास् तदङ्गभावेनोपदिश्येरन् ॥ सूत्र - ७.२.३ ॥
शब्दमात्रम् इति चेत् ॥ सूत्र - ७.२.४ ॥
नौत्पत्तिकत्वात् ॥ सूत्र - ७.२.५ ॥
शास्त्रं चैवम् अनर्थकं स्यात् ॥ सूत्र - ७.२.६ ॥
स्वरस्येति चेत् ॥ सूत्र - ७.२.७ ॥
नार्थाभावाच् छ्रुतेर् असंबन्धः ॥ सूत्र - ७.२.८ ॥
स्वरस् तूत्पत्तिषु स्यान् मात्रावर्णाविभक्तत्वात् ॥ सूत्र - ७.२.९ ॥
लिङ्गदर्शनाच् च ॥ सूत्र - ७.२.१० ॥
अश्रुतेस् तु विकारस्योत्तरासु यथाश्रुति ॥ सूत्र - ७.२.११ ॥
शब्दानां चासामञ्जस्यम् ॥ सूत्र - ७.२.१२ ॥
अपि तु कर्मशब्दः स्याद् भावो ऽर्थः प्रसिद्धग्रहणत्वाद् विकारो ह्य् अविशिष्टो ऽन्यैः ॥ सूत्र - ७.२.१३ ॥
अद्रव्यं चापि दृश्यते ॥ सूत्र - ७.२.१४ ॥
तस्य च क्रिया ग्रहणार्था नानार्थेषु विरूपित्वाद् अर्थो ह्य् आसामलौकिको विधानात् ॥ सूत्र - ७.२.१५ ॥
तस्मिन् संज्ञाविशेषाः स्युर् विकारपृथक्त्वात् ॥ सूत्र - ७.२.१६ ॥
योनिशस्याश् च तुल्यवद् इतराभिर् विधीयन्ते ॥ सूत्र - ७.२.१७ ॥
अयोनौ चापि दृश्यते ऽतथायोनि ॥ सूत्र - ७.२.१८ ॥
ऐकार्थ्ये नास्ति वैरूप्यम् इति चेत् ॥ सूत्र - ७.२.१९ ॥
स्याद् अर्थान्तरेष्व् अनिष्पत्तेर् यथा पाके ॥ सूत्र - ७.२.२० ॥
शब्दानां च सामञ्जस्यं ॥ सूत्र - ७.२.२१ ॥

## Sub Chapter 03

उक्तं क्रियाभिधानं तच्छ्रुताव् अन्यत्र विधिप्रदेशः स्यात् ॥ सूत्र - ७.३.१ ॥
अपूर्वे वापि भागित्वात् ॥ सूत्र - ७.३.२ ॥
नाम्नस् त्व् औत्पत्तिकत्वात् ॥ सूत्र - ७.३.३ ॥
प्रत्यक्षाद् गुणसंयोगात् क्रियाभिधानं स्यात् तदभावे ऽप्रसिद्धं स्यात् ॥ सूत्र - ७.३.४ ॥
अपि वा सत्रकर्मणि गुणार्थैषा श्रुतिः स्यात् ॥ सूत्र - ७.३.५ ॥
विश्वजिति सर्वपृष्ठे तत्पूर्वकत्वाज् ज्यौतिष्टोमिकानि पृष्ठान्य् अस्ति च पृष्ठशब्दः ॥ सूत्र - ७.३.६ ॥
षडहाद् वा तत्र हि चोदना ॥ सूत्र - ७.३.७ ॥
लिङ्गाच् च ॥ सूत्र - ७.३.८ ॥
उत्पन्नाधिकारो ज्योतिष्टोमः ॥ सूत्र - ७.३.९ ॥
द्वयोर् विधिर् इति चेत् ॥ सूत्र - ७.३.१० ॥
न व्यर्थत्वात् सर्वशब्दस्य ॥ सूत्र - ७.३.११ ॥
तथावभृथः सोमात् ॥ सूत्र - ७.३.१२ ॥
प्रकृतेर् इति चेत् ॥ सूत्र - ७.३.१३ ॥
न भक्तित्वात् ॥ सूत्र - ७.३.१४ ॥
लिङ्गदर्शनाच् च ॥ सूत्र - ७.३.१५ ॥
द्रव्यादेशे तद्द्रव्यः श्रुतिसंयोगात् पुरोडाशस् त्व् अनादेशे तत्प्रकृतित्वात् ॥ सूत्र - ७.३.१६ ॥
गुणविधिस् तु न गृह्णीयात् समत्वात् ॥ सूत्र - ७.३.१७ ॥
निर्मन्थ्यादिषु चैवम् ॥ सूत्र - ७.३.१८ ॥
प्रणयनं तु सौमिकम् अवाच्यं हीतरत् ॥ सूत्र - ७.३.१९ ॥
उत्तरवेदिप्रतिषेधश् च तद्वत् ॥ सूत्र - ७.३.२० ॥
प्राकृतं वानामत्वात् ॥ सूत्र - ७.३.२१ ॥
परिसङ्ख्यर्थं श्रवणं गुणार्थवादो वा ॥ सूत्र - ७.३.२२ ॥
प्रथमोत्तमयोः प्रणयनमुत्तरवेदिप्रतिषेधात् ॥ सूत्र - ७.३.२३ ॥
मध्यमयोर् वा गत्यर्थवादात् ॥ सूत्र - ७.३.२४ ॥
औत्तरवेदिको ऽनारभ्यवादप्रतिषेधः ॥ सूत्र - ७.३.२५ ॥
स्वरसामैककपालामिक्षं च लिङ्गदर्शनात् ॥ सूत्र - ७.३.२६ ॥
चोदनासामान्याद् वा ॥ सूत्र - ७.३.२७ ॥
कर्मजे कर्म यूपवत् ॥ सूत्र - ७.३.२८ ॥
रूपं वाशेषभूतत्वात् ॥ सूत्र - ७.३.२९ ॥
विशये लौकिकः स्यात् सर्वार्थत्वात् ॥ सूत्र - ७.३.३० ॥
न वैदिकम् अर्थनिर्देशात् ॥ सूत्र - ७.३.३१ ॥
तथोत्पत्तिर् इतरेषां समत्वात् ॥ सूत्र - ७.३.३२ ॥
संस्कृतं स्यात् तच्छब्दत्वात् ॥ सूत्र - ७.३.३३ ॥
भक्त्या वायज्ञशेषत्वाद् गुणानाम् अभिधानत्वात् ॥ सूत्र - ७.३.३४ ॥
कर्मणः पृष्टशब्दः स्यात् तथाभूतोपदेशात् ॥ सूत्र - ७.३.३५ ॥
अभिधानोपदेशाद् वा विप्रतिषेधाद् द्रव्येषु पृष्ठशब्दः स्यात् ॥ सूत्र - ७.३.३६ ॥

## Sub Chapter 04

इतिकर्तव्यता विधेर् यजतेः पूर्ववत्त्वम् ॥ सूत्र - ७.४.१ ॥
स लौकिकः स्याद् दृष्टप्रवृत्तित्वात् ॥ सूत्र - ७.४.२ ॥
वचनात् तु ततो ऽन्यत्वम् ॥ सूत्र - ७.४.३ ॥
लिङ्गेन वा नियम्येत लिङ्गस्य तद्गुणत्वात् ॥ सूत्र - ७.४.४ ॥
अपि वान्यायपूर्वत्वाद् यत्र नित्यानुवादवचनानि स्युः ॥ सूत्र - ७.४.५ ॥
मिथो विप्रतिषेधाच् च गुणानां यथार्थतल्पना स्यात् ॥ सूत्र - ७.४.६ ॥
भागित्वात् तु नियम्येत गुणानाम् अभिधानत्वात् सम्बन्धाद् अभिधानवद् यथा धेनुः किशोरेण ॥ सूत्र - ७.४.७ ॥
उत्पत्तीनां समत्वाद् वा यथाधिकारं भावः स्यात् ॥ सूत्र - ७.४.८ ॥
उत्पत्तिशेषवचनं च विप्रतिषिद्धम् एकस्मिन् ॥ सूत्र - ७.४.९ ॥
विध्यन्तो वा प्रकृतिवच् चोदनायां प्रवर्तेत तथा हि लिङ्गदर्शनम् ॥ सूत्र - ७.४.१० ॥
लिङ्गहेतुत्वाद् अलिङ्गे लौकिकं स्यात् ॥ सूत्र - ७.४.११ ॥
लिङ्गस्य पूर्ववत्तवाच् चोदनाशब्दसामान्याद् एकेनापि निरूप्येत यथा स्थालीपुलाकेन ॥ सूत्र - ७.४.१२ ॥
द्वादशाहिकम् अहर्गणे तत्प्रकृतित्वाद् ऐकाहिकम् अधिकागमात् तदाख्यं स्याद् एकाहवत् ॥ सूत्र - ७.४.१३ ॥
लिङ्गाच् च ॥ सूत्र - ७.४.१४ ॥
न वा क्रत्वभिधानाद् अधिकानाम् अशब्दत्वम् ॥ सूत्र - ७.४.१५ ॥
लिङ्गं संघातधर्मः स्यात् तदर्थापत्तेर् द्रव्यवत् ॥ सूत्र - ७.४.१६ ॥

न वार्थधर्मत्वात् संघातस्य गुणत्वात् ‖ सूत्र - ७.४.१७ ‖
अर्थापत्तेर् द्रव्येषु धर्मलाभः स्यात् ‖ सूत्र - ७.४.१८ ‖
प्रवृत्त्या नियतस्य लिङ्गदर्शनम् ‖ सूत्र - ७.४.१९ ‖
विहारदर्शनं विशिष्टस्यानारभ्यवादानां प्रकृत्यर्थतवात् ‖ सूत्र - ७.४.२० ‖

## Chapter 08

### Sub Chapter 01

अथ विशेषलक्षणम् ‖ सूत्र - ८.१.१ ‖
यस्य लिङ्गमर्थसंयोगादभिधानवत् ‖ सूत्र - ८.१.२ ‖
प्रवृत्तित्वादिष्टेः सोमे प्रवृत्तिः स्यात् ‖ सूत्र - ८.१.३ ‖
लिङ्गदर्शनाच्च ‖ सूत्र - ८.१.४ ‖
कृत्स्वविधानाद्वापूर्वत्वम् ‖ सूत्र - ८.१.५ ‖
स्त्रुगभिघारणाभावस्य च नित्यानुवादात् ‖ सूत्र - ८.१.६ ‖
विधिरिति चेत् ‖ सूत्र - ८.१.७ ‖
न वाक्यशेषत्वात् ‖ सूत्र - ८.१.८ ‖
शङ्कतेचानुपोषणात् ‖ सूत्र - ८.१.९ ‖
दर्शनमैष्टिकानां स्यात् ‖ सूत्र - ८.१.१० ‖
इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात् ‖ सूत्र - ८.१.११ ‖
पशौ च लिङ्गदर्शनात् ‖ सूत्र - ८.१.१२ ‖
दैक्षस्य चेतरेषु ‖ सूत्र - ८.१.१३ ‖
ऐकादशिनेषु सौत्यस्य द्वैरशन्यस्य दर्शनात् ‖ सूत्र - ८.१.१४ ‖
तत्प्रवृत्तिर्गणेषु स्यात्प्रतिपशु यूपदर्शनात् ‖ सूत्र - ८.१.१५ ‖
अव्यक्तासु तु सोमस्य ‖ सूत्र - ८.१.१६ ‖
गणेषु द्वादशाहस्य ‖ सूत्र - ८.१.१७ ‖
गव्यस्य च तदादिषु ‖ सूत्र - ८.१.१८ ‖
निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात् ‖ सूत्र - ८.१.१९ ‖
कर्मणस्त्वप्रवृत्तित्वात्फलनियमकर्तृ समुदायस्यानन्वयस्तद्बन्धनत्वात् ‖ सूत्र - ८.१.२० ‖
प्रवृत्तौ चापि तादर्थ्यात् ‖ सूत्र - ८.१.२१ ‖
अश्रुतित्वाच्च ‖ सूत्र - ८.१.२२ ‖
गुणकामेष्वाश्रितत्वात्प्रवृत्तिः स्यात् ‖ सूत्र - ८.१.२३ ‖
निवृत्तिर्वा कर्मभेगात् ‖ सूत्र - ८.१.२४ ‖
अपि वातद्विकारत्वात्क्रत्वर्थत्वात्प्रवृत्तिः स्यात् ‖ सूत्र - ८.१.२५ ‖
एककर्मणि विकल्पो ऽविभागो हि चोदनैकत्वात् ‖ सूत्र - ८.१.२६ ‖
लिङ्गसाधारण्याद्विकल्पः स्यात् ‖ सूत्र - ८.१.२७ ‖
ऐकार्थ्याद्वा नियम्येत पूर्ववत्त्वाद्विकारो हि ‖ सूत्र - ८.१.२८ ‖
अश्रुतित्वान्नेति चेत् ‖ सूत्र - ८.१.२९ ‖
स्याल्लिङ्गभावात् ‖ सूत्र - ८.१.३० ‖
तथा चान्यार्थदर्शनम् ‖ सूत्र - ८.१.३१ ‖
विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात् ‖ सूत्र - ८.१.३२ ‖
तेन च कर्मसंयोगात् ‖ सूत्र - ८.१.३३ ‖
गुणत्वेनदेवताश्रुतिः ‖ सूत्र - ८.१.३४ ‖
हिरण्यमाज्यधर्मस्तेजस्त्वात् ‖ सूत्र - ८.१.३५ ‖
धर्मानुग्रहाच्च ‖ सूत्र - ८.१.३६ ‖
औषधं वा विशदत्वात् ‖ सूत्र - ८.१.३७ ‖
चरुशब्दाच्च ‖ सूत्र - ८.१.३८ ‖
तस्मिंश्च श्रपणश्रुतेः ‖ सूत्र - ८.१.३९ ‖
मधूदके द्रव्यसामान्यात्पयोविकारः स्यात् ‖ सूत्र - ८.१.४० ‖
आज्यं वा वर्णसामान्यात् ‖ सूत्र - ८.१.४१ ‖
धर्मानुग्रहाच्च ‖ सूत्र - ८.१.४२ ‖
पूर्वस्य चाविशिष्टत्वात् ‖ सूत्र - ८.१.४३ ‖

### Sub Chapter 02

वाजिने सोमपूर्वत्वं सौत्रामण्याञ्च ग्रहेषु ताच्छब्ध्यात् ‖ सूत्र - ८.२.१ ‖
अनुवषट्कारच्च ‖ सूत्र - ८.२.२ ‖
समुपहूय भक्षणाच्च ‖ सूत्र - ८.२.३ ‖
क्रयणश्रपणपुरोरुगुपयामग्रहणासादनवासोपनहनञ्च तद्वत् ‖ सूत्र - ८.२.४ ‖
हविषा वा नियम्येत तद्विकारत्वात् ‖ सूत्र - ८.२.५ ‖
प्रशंसा सोमशब्दः ‖ सूत्र - ८.२.६ ‖
वचनानीतराणि ‖ सूत्र - ८.२.७ ‖
व्यपदेशश्च तद्वत् ‖ सूत्र - ८.२.८ ‖
पशुपुरोडाशस्य च लिङ्गदर्शनम् ‖ सूत्र - ८.२.९ ‖
पशुः पुरोडाशविकारः स्याद्देवतासामान्यात् ‖ सूत्र - ८.२.१० ‖
प्रोक्षणातच्च ‖ सूत्र - ८.२.११ ‖
पर्यग्निकरणाच्च ‖ सूत्र - ८.२.१२ ‖
सान्नाय्यं वा तत्प्रभवत्वात् ‖ सूत्र - ८.२.१३ ‖
तस्य च पात्रदर्शनात् ‖ सूत्र - ८.२.१४ ‖
दध्नः स्यान्मूर्तिसामान्यात् ‖ सूत्र - ८.२.१५ ‖
पयो वा कालसामान्यात् ‖ सूत्र - ८.२.१६ ‖
पश्वानन्तर्यात् ‖ सूत्र - ८.२.१७ ‖
द्रवत्वं चाविशिष्टम् ‖ सूत्र - ८.२.१८ ‖
आमिक्षोभयभाव्यत्वाद्भयविकारः स्यात् ‖ सूत्र - ८.२.१९ ‖
एकं वा चोदनैकत्वात् ‖ सूत्र - ८.२.२० ‖
दधिसंघातसामान्यात् ‖ सूत्र - ८.२.२१ ‖
पयो वा तत्प्रधानत्वाल्लोकवद्दध्नस्तदर्थत्वात् ‖ सूत्र - ८.२.२२ ‖
धर्मानुग्रहाच्च ‖ सूत्र - ८.२.२३ ‖
सत्रमहीनश्च द्वादशाहस्तस्योभयथा प्रवृत्तिरैककर्म्यात् ‖ सूत्र - ८.२.२४ ‖
अपि वा यजतिश्रुतेरहीनभूतप्रवृत्तिः स्यात्प्रकृत्या तुल्य शब्दत्वात् ‖ सूत्र - ८.२.२५ ‖
द्विरात्रादीनामेकादशरात्रादहीनत्वं यजतिचोदनात् ‖ सूत्र - ८.२.२६ ‖
त्रयोदशरात्रादिषु सत्रभूतस्तेष्वासनोपायिचोदनात् ‖ सूत्र - ८.२.२७ ‖
लिङ्गाच्च ‖ सूत्र - ८.२.२८ ‖
अन्यतरतो ऽतिरात्रत्वात् पञ्चदशरात्रस्याहीनत्वं कुण्डगयिनामयनस्य च चद्भूतेष्वहूनत्वं कुण्डगयिनामयनस्य दर्शनात् ‖ सूत्र - ८.२.२९ ‖
अहीनवचनाच्च ‖ सूत्र - ८.२.३० ‖
सत्रे वोपायिचोदनात् ‖ सूत्र - ८.२.३१ ‖
सत्रलिङ्गञ्चदर्शयति ‖ सूत्र - ८.२.३२ ‖

### Sub Chapter 03

हविर्गणे परमुत्तरस्य देशसामान्यात् ‖ सूत्र - ८.३.१ ‖
देवतया वा नियम्येतशब्दत्त्वादितरस्याश्रुतित्वात् ‖ सूत्र - ८.३.२ ‖
गणचोदनायां यस्य लिङ्गं तदावृत्तिः प्रतीयेताग्नेयवत् ‖ सूत्र - ८.३.३ ‖
नानाहानि वा संघातत्वात्प्रवृत्तिलिङ्गेन चोदनात् ‖ सूत्र - ८.३.४ ‖
तथा चान्यार्थदर्शनम् ‖ सूत्र - ८.३.५ ‖
कालाभ्यासे ऽपि बादरिः कर्मभेदात् ‖ सूत्र - ८.३.६ ‖
तदावृत्तिं तु जैमिनिरह्नामप्रत्यक्षसंख्यत्वात् ‖ सूत्र - ८.३.७ ‖
संस्थागणेषु तदभ्यासः प्रतीयेत कृतलक्षणग्रहणात् ‖ सूत्र - ८.३.८ ‖
अधिकाराद्वा प्रकृतिस्तस्तद्विशिष्टा स्यादभिधानस्य तन्निमित्तत्वात् ‖ सूत्र - ८.३.९ ‖
गणादुपचयस्तत्प्रकृतित्वात् ‖ सूत्र - ८.३.१० ‖
एकाहाद्वा तेषां समत्वात्स्यात् ‖ सूत्र - ८.३.११ ‖
गायत्रीषु प्राकृतीनामवच्छेदः प्रकृत्त्याधिकारात्संख्या त्वादग्निष्टोमवदव्यतिरेकात्तदाख्यत्वम् ‖ सूत्र - ८.३.१२ ‖

तन्नित्यवच्च प्रथक्सतीषु तद्वचनम् ‖ सूत्र - ८.३.१३ ‖
न विंशतौ दशेति चेत् ‖ सूत्र - ८.३.१४ ‖
ऐकसंख्यमेव स्यात् ‖ सूत्र - ८.३.१४ ‖
गुणाद्वाद्रव्यशब्दः स्यादसर्वविषयत्वात् ‖ सूत्र - ८.३.१६ ‖
गोत्वच्च समन्वयः ‖ सूत्र - ८.३.१७ ‖
संख्यायाश्च शब्दत्वात् ‖ सूत्र - ८.३.१८ ‖
इतरस्याश्रुतित्वाच्च ‖ सूत्र - ८.३.१९ ‖
द्रव्यान्तरे ऽनिवेशादुक्थ्यलोपैर्विशिष्टं स्यात् ‖ सूत्र - ८.३.२० ‖
अशास्त्रलक्षमत्वाच्च ‖ सूत्र - ८.३.२१ ‖
उत्पत्तिनामधेयत्वाद्भतया पृथक्सतीषु स्यात् ‖ सूत्र - ८.३.२२ ‖
वचनमिति चेत् ‖ सूत्र - ८.३.२३ ‖
यावदुक्तम् ‖ सूत्र - ८.३.२४ ‖
अपूर्वे च विकल्पः स्याद्यदि संख्याविधानम् ‖ सूत्र - ८.३.२५ ‖
ऋग्गुणत्वान्नेति चेत् ‖ सूत्र - ८.३.२६ ‖
तथा पूर्ववति स्यात् ‖ सूत्र - ८.३.२७ ‖
गुणावेशश्च सर्वत्र ‖ सूत्र - ८.३.२८ ‖
निष्पन्नग्रहणान्नेति चेत् ‖ सूत्र - ८.३.२९ ‖
तथेहापिस्यात् ‖ सूत्र - ८.३.३० ‖
यदि वाविशये नियमः प्रकृत्युपबन्धाच्छरेष्वपि प्रसिद्धः स्यात् ‖ सूत्र - ८.३.३१ ‖
द्रष्टः प्रयोग इतिचेत् ‖ सूत्र - ८.३.३२ ‖
तथा शरेष्वपि ‖ सूत्र - ८.३.३३ ‖
भत्तयेति चेत् ‖ सूत्र - ८.३.३४ ‖
तथेतरस्मिन् ‖ सूत्र - ८.३.३५ ‖
अर्थस्य चासमाप्तत्वान्न तासामेकदेशे स्यात् ‖ सूत्र - ८.३.३६ ‖

### Sub Chapter 04

दर्विहोमो यज्ञाभिधानं होमसंयोगात् ‖ सूत्र - ८.४.१ ‖
स लौकिकानां स्यात्कर्तुस्तदाख्यत्वात् ‖ सूत्र - ८.४.२ ‖
सर्वेषां वा दर्शनाद्वास्तुहोमे ‖ सूत्र - ८.४.३ ‖
जुहोतिचोदनानां वा तत्संयोगात् ‖ सूत्र - ८.४.४ ‖
द्रव्योपदेशाद्वा गुणाभिधानं स्यात् ‖ सूत्र - ८.४.५ ‖
न लौकिकानामाचारग्रहणत्वाच्छब्दवतां चान्यार्थविधानात् ‖ सूत्र - ८.४.६ ‖
दर्शनाच्चान्यपात्रस्य ‖ सूत्र - ८.४.७ ‖
तथाग्निहविषोः ‖ सूत्र - ८.४.८ ‖
उक्तश्चार्थसम्बन्धः ‖ सूत्र - ८.४.९ ‖
तस्मिन्सोमः प्रवर्तेताव्यक्तत्वात् ‖ सूत्र - ८.४.१० ‖
न वा स्वाहाकारेण संयोगाद्वाषट्कारस्य च निर्देशात्तन्त्रेतेन विप्रतिषेधात् ‖ सूत्र - ८.४.११ ‖
शब्दान्तरत्वात् ‖ सूत्र - ८.४.१२ ‖
लिङ्गदर्शनाच्च ‖ सूत्र - ८.४.१३ ‖
उत्तरार्थस्तु स्वाहाकारो यथा साप्तदश्यं तत्राविप्रतिषिद्धा पुनः प्रवृत्तिर्लिङ्गदर्शनात्पशुवत् ‖ सूत्र - ८.४.१४ ‖
अनुत्तरार्थोवाऽऽथवत्त्वादानर्थक्याद्धि प्राकृतस्योपरोधःस्यात् ‖ सूत्र - ८.४.१५ ‖
न प्रकृतावपीति चेत् ‖ सूत्र - ८.४.१६ ‖
उक्तं समवाये पारदौर्बल्यम् ‖ सूत्र - ८.४.१७ ‖
तच्चोदना वेष्टेः प्रवृत्तित्वाद्विधिः स्यात् ‖ सूत्र - ८.४.१८ ‖
शब्दसानर्थ्याच्च ‖ सूत्र - ८.४.१९ ‖
लिङ्गदर्शनाच्च ‖ सूत्र - ८.४.२० ‖
तत्राभावस्य हेतुत्वाद्गुणार्थेस्याददर्शनम् ‖ सूत्र - ८.४.२१ ‖
विधिरिति चेत् ‖ सूत्र - ८.४.२२ ‖
न वाक्यशेषत्वाद्गुणार्थे च समाधानं नानात्वेनोपपद्यते ‖ सूत्र - ८.४.२३ ‖
येषां वापरयोर्हेमस्तेषां स्यादविरोधात् ‖ सूत्र - ८.४.२४ ‖
तत्रौषधानि चोद्यन्ते तानि स्थानेन गम्येरन् ‖ सूत्र - ८.४.२५ ‖
लिङ्गाद्वा शेषहोमयोः ‖ सूत्र - ८.४.२६ ‖
प्रतिपत्ति तु ते भवतस्तस्मादताद्विकारत्वम् ‖ सूत्र - ८.४.२७ ‖

सन्निपाते विरोधिनामप्रवृत्तिः प्रतीयेत विध्युत्पत्तिव्यवस्थानादर्थस्यापरिणेघत्वाद्वचनाद् अतिदेशः स्यात् ‖ सूत्र - ८.४.१८ ‖

## Chapter 09

### Sub Chapter 01

यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात् ‖ सूत्र - ९.१.१ ‖
संस्कारे युज्यमानानां तादर्थ्यात्तत्प्रयुक्तं स्यात् ‖ सूत्र - ९.१.२ ‖
तेन त्वर्थेन यज्ञस्य संयोगाद्धर्मसम्बन्धस्तस्माद्यज्ञ प्रयुक्तं स्यात्संस्कारस्य तदर्थत्वात् ‖ सूत्र - ९.१.३ ‖
फलदेवतयोश्च ‖ सूत्र - ९.१.४ ‖
न चोदनाती हि ताद्गुण्यम् ‖ सूत्र - ९.१.५ ‖
देवता वा प्रयोजयेदतिथिवद्भोजनस्यतदर्थत्वात् ‖ सूत्र - ९.१.६ ‖
अर्थापत्याच ‖ सूत्र - ९.१.७ ‖
ततश्च तेन सम्बन्धः ‖ सूत्र - ९.१.८ ‖
अपि वा शब्दपूर्वत्वाद्यज्ञकर्म प्रधानं स्याद्गुणत्वे देवताश्रुतिः ‖ सूत्र - ९.१.९ ‖
अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्तस्य प्रीतिप्रधानत्वात् ‖ सूत्र - ९.१.१० ‖
द्रव्यसंख्याहितुसमुदायं वा श्रुतिसंयोगात् ‖ सूत्र - ९.१.११ ‖
अर्थकारिते च द्रव्येण न व्यवस्था स्यात् ‖ सूत्र - ९.१.१२ ‖
अर्थो वा स्यात्प्रयोजनमितरेषामचोदनात्तस्य च गुणभूतत्वात् ‖ सूत्र - ९.१.१३ ‖
अपूर्वत्वादव्यवस्था स्यात् ‖ सूत्र - ९.१.१४ ‖
तत्प्रयुक्तत्वे च धर्मस्य सर्वविषयत्वम् ‖ सूत्र - ९.१.१५ ‖
तद्यक्तस्येति चेत् ‖ सूत्र - ९.१.१६ ‖
नाश्रुतित्वात् ‖ सूत्र - ९.१.१७ ‖
अधिकारादिति चेत् ‖ सूत्र - ९.१.१८ ‖
तुल्येषु नाधिकारः स्यादचोदितश्च सम्बन्धः पृथक्सतां यज्ञार्थेनाभिसम्बन्धस्तस्माद्यज्ञप्रयोजनम् ‖ सूत्र - ९.१.१९ ‖
देशबद्धमुपांशुत्वं तेषां स्याछ्रुतिनिर्देशात्तस्य च तत्रभावात् ‖ सूत्र - ९.१.२० ‖
यज्ञस्य वा तत्संयोगात् ‖ सूत्र - ९.१.२१ ‖
अनुवादश्च तदर्थवत् ‖ सूत्र - ९.१.२२ ‖
प्रणीतादि तथेति चेत् ‖ सूत्र - ९.१.२३ ‖
न यज्ञस्याश्रुतित्वात् ‖ सूत्र - ९.१.२४ ‖
तद्देशानां वा संघातस्यचोदितत्वात् ‖ सूत्र - ९.१.२५ ‖
अग्निधर्मः प्रतिष्टकं संघातात्पौर्णमासीवत् ‖ सूत्र - ९.१.२६ ‖
अग्नेर्वा स्याद्द्रव्यैकत्वादितरासां तदर्थ त्वात् ‖ सूत्र - ९.१.२७ ‖
चोदनासमुदायात्तु पौर्ण मास्यां तथा स्यात् ‖ सूत्र - ९.१.२८ ‖
पत्नीसंयाजान्तत्वं सर्वेषामविशेषात् ‖ सूत्र - ९.१.२९ ‖
लिङ्गाद्वा प्रागुत्तमात् ‖ सूत्र - ९.१.३० ‖
अनुवादो वा दोक्षा यथा नक्तं संस्थापनस्य ‖ सूत्र - ९.१.३१ ‖
स्याद्वानारभ्य विधानादन्ते लिङ्ग विरोधात् ‖ सूत्र - ९.१.३२ ‖
अभ्यासः सामिधेनीनां प्राथम्यात्स्थानधर्मःस्यात् ‖ सूत्र - ९.१.३३ ‖
इष्ट्यावृतौ प्रयाजवदावर्तेतारम्भणीया ‖ सूत्र - ९.१.३४ ‖
सकृद्वाऽरम्भसंयागादेकः पुनरारम्भो यावज्जीवप्रयोगात् ‖ सूत्र - ९.१.३५ ‖
अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्तत्राचोदितमप्राप्तं चोदिताभिधानात् ‖ सूत्र - ९.१.३६ ‖
ततश्चावचनन्तेषामितरार्थं प्रयुज्यते ‖ सूत्र - ९.१.३७ ‖
गुणशब्दस्तथेति चेत् ‖ सूत्र - ९.१.३८ ‖
नसमवायात् ‖ सूत्र - ९.१.३९ ‖
चोदिते तु परार्थत्वाद्विधिवदविकारः स्यात् ‖ सूत्र - ९.१.४० ‖

विकारस्तत्प्रधाने स्यात् ॥ सूत्र - ९.१.४१ ॥
असंयोगात्तदर्थेषु तद्विशिष्टं प्रतीयेत ॥ सूत्र - ९.१.४२ ॥
कर्माभावादेवमिति चेत् ॥ सूत्र - ९.१.४३ ॥
न परर्थत्वात् ॥ सूत्र - ९.१.४४ ॥
लिङ्गविशेषनिर्देशात्समानविधानेष्वप्राप्ता सारस्वती स्त्रीत्वात् ॥ सूत्र - ९.१.४५ ॥
पश्र्वभिधानाद्वा तद्धि चोदनाभूतं पुंविषयं पुनः पशुत्वम् ॥ सूत्र - ९.१.४६ ॥
विशेषो वा तदर्थनिर्देशात् ॥ सूत्र - ९.१.४७ ॥
पशुत्वं चैकशब्द्यात् ॥ सूत्र - ९.१.४८ ॥
यथोक्तं वा सन्निधानात् ॥ सूत्र - ९.१.४९ ॥
आम्नातादन्यदधिकारे वचनाद्विकारः स्यात् ॥ सूत्र - ९.१.५० ॥
द्वैधं वा तुल्यहेतुत्वात्सामान्याद्विकल्पः स्यात् ॥ सूत्र - ९.१.५१ ॥
उपदेशाच्च साम्नः ॥ सूत्र - ९.१.५२ ॥
नियमो वा श्रुतिविशेषादितरत्साप्तदश्यवत् ॥ सूत्र - ९.१.५३ ॥
अगाणाच्छब्दान्यत्वे तथाभूतोपदेशः स्यात् ॥ सूत्र - ९.१.५४ ॥
यत्स्थाने बा तद्गीतिः स्यात्पदान्यत्वप्रधानत्वात् ॥ सूत्र - ९.१.५५ ॥
गानसंयोगाच्च ॥ सूत्र - ९.१.५६ ॥
वचनमिति चेत् ॥ सूत्र - ९.१.५७ ॥
न तत्प्रधानत्वात् ॥ सूत्र - ९.१.५८ ॥

## Sub Chapter 02

सामानि मन्त्रमेके स्मृत्युपदेशाभ्याम् ॥ सूत्र - ९.२.१ ॥
तदुक्तदोषम् ॥ सूत्र - ९.१.२ ॥
कर्म वा विधिलक्षणम् ॥ सूत्र - ९.२.३ ॥
तादृग्द्रव्यं वचनात्पाकयज्ञवत् ॥ सूत्र - ९.२.४ ॥
तत्रीविप्रतिपिद्धो द्रव्यान्तरे व्यतिरेतकः प्रदेशश्च ॥ सूत्र - ९.२.५ ॥
शब्दार्थत्वात्तुनैवं स्यात् ॥ सूत्र - ९.२.६ ॥
परार्थत्वाच्च शब्दानाम् ॥ सूत्र - ९.२.७ ॥
असम्बन्धश्च कर्मणा शब्दयोः पृथगर्थत्वात् ॥ सूत्र - ९.२.८ ॥
संस्कारश्चाप्रकरणे ऽग्निवत्स्यात्प्रयुक्तत्वात् ॥ सूत्र - ९.२.९ ॥
अकार्यत्वाच्च शब्दानामप्रयोगः प्रतीयेत ॥ सूत्र - ९.२.१० ॥
आश्रितत्वाच्च ॥ सूत्र - ९.२.११ ॥
प्रयुज्यत इति चेत् ॥ सूत्र - ९.२.१२ ॥
ग्रहणार्थं प्रयुज्येत ॥ सूत्र - ९.२.१३ ॥
तृचे स्याच्छ्रुतिनिर्देशात् ॥ सूत्र - ९.२.१४ ॥
शब्दार्थत्वाद्विकारस्य ॥ सूत्र - ९.२.१५ ॥
दर्शयति च ॥ सूत्र - ९.२.१६ ॥
वाक्यानां तु विभक्तत्वात्प्रतिशब्दं समाप्तिः स्यात्सं स्कारस्य तदर्थत्वात् ॥ सूत्र - ९.२.१७ ॥
तथा चान्यार्थ दर्शनम् ॥ सूत्र - ९.२.१८ ॥
अनवानोपदेशश्च तद्वत् ॥ सूत्र - ९.२.१९ ॥
अभ्यासेनेतरा श्रुतिः ॥ सूत्र - ९.२.२० ॥
तदभ्यासः समासु स्यात् ॥ सूत्र - ९.२.२१ ॥
लिङ्गदर्शनाच्च ॥ सूत्र - ९.२.२२ ॥
नैमित्तिकं तूत्तरात्वमानन्तर्यात्प्रतीयेत ॥ सूत्र - ९.२.२३ ॥
ऐकार्थ्याच्च तदभ्यासः ॥ सूत्र - ९.२.२४ ॥
प्रागाथिकं तु ॥ सूत्र - ९.२.२५ ॥
प्रगाथे च ॥ सूत्र - ९.२.२७ ॥
लिङ्गदर्शनाव्यतिरेतकाच्च ॥ सूत्र - ९.२.२८ ॥
अर्थैकत्वाद्विकल्पः स्यात् ॥ सूत्र - ९.२.२९ ॥
अर्थैकत्वाद्विकल्पः स्यादृक्सामयोस्तदर्थत्वात् ॥ सूत्र - ९.२.३० ॥
वचनाद्विनियोगः स्यात् ॥ सूत्र - ९.२.३१ ॥
सामप्रदेशे विकारस्तदपेक्षः स्याच्छास्त्रकृत्वात् ॥ सूत्र - ९.२.३२ ॥
वर्णे तु वादरिर्यथाद्रव्यं द्रव्यप्यतिरेकात् ॥ सूत्र - ९.२.३३ ॥
स्तोभस्यैके द्रव्यान्तरे निवृत्तिमृग्वत् ॥ सूत्र - ९.२.३४ ॥
सर्वातिदेशस्तु सामान्याल्लीकवद्विकारः स्यात् ॥ सूत्र - ९.२.३५ ॥
अन्वयञ्चापि दर्शयति ॥ सूत्र - ९.२.३६ ॥
निवृत्तिर्वार्ऽथलोपात् ॥ सूत्र - ९.२.३७ ॥
अन्वयोवार्थवादः स्यात् ॥ सूत्र - ९.२.३८ ॥
अधिकञ्च विवर्णञ्च जैमिनिः स्तोभशब्दत्वात् ॥ सूत्र - ९.२.३९ ॥
धर्मस्यार्थकृतत्वाद्द्रव्यगुणविकारव्यतिक्रमप्रतिषेधे चोजनानुबन्धः समवायात् ॥ सूत्र - ९.२.४० ॥
तदुत्पत्तेस्तु निष्टत्तिस्तत्कृतत्वात्स्यात् ॥ सूत्र - ९.२.४१ ॥
अवेश्येरन्वार्थवत्त्वात्संरकारस्य तदर्थत्वात् ॥ सूत्र - ९.२.४२ ॥
आख्या चैवं तदावेशाद्विकृतौ स्यादपूर्वत्वात् ॥ सूत्र - ९.२.४३ ॥
परार्थेन त्वर्थसामान्यं संस्कारस्य तदर्थत्वात् ॥ सूत्र - ९.२.४४ ॥
क्रियेरन्वार्थनिर्वृत्तेः ॥ सूत्र - ९.२.४५ ॥
एकार्थत्वादविभागः स्यात् ॥ सूत्र - ९.२.४६ ॥
निर्देशाद्वा व्यवतिष्ठेरन् ॥ सूत्र - ९.२.४७ ॥
अप्राकृते तद्विकाराद्विरोधाद्यवतिष्ठेरन् ॥ सूत्र - ९.२.४८ ॥
उभयसाम्नि चैवमेकार्थापत्तेः ॥ सूत्र - ९.२.४९ ॥
स्वार्थत्वाद्वा व्यवस्था स्यात्प्रकृतिवत् ॥ सूत्र - ९.२.५० ॥
पार्वणहोमयोस्तवप्रवृत्तिः समुदायार्थसंयोगात्तगभीज्याहि ॥ सूत्र - ९.२.५१ ॥
कालस्येति चेत् ॥ सूत्र - ९.२.५२ ॥
नाप्रकरणत्वात् ॥ सूत्र - ९.२.५३ ॥ मन्त्रवर्णाच्च ॥ सूत्र - ९.२.५४ ॥
तदभावे ऽग्निवगिति चेत् ॥ सूत्र - ९.२.५५ ॥
नाधिकारकत्वात् ॥ सूत्र - ९.२.५६ ॥
उभयोरविशेषात् ॥ सूत्र - ९.२.५७ ॥
यदभीज्या वा तद्विषयौ ॥ सूत्र - ९.२.५८ ॥
प्रयाजे ऽपीति चेत् ॥ सूत्र - ९.२.५९ ॥
नाचीदितत्वात् ॥ सूत्र - ९.२.६० ॥

## Sub Chapter 03

प्रकृतौ यथोत्पत्तिवचनमर्थानां तथोत्तरस्यां ततौ तत्प्रकृतित्वात्वादर्थे चाकार्यत्वात् ॥ सूत्र - ९.३.१ ॥
लिङ्गदर्शनाच्च ॥ सूत्र - ९.३.२ ॥
जातिनैमित्तिकं यथास्थानम् ॥ सूत्र - ९.३.३ ॥
अविकारमेके ऽनार्षत्वात् ॥ सूत्र - ९.३.४ ॥
लिङ्गदक्शनाच्च ॥ सूत्र - ९.३.५ ॥
निकारो वातदुक्तहेतुः ॥ सूत्र - ९.३.६ ॥
लिङ्गं मन्त्रचिकीर्षार्थम् ॥ सूत्र - ९.३.७ ॥
नियमो वोभयभागित्वात् ॥ सूत्र - ९.३.८ ॥
लौकिके दोषसंयोगादपवृक्ते हिचोद्यते निमित्तेन प्रकृतौ स्यादभागित्वात् ॥ सूत्र - ९.३.९ ॥
अन्यायस्त्वविकारेणा द्रष्टप्रतिघातित्वादविशेषाच्च तेनास्य ॥ सूत्र - ९.३.१० ॥
विकारो वा तदर्थत्वात् ॥ सूत्र - ९.३.११ ॥
अपित्वन्यायसम्बन्धात्प्रकृतिवत्परेष्वपियथार्थं स्यात् ॥ सूत्र - ९.३.१२ ॥
यथार्थं त्वन्यायस्याचोदितत्वात् ॥ सूत्र - ९.३.१३ ॥
छन्दसि तु यथादृष्टम् ॥ सूत्र - ९.३.१४ ॥
विप्रतिपत्तौ विकल्पः स्यात्तत्सत्वाद्गुणे त्वन्यायकल्पनैकदेशत्वात् ॥ सूत्र - ९.३.१५ ॥
प्रकरणविशेषाच्च ॥ सूत्र - ९.३.१६ ॥
अर्थाभावात्तु नैवं स्याद्गुणनात्रमितरत् ॥ सूत्र - ९.३.१७ ॥
द्यावोस्तथेति चेत् ॥ सूत्र - ९.३.१८ ॥

नोत्पत्तिशब्दत्वात् ‖ सूत्र - ९.३.१९ ‖
अपूर्वे त्वविकारो ऽप्रदेशात्प्रतीयेत ‖ सूत्र - ९.३.२० ‖
विकृतौ चापि तद्वचनात् ‖ सूत्र - ९.३.२१ ‖
अध्रिगुः सवनीयेषु तद्वत्समानविधानाश्चेत् ‖ सूत्र - ९.३.२२ ‖
प्रतिनिधौ चाविकारात् ‖ सूत्र - ९.३.२३ ‖
अनाम्नानादशब्दत्वमभावाच्चेतरस्य स्यात् ‖ सूत्र - ९.३.२४ ‖
तादर्थ्याद्वा तदाख्यंस्यात्संस्कारैरविशिष्चत्वात् ‖ सूत्र - ९.३.२५ ‖
उक्तञ्च तत्त्वमस्य ‖ सूत्र - ९.३.२६ ‖
संसर्गिषु चार्थस्यास्थितपरिमाणत्वात् ‖ सूत्र - ९.३.२७ ‖
लिङ्गदर्शनाच्च ‖ सूत्र - ९.३.२८ ‖
एकधेत्येकसंयोगादभ्यासेनाभिधानं स्यात् ‖ सूत्र - ९.३.२९ ‖
अविकारो वा बहूनामेककर्मवत् ‖ सूत्र - ९.३.३० ‖
सकृत्त्वं चैकध्यं स्यादेकत्वात्त्वचो ऽनभिप्रेतं तत्प्रकृतित्वात्परेष्वभ्यासेन विवृद्धावभिधानां स्यात् ‖ सूत्र - ९.३.३१ ‖

मेधपतित्वं स्वामिदेवतस्य समवायात्सर्वत्र च प्रयुक्तत्वात्तस्याचान्यायनिगदत्वात्सर्वत्रैवाविकारः स्यात् ‖ सूत्र - ९.३.३२ ‖
अपि वा द्विसमवायो ऽर्थान्यत्वे यथासंख्यं प्रयोगः स्यात् ‖ सूत्र - ९.३.३३ ‖
स्वामिनो वैकशब्द्यादुत्कर्षो देवतायां स्यात्पत्न्यां द्वितीयशब्दः स्यात् ‖ सूत्र - ९.३.३४ ‖
देवता तु तदाशीष्ट्वात्सम्प्राप्तत्वात्स्वात्स्वामिन्यनर्थिका स्यात् ‖ सूत्र - ९.३.३५ ‖
उत्सर्गाच्च भक्त्यातस्मिन्पतित्वं स्यात् ‖ सूत्र - ९.३.३६ ‖
उत्कृष्येतैकसंयुक्तो द्विदेवते सम्भवात् ‖ सूत्र - ९.३.३७ ‖
एकस्तु समवायात्तस्य तल्लक्षणत्वात् ‖ सूत्र - ९.३.२८ ‖
संसर्गित्वाच्च तस्मात्तेन विकल्पः स्यात् ‖ सूत्र - ९.३.३९ ‖
एकत्वेपि गुणानपायात् ‖ सूत्र - ९.३.४० ‖
नियमो बहुदेवते विकारः स्यात् ‖ सूत्र - ९.३.४१ ‖
विकल्पो वा प्रकृतिवत् ‖ सूत्र - ९.३.४२ ‖
अर्थान्तरे विकारः स्याद्देवतापृथक्त्वादेकाभिसमवायात्स्यात् ‖ सूत्र - ९.३.४३ ‖

Sub Chapter 04

षड्विंशतिरभ्यासेन पशुगणे तत्प्रकृतित्वाद्गाणस्य प्रविभक्तत्वादविकारे हि तासामकात्स्न्येनाभिसम्बन्धो विकारान्न समासः
स्यादसंयोगाच्च सर्वाभिः ‖ सूत्र - ९.४.१ ‖
अभ्यासे ऽपि तथेति चेत् ‖ सूत्र - ९.४.२ ‖
न गुणादर्थकृतत्वाच्च ‖ सूत्र - ९.४.३ ‖
समासे ऽपि तथेति चेत् ‖ सूत्र - ९.४.४ ‖
नासम्भवात् ‖ सूत्र - ९.४.५ ‖
स्वाभिश्च वचनं प्रकृतौ तथेह स्यात् ‖ सूत्र - ९.४.६ ‖
वङ्क्रीणान्तु प्रधानत्त्वात्समासेनाभिधानं स्यात्प्राधान्यमध्रिगोस्तदर्थत्वात् ‖ सूत्र - ९.४.७ ‖
तासां च कृत्स्नवचनात् ‖ सूत्र - ९.४.८ ‖
अपि त्वसन्निपातित्वात्पत्नीवदाम्नातेनाभिधानं स्यात् ‖ सूत्र - ९.४.९ ‖
विकारस्तु प्रदेशत्वाद्यजमानवत् ‖ सूत्र - ९.४.१० ‖
अपूर्वत्वात्तथा पत्न्याम् ‖ सूत्र - ९.४.११ ‖
अनाम्नातस्त्वविकारात्सङ्ख्यासु सर्वगामित्वात् ‖ सूत्र - ९.४.१२ ‖
सङ्खाया त्वेवं प्रधानं स्याद्वङ्क्रयः पुनः प्रधानम् ‖ सूत्र - ९.४.१३ ‖
अनाम्नातवचनमवचनेन हि वङ्क्रीणां स्यान्निर्देशः ‖ सूत्र - ९.४.१४ ‖
अभ्यासो वाविकारात्स्यात् ‖ सूत्र - ९.४.१५ ‖
पशुस्त्वेवं प्राधानंस्यादभ्यासस्य तन्निमित्तत्वात्तस्मात्समासशब्दः स्यात् ‖ सूत्र - ९.४.१६ ‖
अश्वस्य चतुस्त्रिंशत्तस्य वचनाद्वैशेषिकम् ‖ सूत्र - ९.४.१७ ‖
तत्प्रतिषिध्य प्रकृतिर्नियुज्यते सा चतुस्त्रिंशद्वाच्यत्वात् ‖ सूत्र - ९.४.१८ ‖
ऋगावास्यादाम्नातत्वादविकल्पश्च न्याय्यः ‖ सूत्र - ९.४.१९ ‖
तस्यां तु वचनादैरवत्पदविकारः स्यात् ‖ सूत्र - ९.४.२० ‖
सर्वप्रतिषेधो वासंयागात्पदेन स्यात् ‖ सूत्र - ९.४.२१ ‖
वनिष्ठुसन्निधानादुरूकेण वपाभिधानम् ‖ सूत्र - ९.४.२२ ‖
प्रशसास्याभिधानम् ‖ सूत्र - ९.४.२३ ‖
बाहुप्रशंसा वा ‖ सूत्र - ९.४.२४ ‖
श्येन-शला-कश्यप- कवषस्त्रेकपर्णेष्वाकृतिवचनं प्रसिद्धसन्निधानात् ‖ सूत्र - ९.४.२५ ‖
कात्स्न्यं वा स्यात्तथाभावात् ‖ सूत्र - ९.४.२६ ‖
अध्रिगोश्च तदर्थत्वात् ‖ सूत्र - ९.४.२७ ‖
प्रासङ्गिके प्रायश्चत्तं न विद्यते परार्थत्वात्तदर्थे हिविधीयते ‖ सूत्र - ९.४.२८ ‖
धारणे च परार्थत्वात् ‖ सूत्र - ९.४.२९ ‖
क्रियार्थत्वादितरेषु कर्म स्यात् ‖ सूत्र - ९.४.३० ‖
न तूत्पन्ने यस्य चोदनाप्राप्तकालत्वात् ‖ सूत्र - ९.४.३१ ‖
प्रदानदर्शनं श्रपणे तद्धर्मभोजनार्थत्वात्संसर्गाच्च मधूदकवत् ‖ सूत्र - ९.४.३२ ‖
संस्कारप्रतिषेधश्च तद्वत् ‖ सूत्र - ९.४.३३ ‖
तत्प्रतिषेधे च तथाभूतस्य वर्जनात् ‖ सूत्र - ९.४.३४ ‖
अधर्मत्वमप्रदानात्प्रणीतार्थे विधानादतुल्यत्वादसंसर्गः ‖ सूत्र - ९.४.३५ ‖
परो नित्यानुवादः स्यात् ‖ सूत्र - ९.४.३६ ‖
विहितप्रतिषेधो वा ‖ सूत्र - ९.४.३७ ‖
वर्जने गुणभावित्वात्तदुक्तप्रतिषेधात्स्यात्कारणात्केवलाशनम् ‖ सूत्र - ९.४.३८ ‖
व्रतधर्माच्चलेपवत् ‖ सूत्र - ९.४.३९ ‖
रसप्रतिषेधो वा पुरुषधर्मत्वात् ‖ सूत्र - ९.४.४० ‖
अभ्युदये दोगापनयः स्वधर्मा स्यात्प्रवृत्तत्वात् ‖ सूत्र - ९.४.४१ ‖
शृतोपदेशाच्च ‖ सूत्र - ९.४.४२ ‖
अपनयो वार्थान्तरे विधानाच्चरुपयोवत् ‖ सूत्र - ९.४.४३ ‖
लक्षणार्था शृतश्रुतिः ‖ सूत्र - ९.४.४४ ‖
श्रयणानां त्वपूर्वत्वात्प्रदानार्थेविधानं स्यात् ‖ सूत्र - ९.४.४५ ‖
गुणो वा श्रयणार्थत्वात् ‖ सूत्र - ९.४.४६ ‖
अर्थवादश्च तदथवत् ‖ सूत्र - ९.४.४७ ‖
श्रुतेश्च तत्प्रधानत्वत् ‖ सूत्र - ९.४.४८ ‖
अर्थवादश्च तदथवत ‖ सूत्र - ९.४.४९ ‖
संस्कारं प्रति भावाच्च तस्मादप्यप्रधानम् ‖ सूत्र - ९.४.५० ‖
पर्यग्निकृतानामुत्सर्गे तादर्थ्यमुपधानवत् ‖ सूत्र - ९.४.५१ ‖
शेषप्रतिषेधो वार्ऽथाभावादिडान्तवत् ‖ सूत्र - ९.४.५२ ‖
पूर्वत्वाच्च शब्दस्य संस्थापयतीति चाप्रबृत्तेनोपपद्यते ‖ सूत्र - ९.४.५३ ‖

प्रबृत्तेर्यज्ञहेतुत्वात्प्रतिषेधे संस्काराणामकर्म स्यात्तत्कारितत्वाद्यथा प्रयाजप्रतिषेधे ग्रहणमाजेयस्य ‖ सूत्र - ९.४.५४ ‖
क्रिया वा स्यादवच्छेदादकर्म सर्वहानं स्यात् ‖ सूत्र - ९.४.५५ ‖
आज्यसंस्थाप्रतिनिधिः स्याद्द्रब्योत्सर्गात् ‖ सूत्र - ९.४.५६ ‖
समाप्तिवचनात् ‖ सूत्र - ९.४.५७ ‖
चोदना वा कर्मोत्सर्गादन्यैः स्यादविशिष्टत्वात् ‖ सूत्र - ९.४.५८ ‖
अनिज्यां च वनस्पतेः प्रसिद्धान्तेन दर्शयति ‖ सूत्र - ९.४.५९ ‖
संस्था तद्देवतत्वात्स्यात् ‖ सूत्र - ९.४.६० ‖

Chapter 10

Sub Chapter 01

विधेः प्रकरणान्तरे ऽतिदेशात्सर्वकर्म स्यात् ‖ सूत्र - १०.१.१ ‖
अपि वाभिधानसंस्कारद्रव्यर्थे क्रियेत तादर्थ्यात् ‖ सूत्र - १०.१.२ ‖
तेषामप्रत्यक्षविशिष्टत्वात् ‖ सूत्र - १०.१.३ ‖
इष्टिरारम्भसंयोगादङ्गभूतान्निवर्तेतारमभस्य प्रधानसंयोगात् ‖ सूत्र - १०.१.४ ‖
प्रधानाच्चान्यसंयुक्तात्कसर्वारम्भान्निवर्तेतानङ्गत्वात् ‖ सूत्र - १०.१.५ ‖

तस्यां तु स्यात्प्रयाजवत् ॥ सूत्र - १०.१.६ ॥
न वाङ्गभूतत्वात् ॥ सूत्र - १०.१.७ ॥
एकवाक्यत्वाच्च ॥ सूत्र - १०.१.८ ॥
कर्म च द्रव्यसंयोगार्थमर्थाभावान्निवर्तेत तादर्थ्यं श्रुतिसंयोगात् ॥ सूत्र - १०.१.९ ॥
स्थाणौ तु देशमात्रत्वादनिबृत्तिः प्रतीयेत ॥ सूत्र - १०.१.१० ॥
अपि वा शेषभूतत्वात्संस्कारः प्रतीयेत ॥ सूत्र - १०.१.११ ॥
समाख्यानं च तद्वत् ॥ सूत्र - १०.१.१२ ॥
मन्त्रवर्णश्च तद्वत् ॥ सूत्र - १०.१.१३ ॥
प्रयाजे च तन्न्यायत्वात् ॥ सूत्र - १०.१.१४ ॥
लिङ्गदर्शनाच्च ॥ सूत्र - १०.१.१५ ॥
तथाज्यभागाग्निरपीति चेत् ॥ सूत्र - १०.१.१६ ॥
व्यपदेशाद्देवतान्तरम् ॥ सूत्र - १०.१.१७ ॥
समत्वाच्च ॥ सूत्र - १०.१.१८ ॥
पशावपीति चेत् ॥ सूत्र - १०.१.१९ ॥
न तदभूतवचनात् ॥ सूत्र - १०.१.२० ॥
लिङ्गदर्शनाच्च ॥ सूत्र - १०.१.२१ ॥
गुणो वा स्यात्कपालवद्गुणभूतविकाराच्च ॥ सूत्र - १०.१.२२ ॥
अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेत स्वाहाकारवदङ्गानामर्थसंयोगात् ॥ सूत्र - १०.१.२३ ॥
व्यृद्धवचनञ्च विप्रतिपत्तौ तदर्थत्वात् ॥ सूत्र - १०.१.२४ ॥
गुणेपीति चेत् ॥ सूत्र - १०.१.२५ ॥
नासंहानात्करालवत् ॥ सूत्र - १०.१.२६ ॥
ग्रहाणाञ्च सम्प्रतिपत्तौ तद्वचनं तदर्त्वात् ॥ सूत्र - १०.१.२७ ॥
ग्रहाभावे च तद्वचनम् ॥ सूत्र - १०.१.२८ ॥
देवतायाश्च हेतुत्वं प्रसिद्धं तेन दर्शयति ॥ सूत्र - १०.१.२९ ॥
अविरुद्वोपपत्तिरर्थापत्तेः शृतवद्भूतविकारः स्यात् ॥ सूत्र - १०.१.३० ॥
स द्व्यर्थः स्याद्भयोः श्रुतिभूतत्वाद्विप्रतिपत्तौ तादर्थ्याद्विकारत्लमुक्तं तस्यार्थवादत्वम् ॥ सूत्र - १०.१.३१ ॥
विप्रतिपत्तौ तासामाख्याविकारः स्यात् ॥ सूत्र - १०.१.३२ ॥
अभ्यासो वा प्रयाजवदेकदेशो ऽन्यदेवत्यः ॥ सूत्र - १०.१.३३ ॥
चरुर्हविर्विकारः स्यादिज्यासंयोगात् ॥ सूत्र - १०.१.३४ ॥
प्रसिद्धग्रहणत्वाच्च ॥ सूत्र - १०.१.३५ ॥
ओदनो वान्नसंयोगात् ॥ सूत्र - १०.१.३६ ॥
न द्व्यर्थत्वात् ॥ सूत्र - १०.१.३७ ॥
कपालविकारो वा विशये ऽर्थोपपत्तिभ्याम् ॥ सूत्र - १०.१.३८ ॥
गुणमुख्यविशेषाच्च ॥ सूत्र - १०.१.३९ ॥
तच्छ्रुतौ चान्यहविष्ठात् ॥ सूत्र - १०.१.४० ॥
लिङ्गदर्शनाच्च ॥ सूत्र - १०.१.४१ ॥
ओदनो वा प्रयुक्तत्वात् ॥ सूत्र - १०.१.४२ ॥
अपूर्वव्यपदेशाच्च ॥ सूत्र - १०.१.४३ ॥
तथा च लिङ्गदर्शनम् ॥ सूत्र - १०.१.४४ ॥
स कपाले प्रकृत्या स्यादन्यस्य चाश्रुतित्वात् ॥ सूत्र - १०.१.४५ ॥
एकस्मिन्वाविप्रतिषेधात् ॥ सूत्र - १०.१.४६ ॥

न वार्ऽथान्चरसंयोगादपूपे पाकसंयुक्तं धारणार्थं तरौ भवति तत्रार्थात्पात्रलाभः स्यादन्यमो ऽविशेषात् ॥ सूत्र - १०.१.४७ ॥
चरौ वा लिङ्गदर्शनात् ॥ सूत्र - १०.१.४८ ॥
तस्मिन्पेषणमनर्थलोपात्स्यात् ॥ सूत्र - १०.१.४९ ॥
अक्रिया वा अपूपहेतुत्वात् ॥ सूत्र - १०.१.५० ॥
पिण्डार्थत्वाच्च संयवनम् ॥ सूत्र - १०.१.५१ ॥
संवपनञ्च तादर्थ्यात् ॥ सूत्र - १०.१.५२ ॥
सन्तापनमधःश्रपणात् ॥ सूत्र - १०.१.५३ ॥
उपधानं च तादर्थ्यात् ॥ सूत्र - १०.१.५४ ॥
पृथुश्र्लक्ष्णे वानपूपत्वात् ॥ सूत्र - १०.१.५५ ॥
अभ्यूहश्चोपरिपाकार्थत्वात् ॥ सूत्र - १०.१.५६ ॥
तथावज्वलनम् ॥ सूत्र - १०.१.५७ ॥
व्युद्धृत्यासादनं च प्रकृतावश्रुतित्वात् ॥ सूत्र - १०.१.५८ ॥

## Sub Chapter 02

कृष्णलेष्वर्थलोपाकः स्यात् ॥ सूत्र - १०.२.१ ॥
स्याद्वा प्रत्यक्षशिष्टत्वात्प्रदानवत् ॥ सूत्र - १०.२.२ ॥
उपस्तरणाभिघारणयोपमृतार्थत्वादकर्म स्यात् ॥ सूत्र - १०.२.३ ॥
क्रियेत वार्ऽथवादत्वात्तयोः संसर्गबेतुत्वात् ॥ सूत्र - १०.२.४ ॥
अकर्म वा चतुर्भिराप्तिवचनात्सह पूर्णं पुनश्चतुरवत्तम् ॥ सूत्र - १०.२.५ ॥
क्रिया वा मुख्यावदानपरिमाणात्सामन्यात्तद्गुणत्वम् ॥ सूत्र - १०.२.६ ॥
तेषां चैकावदानत्वात् ॥ सूत्र - १०.२.७ ॥
आप्तिः संख्या समानत्वात् ॥ सूत्र - १०.२.८ ॥
सतोस्त्वाप्तिवचनं व्यर्थम् ॥ सूत्र - १०.२.९ ॥
विकल्पस्त्वेकावदानत्वात् ॥ सूत्र - १०.२.१० ॥
सर्वविकारे त्वभ्यसानर्थक्यं हविषो हीतरस्य स्यादपि वा स्विष्टकृतः स्यादितरस्यान्याय्यत्वात् ॥ सूत्र - १०.२.११ ॥
अकर्म वा संसर्गार्थनिवृत्तस्मादाप्तिसमर्थत्वं ॥ सूत्र - १०.२.१२ ॥
भक्षाणां तु प्रत्यर्थत्वादकर्म स्यात् ॥ सूत्र - १०.२.१३ ॥
स्याद्वा निर्धानदर्शनात् ॥ सूत्र - १०.२.१४ ॥
वचनं वाज्यभक्षस्य प्रकृतौ स्यादभागित्वात् ॥ सूत्र - १०.२.१५ ॥
वचनं वा हिरण्यस्य प्रदानवदाज्यस्. गुणभूतत्वात् ॥ सूत्र - १०.२.१६ ॥
एकधोपहारे सहत्वं ब्रह्मभक्षाणां प्रकृतौ विहितत्वात् ॥ सूत्र - १०.२.१७ ॥
सर्वत्वं च तेषामधिकारात्स्यात् ॥ सूत्र - १०.२.१८ ॥
पुरिषापनयो वा तेषामवाच्यत्वात् ॥ सूत्र - १०.२.१९ ॥
पुरुषापनयात्स्वकालत्वम् ॥ सूत्र - १०.२.२० ॥
एकार्थत्वादविभागः स्यात् ॥ सूत्र - १०.२.२१ ॥
ऋत्विद्जानं धर्ममात्रार्थं स्याद्ददातिसामर्थ्यात् ॥ सूत्र - १०.२.२२ ॥
परिक्रयार्थं वा कर्मसंयोगाल्लोकवत् ॥ सूत्र - १०.२.२३ ॥
दक्षिणायुक्तवचनाच्च ॥ सूत्र - १०.२.२४ ॥
नचान्येनानम्येत परिक्रीयात्कर्मणः परार्थत्वात् ॥ सूत्र - १०.२.२५ ॥
परिक्रीतवचनाच्च ॥ सूत्र - १०.२.२६ ॥
सनिवन्येव भृति वचनात् ॥ सूत्र - १०.२.२७ ॥
नैष्कर्तृकेण समस्तवाच्च ॥ सूत्र - १०.२.२८ ॥
शेषभक्षाश्च तद्वत् ॥ सूत्र - १०.२.२९ ॥
संस्कारो वा द्रव्यस्य परार्थत्वात् ॥ सूत्र - १०.२.३० ॥
शेषे च समत्वात् ॥ सूत्र - १०.२.३१ ॥
स्वामिनि त दर्शनात्तत्सामान्यादितरेषान्तथात्वम् ॥ सूत्र - १०.२.३२ ॥
तथा चान्यार्थदर्शनम् ॥ सूत्र - १०.२.३३ ॥
वरणमृत्विजामानमनार्थत्वात्सत्रे न स्यात्स्वकर्मत्वात् ॥ सूत्र - १०.२.३४ ॥
परिक्रयश्च तादर्थ्यात् ॥ सूत्र - १०.२.३५ ॥
प्रतिषेघश्च कर्मवत् ॥ सूत्र - १०.२.३६ ॥
स्याद्वाप्रासर्पिकस्य धर्ममात्रत्वात् ॥ सूत्र - १०.२.३७ ॥
न दक्षिणाशब्दात्तस्मान्नित्यानुवादः स्यात् ॥ सूत्र - १०.२.३८ ॥
उदवसानीयः सत्रधर्मा स्यात्तदङ्गत्वात्तत्र दाने धर्ममात्रं स्यात् ॥ सूत्र - १०.२.३९ ॥
न त्वेतत्प्रकृतित्वाद्विभक्तचोदितत्वाच्च ॥ सूत्र - १०.२.४० ॥
तेषां तु वचवादि्द्वयज्ञवत्सहप्रयोगः स्यात् ॥ सूत्र - १०.२.४१ ॥

तत्रान्यानृत्विजो वृणीरन् ॥ सूत्र - १०.२.४२ ॥
एकैकशस्तवविप्रतिषेधात्प्रकृतेश्चैकसंयोगात् ॥ सूत्र - १०.२.४३ ॥
कामेष्टौ च दानशब्दात् ॥ सूत्र - १०.२.४४ ॥
वचनं वा सत्रत्वात् ॥ सूत्र - १०.२.४५ ॥
द्वेष्ये च चोदनाद्दक्षिणापनयात् ॥ सूत्र - १०.२.४६ ॥
अस्थियज्ञो ऽविप्रतिषेधादितरेषां स्याद्विप्रतिषेधादस्थ्नाम् ॥ सूत्र - १०.२.४७ ॥
यावादुक्तमुपयोगः स्यात् ॥ सूत्र - १०.२.४८ ॥
यदि तु वचनात्तेषां जपसंस्कारमर्थलुप्तं सेष्टि तदर्थत्वात ॥ सूत्र - १०.२.४९ ॥
काम्यानि तु न विद्यन्ते कामा ज्ञामाद्यथेतरस्यानुच्यमानानि ॥ सूत्र - १०.२.५० ॥
ईहार्थाश्चाभावात्सूक्तवाकवत् ॥ सूत्र - १०.२.५१ ॥
स्युर्वार्ऽथवादत्वात् ॥ सूत्र - १०.२.५२ ॥
नेच्छाभिधानात्तदभावादितरस्मिन् ॥ सूत्र - १०.२.५३ ॥
स्युर्वा होतृकामाः ॥ सूत्र - १०.२.५४ ॥
न तदाषीष्ट्वात् ॥ सूत्र - १०.२.५५ ॥
सर्वस्वारस्यदिष्टगतौ समापनं न विद्यते कर्मणो जीवसंयोगात् ॥ सूत्र - १०.२.५६ ॥
स्याद्वोभयोः प्रत्क्षशिष्टत्वात् ॥ सूत्र - १०.२.५७ ॥
गते करमास्थियज्ञवत् ॥ सूत्र - १०.२.५८ ॥
जीवत्यवचनमायुराशिषस्तदर्थत्वात् ॥ सूत्र - १०.२.५९ ॥
वचनं वा भागित्वात्प्राग्यथोक्तात् ॥ सूत्र - १०.२.६० ॥
क्रिया स्याद्धर्ममात्राणाम् ॥ सूत्र - १०.२.६१ ॥
गुणलोपे च मुख्यस्य ॥ सूत्र - १०.२.६२ ॥
मुष्टिलोपात्तु संख्यालोपस्तद्गुणत्वात्स्यात् ॥ सूत्र - १०.२.६३ ॥
न निर्वापशेषत्वात् ॥ सूत्र - १०.२.६४ ॥
संख्यातु चोदनां प्रति सामान्यात्तद्विकारः संयोगाच्च परं मुष्टेः ॥ सूत्र - १०.२.६५ ॥
न चोदनाभिसम्बन्धात्प्रक्रतौ संस्कारयोगात् ॥ सूत्र - १०.२.६६ ॥
औतपत्तिके तु द्रव्यतो विकारः स्यादकार्यात्वात् ॥ सूत्र - १०.२.६७ ॥
नैमितेतिके तु कार्यत्वात्प्रकृतेः स्यात्त दापत्तेः ॥ सूत्र - १०.२.६८ ॥
विप्रतिषेधे तद्वचनात्प्राकृतगुणलोपः स्यात्तेनच कर्मसंयोगात् ॥ सूत्र - १०.२.६९ ॥
परेषां प्रतिषेधः स्यात् ॥ सूत्र - १०.२.७० ॥
प्रतिषेधाच्च ॥ सूत्र - १०.२.७१ ॥
अर्थाभावे संस्कारत्वं स्यात् ॥ सूत्र - १०.२.७२ ॥
अर्थेन च विपर्यासे तादर्यात्तत्त्वमेव स्यात् ॥ सूत्र - १०.२.७३ ॥

## Sub Chapter 03

विकृतौ शब्दवत्त्वात्प्रधानस्य गुणानामधिकोत्पत्तिः सन्निधानात् ॥ सूत्र - १०.३.१ ॥
प्रकृतिवत्तस्य चानुपरोधः ॥ सूत्र - १०.३.२ ॥
चोदनाप्रभुत्वाच्च ॥ सूत्र - १०.३.३ ॥

प्रधानं त्वङ्गसंयुक्तं तथाभूतमपूर्वं स्यात्तस्य विध्युपलक्षणात्सर्वो हि पूर्ववान्विधिरविशेषात्प्रवर्तितः ॥ सूत्र - १०.३.४ ॥
न चाङ्गविधिरनङ्गे स्यात् ॥ सूत्र - १०.३.५ ॥
कर्मणश्चै कशब्द्यात्सन्निधाने विधेराख्यासंयोगो गुणेनतद्विकारः स्याच्छब्दस्य विधिगामित्वाद्गुणस्य चोपदेश्यत्वात् ॥ सूत्र - १०.३.६ ॥
अकार्यत्वाच्च नाम्नः ॥ सूत्र - १०.३.७ ॥
तुल्याच प्रभुता गुणे ॥ सूत्र - १०.३.८ ॥
सर्वमेवंप्रधानमिति चेत् ॥ सूत्र - १०.३.९ ॥
तथाभूतेनसंयोगाद्यथार्थविधयः स्युः ॥ सूत्र - १०.३.१० ॥
विधित्वं चाविशिष्ठ मेवं प्राकृतानां वैकृतैः कर्मणायोगात्तस्मात्सर्वं प्रधानार्थम् ॥ सूत्र - १०.३.११ ॥
समत्वाच्च तदुत्पत्तेः संस्कारैरधिकारः स्यात् ॥ सूत्र - १०.३.१२ ॥
हिरण्यगर्भः पूर्वस्य मन्त्रलिङ्गात् ॥ सूत्र - १०.३.१३ ॥
प्रकृत्यनुपरोधाच्च ॥ सूत्र - १०.३.१४ ॥
उत्तरस्य वा मन्त्रार्थित्वात् ॥ सूत्र - १०.३.१५ ॥
विध्यतिदेशात्तच्छ्रुतौ बिकारः स्याद्गुणानामुपदेश्यत्वात् ॥ सूत्र - १०.३.१६ ॥
पूर्वस्मिश्चामन्त्रत्वदर्शनात् ॥ सूत्र - १०.३.१७ ॥
संस्कारे तु क्रियान्तर तस्य विधयकत्वात् ॥ सूत्र - १०.३.१८ ॥
प्रकृत्यनुपरोधाच्च ॥ सूत्र - १०.३.१९ ॥
विधेस्तु तत्र भावात्सन्देहे यस्य शब्दस्तदर्थः स्यात् ॥ सूत्र - १०.३.२० ॥
संस्कारसामर्थ्याद्गुणसंयोगाच्च ॥ सूत्र - १०.३.२१ ॥
विप्रतिषेधात्क्रियाप्रकरणे स्यात् ॥ सूत्र - १०.३.२२ ॥
षड्भिर्ःदीक्षयतीति तासां मन्त्रविकारः श्रुतिसंयोगात् ॥ सूत्र - १०.३.२३ ॥
अभ्यासात्तु प्रधानस्य ॥ सूत्र - १०.३.२४ ॥
आवृत्त्या मन्त्रकर्म स्यात् ॥ सूत्र - १०.३.२५ ॥
अपिवा प्रतिमन्त्रत्वात्प्राकृतानामहानिः स्यादन्यायश्च कृते ऽभ्यासः ॥ सूत्र - १०.३.२६ ॥
पौर्वापर्यञ्चाभ्यासे नोपपद्यते नैमित्तिकत्वात् ॥ सूत्र - १०.३.२७ ॥
तत्प्रथक्त्वं च दर्शयति ॥ सूत्र - १०.३.२८ ॥
न चाविशेषाद्व्यपदेशः स्यात् ॥ सूत्र - १०.३.२९ ॥
अग्न्याधेयस्य नैमित्तिके गुणविकारे दक्षिणादानमधिकं स्याद्वाक्यसंयोगात् ॥ सूत्र - १०.३.३० ॥
शैष्ठत्वाच्चेतरासां यथास्थानम् ॥ सूत्र - १०.३.३१ ॥
विकारस्त्वप्रकरणे हि काम्यानि ॥ सूत्र - १०.३.३२ ॥
शङ्कते च निवृत्तेरुभयत्वंहिश्रूयते ॥ सूत्र - १०.३.३३ ॥
वासो वत्सञ्च सामान्यात् ॥ सूत्र - १०.३.३४ ॥
अर्थापत्तेस्तद्धर्माः स्यान्निमित्ताख्याभिसंयोगात् ॥ सूत्र - १०.३.३५ ॥
दाने पाको ऽर्थलक्षणः ॥ सूत्र - १०.३.३६ ॥
पाकस्थ चान्नकारित्त्वात् ॥ सूत्र - १०.३.३७ ॥
तथाभिघारणस्य ॥ सूत्र - १०.३.३८ ॥
द्रव्यविधिसन्निधौ सङ्ख्या तेषां गुणत्वात्स्यात् ॥ सूत्र - १०.३.३९ ॥
समत्वात्तु गुणानामेकस्य श्रुतिसंयोगात् ॥ सूत्र - १०.३.४० ॥
यस्य वा सन्निधाने स्याद्वाक्यतोह्यभिसम्बन्धः ॥ सूत्र - १०.३.४१ ॥
असंयुक्तास्तु तुल्यवदितराभिर्विधीयन्ते तस्मात्सर्वाधिकारः स्यात् ॥ सूत्र - १०.३.४२ ॥
असंयोगाद्विधिश्रुतावेकजाताधिकारः स्याच्छ्रुत्याकोपात्क्रतोः ॥ सूत्र - १०.३.४३ ॥
शब्जार्थश्चापि लोकवत् ॥ सूत्र - १०.३.४४ ॥
सापशूनामुत्पत्तितो विभागात् ॥ सूत्र - १०.३.४५ ॥
अनियमो ऽविशेषात् ॥ सूत्र - १०.३.४६ ॥
भागित्वाद्वा गवां स्यात् ॥ सूत्र - १०.३.४७ ॥
प्रत्ययात् ॥ सूत्र - १०.३.४८ ॥
लिङ्गदर्शनाच्च ॥ सूत्र - १०.३.४९ ॥
तत्र दानं विभागेन प्रदानानां पृथक्त्वात् ॥ सूत्र - १०.३.५० ॥
परिक्राच्च लोकवत् ॥ सूत्र - १०.३.५१ ॥
विभागं चापि दर्शयति ॥ सूत्र - १०.३.५२ ॥
समं स्यादश्रुतित्वात् ॥ सूत्र - १०.३.५३ ॥
अपि वा कर्मवैषम्यात् ॥ सूत्र - १०.३.५४ ॥

अतुल्याः स्युः परिक्रये विषमाख्या विधिश्रुतौ परिक्रयान्न कर्मण्युपपद्यते दर्शनाद्विशेषस्य तथाभ्युदये ॥ सूत्र - १०.३.५५ ॥
तस्य धेनुरिति गवां प्रकृतौ विभक्तचोदितत्वात्सामान्यात्तद्विकारः स्याद्यथेष्टिर्गुणशब्देन ॥ सूत्र - १०.३.५६ ॥
सर्वस्य वा क्रतुसंयोगादेकत्वं दक्षिणार्थस्य गुणानां कार्यैकत्वादर्थे विकृतौ श्रुतिभूतं स्यात्तस्मात् समवायाद्धिकर्मभिः ॥ सूत्र - १०.३.५७ ॥
चोदनानामनाश्रयाल्लिङ्गेन नियमः स्यात् ॥ सूत्र - १०.३.५८ ॥
एका पञ्चेति धेनुवत् ॥ सूत्र - १०.३.५९ ॥

त्रिवत्सश्च ‖ सूत्र - १०.३.६० ‖
तथा च लिङ्गदर्शनम् ‖ सूत्र - १०.३.६१ ‖
एके ति श्रुतिभूतत्वात्सङ्ख्यया गवां लिङ्गविशेषेण ‖ सूत्र - १०.३.६२ ‖
प्राकाशौ तथेति चेत् ‖ सूत्र - १०.३.६३ ‖
अपि त्ववयवार्थत्वाद्विभक्तप्रकृतित्वाद्गुणेदन्ताविकारः स्यात् ‖ सूत्र - १०.३.६४ ‖
धेनुवच्चाश्वदक्षिणा स ब्रह्मण इति पुरुषापनयो यथा हिरण्यस्य ‖ सूत्र - १०.३.६५ ‖
एके तु कर्तृसंयोगात्स्रग्वत्तस्य लिङ्गविशेषेण ‖ सूत्र - १०.३.६६ ‖
अपि वा तदधिकाराद्धिरण्यवद्विकारः स्यात् ‖ सूत्र - १०.३.६७ ‖
तथा च सोमचमसः ‖ सूत्र - १०.३.६८ ‖
सर्वविकारो वा क्रत्वर्थे प्रतिषेधात् पशूनां ‖ सूत्र - १०.३.६९ ‖
ब्रह्मदाने ऽविशिष्टमिति चेत् ‖ सूत्र - १०.३.७० ‖
उत्सर्गस्य क्रत्वर्थत्वात्प्रतिषिद्धस्य कर्मस्यान्न च गौणः प्रयोजनमर्थः स दक्षिणानां स्यात् ‖ सूत्र - १०.३.७१ ‖
यदि तु ब्रह्मणस्तदूनं तद्विकारः स्यात् ‖ सूत्र - १०.३.७२ ‖
सर्वं वा पुरुषापनयात्तासां क्रतुप्रधानत्वात् ‖ सूत्र - १०.३.७३ ‖
यजुर्युक्ते ऽध्वर्योर्दक्षिणा विकारः स्यात् ‖ सूत्र - १०.३.७४ ‖
अपि वा श्रुतिभूतत्वात्सर्वासां तस्य भागो नियम्यते ‖ सूत्र - १०.३.७५ ‖

## Sub Chapter 04

प्रकृतिलिङ्गासंयागात्कर्मसंस्कारंविकृतावधिकं स्यात् ‖ सूत्र - १०.४.१ ‖
चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसन्निधानात् ‖ सूत्र - १०.४.२ ‖
सर्वत्र तु ग्रहाम्नानमधिकं स्यात्प्रकृतिवत् ‖ सूत्र - १०.४.३ ‖
अधिकैश्चैकवाक्यत्वात् ‖ सूत्र - १०.४.४ ‖
लिङ्गदर्शनाच्च ‖ सूत्र - १०.४.५ ‖
प्राजापत्येषु चाम्नानात् ‖ सूत्र - १०.४.६ ‖
आमने लिङ्गदर्शनात् ‖ सूत्र - १०.४.७ ‖
उपगेषु शरवत्स्यात्प्रकृतिलिङ्गसयोगात् ‖ सूत्र - १०.४.८ ‖
आनर्थक्यात्त्वधिकं स्यात् ‖ सूत्र - १०.४.९ ‖
संस्कारे चान्यसंयोगात् ‖ सूत्र - १०.४.१० ‖
प्रयाजवदिति चेत् ‖ सूत्र - १०.४.११ ‖
नार्थान्यत्वात् ‖ सूत्र - १०.४.१२ ‖
आच्छादने त्वैकार्थ्यात्प्राकृतस्य विकारः स्यात् ‖ सूत्र - १०.४.१३ ‖
अधिकं वान्यार्थत्वात् ‖ सूत्र - १०.४.१४ ‖
समुच्चयं च दर्शयति ‖ सूत्र - १०.४.१५ ‖
सामस्वर्थान्तरश्रुतेरविकारः प्रतीयेत ‖ सूत्र - १०.४.१६ ‖
अर्थे त्वश्रूयमाणे शेषत्वात्प्राकृतस्य विकारः स्यात् ‖ सूत्र - १०.४.१७ ‖
सर्वेषामविशेषात् ‖ सूत्र - १०.४.१८ ‖
एकस्या वा श्रुतिसामर्थ्यात्प्रकृतेश्चाविकारात् ‖ सूत्र - १०.४.१९ ‖
स्तोमविबृद्धौ त्वधिकं स्यादविबृद्धौ द्रव्यविकारः स्यादितरस्याश्रुतित्वाच्च ‖ सूत्र - १०.४.२० ‖
पवमाने स्यातां तस्मिन्नावापोद्वापदर्शनात् ‖ सूत्र - १०.४.२१ ‖
वचनानित्वपूर्वत्वात् ‖ सूत्र - १०.४.२२ ‖
विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदना ‖ सूत्र - १०.४.२३ ‖
शेषाणां वा चोदनैकत्वात्तस्मात्सर्वत्र श्रूयते ‖ सूत्र - १०.४.२४ ‖
तथोत्तरस्यान्ततौ तत्प्रकृतित्वात् ‖ सूत्र - १०.४.२५ ‖
प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यात् ‖ सूत्र - १०.४.२६ ‖
अविकारो वार्ऽथशब्दानपायात्स्याद्द्रव्यवत् ‖ सूत्र - १०.४.२७ ‖

तथारम्भासमवायद्वा चोदितेनाभिधानं स्यादर्थस्य श्रुतिसमवायित्वादवचने च गुणशाःस्त्रमनर्थकंस्यात् ‖ सूत्र - १०.४.२८ ‖
द्रव्येष्वारम्भगामित्वादर्थे विकारः सामर्थ्यात् ‖ सूत्र - १०.४.२९ ‖
बुधन्वान्पवमानवद्विशेषनिर्देशात् ‖ सूत्र - १०.४.३० ‖
मन्त्रनिशेषनिर्देशान्न देवताविकारः स्यात् ‖ सूत्र - १०.४.३१ ‖
विधिनिगमभेदात्प्रकृतौ तत्प्रकृतित्वाद्विकृतावपिभेदः स्यात् ‖ सूत्र - १०.४.३२ ‖
यथोक्तं वा विप्रतिपत्तेर्न चोदना ‖ सूत्र - १०.४.३३ ‖
स्विष्टकृद्देवतान्यत्वे तच्छब्दत्वान्निवर्तेत ‖ सूत्र - १०.४.३४ ‖
संयोगो वार्ऽथापत्तेरभिधानस्य कर्मजत्वात् ‖ सूत्र - १०.४.३५ ‖
सगुणस्य गुणलोपे निगमेषु यावदुक्तं स्यात् ‖ सूत्र - १०.४.३६ ‖
सर्वस्य वैककर्म्यात् ‖ सूत्र - १०.४.३७ ‖
स्विष्टकृदावापिको ऽनुयाजे स्यात्प्रयोजनवदङ्गानामर्थसंयोगात् ‖ सूत्र - १०.४.३८ ‖
अन्वाहेति च शस्त्रवत्कर्म स्याच्चोदनान्तरात् ‖ सूत्र - १०.४.३९ ‖
संस्कारो वा चोदितस्य शब्दस्य वचनार्थत्वात् ‖ सूत्र - १०.४.४० ‖
स्याद्गुणार्थत्वात् ‖ सूत्र - १०.४.४१ ‖
मनोतायां तु वचनादविकारः स्यात् ‖ सूत्र - १०.४.४२ ‖
पृष्ठार्थे ऽन्यद्रथन्तरात्तद्योनिपूर्वत्वादृचां प्रविभक्तत्वात् ‖ सूत्र - १०.४.४३ ‖
स्वयोनौ वा सर्वाख्यत्वात् ‖ सूत्र - १०.४.४४ ‖
यूपवदिति चेत् ‖ सूत्र - १०.४.४५ ‖
न कर्मसंयोगात् ‖ सूत्र - १०.४.४६ ‖
कार्यत्वादुत्तरयोर्यथाप्रकृति ‖ सूत्र - १०.४.४७ ‖
समानदेवते वा तृचस्याविभागात् ‖ सूत्र - १०.४.४८ ‖
ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यात् ‖ सूत्र - १०.४.४९ ‖
उभयपानात्पृषदाज्ये दध्नःस्यादुपलक्षणं निगमेषु पातव्यस्योपलक्षणात् ‖ सूत्र - १०.४.५० ‖
न वा परार्थत्वाद्यज्ञपतिवत् ‖ सूत्र - १०.४.५१ ‖
सायाद्वा आवाहनस्य तादर्थ्यात् ‖ सूत्र - १०.४.५२ ‖
न वा संस्कारशब्दत्वात् ‖ सूत्र - १०.४.५३ ‖
स्याद्वाद्रव्याभिधानात् ‖ सूत्र - १०.४.५४ ‖
दध्नस्तुगुणभूतत्वादाज्यपानिगमाः स्युर्गुणत्वं श्रुतेराज्यप्रधानत्वात् ‖ सूत्र - १०.४.५५ ‖
दधिवा स्यात्प्रधानमाज्ये प्रथमान्त्यसंयोगात् ‖ सूत्र - १०.४.५६ ‖
अपिवाज्यप्रधानत्वाद्गुणार्थे व्यपदेशे भक्त्या संस्कारशब्दः स्यात् ‖ सूत्र - १०.४.५७ ‖
अपि वाख्याविकारत्वात्तेन स्यादुपलक्षणम् ‖ सूत्र - १०.४.५८ ‖
न वा स्याद्गुणशास्त्रत्वात् ‖ सूत्र - १०.४.५९ ‖

## Sub Chapter 05

आनुपूर्व्यवतामेकदेशग्रहणेष्वागमवदन्त्यलोपः स्यात् ‖ सूत्र - १०.५.१ ‖
लिङ्गदर्शनाच्च ‖ सूत्र - १०.५.२ ‖
विकल्पो वा समत्वात् ‖ सूत्र - १०.५.३ ‖
क्रमादुपजनो ऽन्तेस्यात् ‖ सूत्र - १०.५.४ ‖
लिङ्गमविशिष्टं सङ्ख्याया हि तद्वचनम् ‖ सूत्र - १०.५.५ ‖
आदितो वा प्रवृत्तिः स्यादारम्भस्य तदादित्वाद्वचनादन्त्यत्यविधिः स्यात् ‖ सूत्र - १०.५.६ ‖
एकत्रिके तृचादिषु माध्यन्दिनेछंन्दसां श्रुतिभूतत्वात् ‖ सूत्र - १०.५.७ ‖
आदितो वा तन्न्यायत्वादितरस्यानुमानिकत्वात् ‖ सूत्र - १०.५.८ ‖
यथानिवेशञ्च प्रकृतिवत्सङ्ख्यामात्रविकारत्वात् ‖ सूत्र - १०.५.९ ‖
त्रिकस्तृचे धुर्ये स्यात् ‖ सूत्र - १०.५.१० ‖
एकस्यां वा स्तोमस्यावृत्तिधर्मत्वात् ‖ सूत्र - १०.५.११ ‖
चोदनासु त्वपूर्वत्वाल्लिङ्गेन धर्मनियमः स्यात् ‖ सूत्र - १०.५.१२ ‖
प्राप्तिस्तु रात्रिशब्दसम्बन्धात् ‖ सूत्र - १०.५.१३ ‖
अपूर्वासु तु सङ्ख्यासु विकल्पः स्यात्सर्वासामर्थवत्त्वात् ‖ सूत्र - १०.५.१४ ‖

स्तोमविवृद्धौ प्राकृतानामभ्यासेन सङ्ख्यापूरणमविकारात्सङ्ख्यायां गुणशब्दत्वादन्यस्य चाश्रुतित्वात् ‖ सूत्र - १०.५.१५ ‖
आगमेन वाभ्यासस्याश्रुतित्वात् ‖ सूत्र - १०.५.१६ ‖
सङ्ख्यायाश्च पृथक्त्वनिवेशात् ‖ सूत्र - १०.५.१७ ‖

पराक्शब्दत्वात् ॥ सूत्र - १०.५.१८ ॥
उक्ताविकाराच्च ॥ सूत्र - १०.५.१९ ॥
अश्रुतित्वान्नेति चेत् ॥ सूत्र - १०.५.२० ॥
स्यादर्थचोदितानां परिमाणशास्त्रम् ॥ सूत्र - १०.५.२१ ॥
आवापवचनं चाभ्यासे नोपपद्यते ॥ सूत्र - १०.५.२२ ॥
साम्नाञ्चोत्पत्तिसामर्थ्यात् ॥ सूत्र - १०.५.२३ ॥
धूर्येष्वपीति चेत् ॥ सूत्र - १०.५.२४ ॥
नावृत्तिधर्मत्वात् ॥ सूत्र - १०.५.२५ ॥
वह्ष्पवमाने न ऋगागमः सामैकत्वात् ॥ सूत्र - १०.५.२६ ॥
अभ्यासेन तु संख्यापूरणं सामिधेनीष्वभ्यासप्रकृतित्वात् ॥ सूत्र - १०.५.२७ ॥
अविशेषान्नेति चेत् ॥ सूत्र - १०.५.२८ ॥
स्यात्तद्धर्मत्वात् प्रकृतिवदभ्यस्येताऽसङ्ख्यापूरणात् ॥ सूत्र - १०.५.२९ ॥
यावदुक्तं वा कृतपरिमाणत्वात् ॥ सूत्र - १०.५.३० ॥
अधिकानाञ्च दर्शनात् ॥ सूत्र - १०.५.३१ ॥
कर्मस्वपीति चेत् ॥ सूत्र - १०.५.३२ ॥
न चोदितत्वात् ॥ सूत्र - १०.५.३३ ॥
षोडशिनो वैकृतत्वं तत्र कृत्स्नविधानात् ॥ सूत्र - १०.५.३४ ॥
प्रकृतौ चाभावदर्शनात् ॥ सूत्र - १०.५.३५ ॥
अयज्ञवचनाच्च ॥ सूत्र - १०.५.३६ ॥
प्रकृतौ वा शिष्टत्वात् ॥ सूत्र - १०.५.३७ ॥
प्रकृतिदर्शनाच्च ॥ सूत्र - १०.५.३८ ॥
आम्नातंपरिसङ्ख्यार्थम् ॥ सूत्र - १०.५.३९ ॥
उक्तमभावदर्शनम् ॥ सूत्र - १०.५.४० ॥
गुणादयज्ञत्वम् ॥ सूत्र - १०.५.४१ ॥
तस्याग्रणाद्ग्रहणम् ॥ सूत्र - १०.५.४२ ॥
उक्थ्याच्च वचनात् ॥ सूत्र - १०.५.४३ ॥
तृतीयसवने वचनात्स्यात् ॥ सूत्र - १०.५.४४ ॥
अनभ्यासे पराक्शब्दस्य तादर्थ्यात् ॥ सूत्र - १०.५.४५ ॥
उक्थ्यविच्छेदवचनत्वाच्च ॥ सूत्र - १०.५.४६ ॥
आग्रयणाद्वा पराक्शब्दस्य देशवाचत्वात्पुनराधेयवत् ॥ सूत्र - १०.५.४७ ॥
विच्छेदः स्तोमसामान्यात् ॥ सूत्र - १०.५.४८ ॥
उक्थ्याग्निष्टोमसंयागादस्तुतशस्त्रः स्यात्सतिहि संस्थान्यत्वम् ॥ सूत्र - १०.५.४९ ॥
संस्तुतशस्त्रो वा तदङ्गत्वात् ॥ सूत्र - १०.५.५० ॥
लिङ्गदर्शनाच्च ॥ सूत्र - १०.५.५१ ॥
वचनात्संस्थान्यत्वम् ॥ सूत्र - १०.५.५२ ॥
अभावादतिरात्रेषुगृह्यते ॥ सूत्र - १०.५.५३ ॥
अन्वयो वानारभ्य वानारभ्य विधानात् ॥ सूत्र - १०.५.५४ ॥
चतुर्थेचतुर्थे ऽहन्यहीनस्य गृह्यतैत्यभ्यासेन प्रतीयेतभोजनवत् ॥ सूत्र - १०.५.५५ ॥
अपि वा सङ्ख्यावत्त्वान्नानाहीनेषौ गृह्यते पक्षवदेकस्मिन्संख्यार्थभावात् ॥ सूत्र - १०.५.५६ ॥
भोजने तत्सङ्ख्यं स्यात् ॥ सूत्र - १०.५.५७ ॥
जगक्साम्नि सामाभावागृक्तः सामतदाख्यं स्यात् ॥ सूत्र - १०.५.५८ ॥
उभयसाम्नि नैमित्तिकं विकल्पेन समत्वात्स्यात् ॥ सूत्र - १०.५.५९ ॥
मुख्येन वा नियम्येत ॥ सूत्र - १०.५.६० ॥
निमित्तविघाताद्वा क्रतुयुक्तस्य कर्म स्यात् ॥ सूत्र - १०.५.६१ ॥
ऐन्द्रवायवस्याग्रवचनादादितः प्रतिकर्षः स्यात् ॥ सूत्र - १०.५.६२ ॥
अपि वा धर्माविशेषात्तद्धर्माणां स्वस्थाने प्रतरणादग्रत्वमुच्यते ॥ सूत्र - १०.५.६३ ॥
धारासंयोगाच्च ॥ सूत्र - १०.५.६४ ॥
कामसंयोगे तु वचनादादितः प्रतिकर्षः स्यात् ॥ सूत्र - १०.५.६५ ॥
तद्देशानां वाग्रसंयोगात्तद्युक्तं कामशास्त्रं स्यान्नित्यसंयोगात् ॥ सूत्र - १०.५.६६ ॥
परेषु चाग्रशब्दः पूर्ववत्स्यात्तदादिषु ॥ सूत्र - १०.५.६७ ॥
प्रतिकर्षो वा नित्यार्थेनाग्रस्य तदसंयोगात् ॥ सूत्र - १०.५.६८ ॥
प्रतिकर्षञ्च दर्शयति ॥ सूत्र - १०.५.६९ ॥
पुरस्तादैन्द्रवायवस्याग्रस्य कृतदेशत्वात् ॥ सूत्र - १०.५.७० ॥
तुल्यधर्मत्वाच्च ॥ सूत्र - १०.५.७१ ॥
तथा च लिङ्गदर्शनम् ॥ सूत्र - १०.५.७२ ॥
सादनं चापि शेषत्वात् ॥ सूत्र - १०.५.७३ ॥
लिङ्ग दर्शनाच्च ॥ सूत्र - १०.५.७४ ॥
प्रदानं चापि सादनवत् ॥ सूत्र - १०.५.७५ ॥
न वा प्रधानत्वाच्छेषत्वात्सादनन्तथा ॥ सूत्र - १०.५.७६ ॥
त्र्यनीकायां न्यायोक्तेष्वाम्नानं गुणार्थं स्यात् ॥ सूत्र - १०.५.७७ ॥
अपि वाहर्गणेष्वग्निवत्समानविधानं स्यात् ॥ सूत्र - १०.५.७८ ॥
द्वादशाहस्य व्यूढसमूढत्वं पृष्ठवत्समानविधानं स्यात् ॥ सूत्र - १०.५.७९ ॥
व्यूढो वा लिङ्गदर्शनात्समूढविकारः स्यात् ॥ सूत्र - १०.५.८० ॥
कामसंयोगात् ॥ सूत्र - १०.५.८१ ॥
तस्योभयथा प्रवृत्तिरैककर्म्यात् ॥ सूत्र - १०.५.८२ ॥
एकादशिनीवत् त्र्यनीका परिवृत्तिः स्यात् ॥ सूत्र - १०.५.८३ ॥
स्वस्थानविवृद्धिर्वाह्नामप्रत्यक्षसङ्ख्यत्वात् ॥ सूत्र - १०.५.८४ ॥
पृष्ठ्यावृत्तौ चाग्रयणस्य दर्शनात् त्रयस्त्रिंशे परिवृत्तौ पुनरैन्द्रवायवः स्यात् ॥ सूत्र - १०.५.८५ ॥
वचनात्परिवृत्तिरैकादशिनेषु ॥ सूत्र - १०.५.८६ ॥
लिङ्गदर्शनाच्च ॥ सूत्र - १०.५.८७ ॥
छन्दोव्यतिक्रमाद्व्यूढे भक्षपवमानपरिधिकरालस्यम न्त्राणां यथोत्पत्तिवचनमूहवत्स्यात् ॥ सूत्र - १०.५.८८ ॥

## Sub Chapter 06

एकर्चं स्थानि यज्ञे स्युः स्वाध्यायवत् ॥ सूत्र - १०.६.१ ॥
तृचे वा लिङ्गदर्शनात् ॥ सूत्र - १०.६.२ ॥
स्वर्द्दशं प्रतिवीक्षणं कालमात्रं परार्थत्वात् ॥ सूत्र - १०.६.३ ॥
पृष्ठ्यस्य युगपद्विधेरेकाहवद्द्विसामत्वम् ॥ सूत्र - १०.६.४ ॥
विभक्ते वा समस्तविधानात्तद्विभागेविप्रतिषिद्धम् ॥ सूत्र - १०.६.५ ॥
समासस्त्वेकादशिनेषु तत्प्रकृतित्वात् ॥ सूत्र - १०.६.६ ॥
विहारप्रतिषेधाच्च ॥ सूत्र - १०.६.७ ॥
श्रुतितो वा लोकवद्विभागः स्यात् ॥ सूत्र - १०.६.८ ॥
विहाप्रकृतित्वाच्च ॥ सूत्र - १०.६.९ ॥
विशये च तदासत्तेः ॥ सूत्र - १०.६.१० ॥
त्रयस्तथेति चेत् ॥ सूत्र - १०.६.११ ॥
न समत्वात्प्रयाजवत् ॥ सूत्र - १०.६.१२ ॥
सर्वपृष्ठे पृष्ठशब्दात्तोषां स्यादेकदेशत्वं पृष्ठस्य कृतदेशत्वात् ॥ सूत्र - १०.६.१३ ॥
विधेस्तु विप्रकर्षः स्यात् ॥ सूत्र - १०.६.१४ ॥
वैरूपसामा क्रतुसंयागात् त्रिवृदेवदेकसामा स्यात् ॥ सूत्र - १०.६.१५ ॥
पृष्ठार्थे वा प्रकृतिलिङ्गसंयोगात् ॥ सूत्र - १०.६.१६ ॥
त्रिवृद्वदिति चेत् ॥ सूत्र - १०.६.१७ ॥
न प्रकृतावकृत्स्नसंयोगात् ॥ सूत्र - १०.६.१८ ॥
विधित्वान्नेति चेत् ॥ सूत्र - १०.६.१९ ॥
स्याद्विशये तन्नयायत्वात्कर्माविभागात् ॥ सूत्र - १०.६.२० ॥
प्रकृतेश्चाविकारात् ॥ सूत्र - १०.६.२१ ॥
त्रिवृति सङ्ख्यात्वेन सर्वसंख्याविकारः स्यात् ॥ सूत्र - १०.६.२२ ॥
स्तोमस्य वा तल्लिङ्गत्वात् ॥ सूत्र - १०.६.२३ ॥
उभयसाम्नि विश्वजिद्वद्विभागः स्यात् ॥ सूत्र - १०.६.२४ ॥

पृष्ठार्थे वातदर्थत्वात् ‖ सूत्र - १०.६.२५ ‖
लिङ्गदर्शनाच्च ‖ सूत्र - १०.६.२६ ‖
पृष्ठे रसभोजनमावृत्ते संस्थिते त्रयस्त्रिंशे ऽहनि स्यात्तदानन्तर्यात्प्रकृतिवत् ‖ सूत्र - १०.६.२७ ‖
अन्ते वा कृतकालत्वात् ‖ सूत्र - १०.६.२८ ‖
अभ्यासे च तदभ्यासः कर्मणः पुनः प्रयोगात् ‖ सूत्र - १०.६.२९ ‖
अन्ते वा कृतकालत्वात् ‖ सूत्र - १०.६.३० ‖
आवृत्तिश्चु व्यवाये कालभेदात् स्यात् ‖ सूत्र - १०.६.३१ ‖
मधु न दीक्षिता ब्रह्मचारित्वात् ‖ सूत्र - १०.६.३२ ‖
प्राश्येत यज्ञार्थत्वात् ‖ सूत्र - १०.६.३३ ‖
मानसमहरन्तरं स्याद्भेदव्यपदेशात् ‖ सूत्र - १०.६.३४ ‖
तेन च संस्तवात् ‖ सूत्र - १०.६.३५ ‖
अहरन्ताच्च परेण चोदना ‖ सूत्र - १०.६.३६ ‖
पक्षे सङ्ख्या सहस्रवत् ‖ सूत्र - १०.६.३७ ‖
अहरङ्ग वांशुवच्चोदनाभावात् ‖ सूत्र - १०.६.३८ ‖
दशमविसर्गवचनाच्च ‖ सूत्र - १०.६.३९ ‖
दशमे ऽहनीति च तद्गुणशास्त्रात् ‖ सूत्र - १०.६.४० ‖
सङ्ख्यासामञ्जस्यात् ‖ सूत्र - १०.६.४१ ‖
पश्चतिरेके चैकस्य भावात् ‖ सूत्र - १०.६.४२ ‖
स्तुतिव्यपदेशमङ्गेनविप्रतिषिद्धं व्रतवत् ‖ सूत्र - १०.६.४३ ‖
वचनादतदन्तत्वम् ‖ सूत्र - १०.६.४४ ‖
सत्रमेकः प्रकृतिवत् ‖ सूत्र - १०.६.४५ ‖
वचनात्तु बहूनां स्यात् ‖ सूत्र - १०.६.४६ ‖
अपदेशः स्यादिति चेत् ‖ सूत्र - १०.६.४७ ‖
नैकव्यपदेशात् ‖ सूत्र - १०.६.४८ ‖
सन्निवापञ्च दर्शयति ‖ सूत्र - १०.६.४९ ‖
बहूनामिति चैकस्मिन्विशेषवचनं व्यर्थम् ‖ सूत्र - १०.६.५० ‖
अन्ये स्युर् ऋत्विजः प्रकृतिवत् ‖ सूत्र - १०.६.५१ ‖
अपि वा यजमानाः स्युर् ऋत्विजामभिधानसंयोगात्तेषां स्याद्यजमानत्वम् ‖ सूत्र - १०.६.५२ ‖
कर्तृ संस्कारो वचनादाधातृवदिति चेत् ‖ सूत्र - १०.६.५३ ‖
स्याद्विशये तन्नयायत्वात्प्रकृतिवत् ‖ सूत्र - १०.६.५४ ‖
स्वाम्याख्याः स्युर्गृहपतिवदिति चेत् ‖ सूत्र - १०.६.५५ ‖
न प्रसिद्धग्रहणत्वादसंयुक्तस्य तद्धर्मेण ‖ सूत्र - १०.६.५६ ‖
दीक्षितादीक्षितव्यपदेशश्च नोपपद्यते ऽर्थयोर्नित्यभावित्वात् ‖ सूत्र - १०.६.५७ ‖ अदक्षिणत्वाच्च ‖ सूत्र - १०.६.५८ ‖
द्वादशाहस्य सत्रत्वमासनोपायिचोदनेन यजमानबहुत्वेन च सत्रशब्दाभिसंयोगात् ‖ सूत्र - १०.६.५९ ‖
यजतिचोदनादहीनत्वं स्वामिनां चास्थितपरिमाणत्वात् ‖ सूत्र - १०.६.६० ‖
अहीने दक्षिणाशास्त्रं गुणत्वात्प्रत्यह कर्मभेदः स्यात् ‖ सूत्र - १०.६.६१ ‖
सर्वस्य वैककर्म्यात् ‖ सूत्र - १०.६.६२ ‖
पृषदाज्यवद्वाह्नां गुणशास्त्रं स्यात् ‖ सूत्र - १०.६.६३ ‖
ज्यौतिष्टोम्यस्तु दक्षिणाः सर्वासामेककर्मत्वात्प्रकृतिवत्तस्मान्नासां विकारः स्यात् ‖ सूत्र - १०.६.६४ ‖
द्वादशाहे तु वचनात्प्रत्यहं दक्षिणाभेदस्तत्प्रकृतित्वात्परेषु तासां संख्याविकारः स्यात् ‖ सूत्र - १०.६.६५ ‖
परिक्रयाविभागाद्वा समस्तस्य विकारः स्यात् ‖ सूत्र - १०.६.६६ ‖
भेदस्तु गुणसंयोगात् ‖ सूत्र - १०.६.६७ ‖
प्रत्यहं सर्वसंस्कारः प्रकृतिवत्सर्वासां सर्वशेषत्वात् ‖ सूत्र - १०.६.६८ ‖
एकार्थत्वान्नेति चेत् ‖ सूत्र - १०.६.६९ ‖
स्याद्त्पत्तौ कालभेदात् ‖ सूत्र - १०.६.७० ‖
विभज्य तु संस्कारवचनाद्द्वादशाहवत् ‖ सूत्र - १०.६.७१ ‖
लिङ्गेन द्रव्यनिर्देशे सर्वत्र प्रत्ययः स्याल्लिङ्गस्य सर्वगामित्वादाग्नेयवत् ‖ सूत्र - १०.६.७२ ‖
यावदर्थंवार्थ शेषत्वादल्पेन परिमाणं स्यात्तस्मिंश्च लिङ्गसामर्थ्यम् ‖ सूत्र - १०.६.७३ ‖
आग्नेये कृत्स्नविधिः ‖ सूत्र - १०.६.७४ ‖
ऋजीषस्य प्रधानत्वादहर्गणे सर्वस्य प्रतिपत्तिः स्यात् ‖ सूत्र - १०.६.७५ ‖
वाससि मानोपावहरणे प्रकृतौ सोमस्य वचनात् ‖ सूत्र - १०.६.७६ ‖
तत्राहर्गणे ऽर्थाद्वासःप्रकृतिः स्यात् ‖ सूत्र - १०.६.७७ ‖
मानं प्रत्युत्पादयेत्प्रकृतौ तेन दर्शनाद्पावहरणस्य ‖ सूत्र - १०.६.७८ ‖
हरणे वा श्रुत्यसंयोगादर्थाद्विकृतौ तेन ‖ सूत्र - १०.६.७९ ‖

## Sub Chapter 07

पशोरेकहविष्ट्वं समस्तचोदितत्वात् ‖ सूत्र - १०.७.१ ‖
प्रत्यङ्गं वा ग्रहवदङ्गानां पृथक्कल्पनत्वात् ‖ सूत्र - १०.७.२ ‖
हविर्भेदात्कर्मणे ऽभ्यासस्तस्मात्तेभ्यो ऽवदानं स्यात् ‖ सूत्र - १०.७.३ ‖
आज्यभागवद्वा विर्देशात्परिसंख्यास्यात् ‖ सूत्र - १०.७.४ ‖
तेषां वा द्व्यवदानत्वं विवक्षन्नभिनिर्दिशेतपशोः पञ्चावदानत्वात् ‖ सूत्र - १०.७.५ ‖

अंसशिरोनूकसक्थिप्रतिषेधश्च तदन्यपरिसङ्ख्याने ऽनर्थकः स्यात्प्रदानत्वात्तेषां निरवदानप्रतिषेधः स्यात् ‖ सूत्र - १०.७.६ ‖
अपि वा परिसङ्ख्या स्यादनवदानीयशब्दत्वात् ‖ सूत्र - १०.७.७ ‖
अब्राह्मणे च दर्शनात् ‖ सूत्र - १०.७.८ ‖
शृताशृतोपदेशाच्च तेषामुत्सर्गवदयज्ञशेषत्वं ‖ सूत्र - १०.७.९ ‖
इज्याशेषात्सिवष्टकृदिज्येत प्रकृचिवत् ‖ सूत्र - १०.७.१० ‖
त्र्यङ्गैर्वा शरवद्विकारः स्यात् ‖ सूत्र - १०.७.११ ‖
अध्यूध्नी होतुस्त्र्यङ्गवदिडाभक्षविकारः स्यात् ‖ सूत्र - १०.७.१२ ‖
शेषे वा समवैति तस्माद्रथवन्नियमः स्यात् ‖ सूत्र - १०.७.१३ ‖
अशास्त्रत्वात्तु नैवं स्यात् ‖ सूत्र - १०.७.१४ ‖
अपि वा दानमात्रं स्याद्भक्षशब्दानभिसम्बन्धात् ‖ सूत्र - १०.७.१५ ‖
दातुस्त्वविद्यमानत्वादिडाभक्षविकारः स्याच्छेषं प्रत्यविशिष्चत्वात् ‖ सूत्र - १०.७.१६ ‖
अग्नीधश्च वविष्ठुपध्यूध्नीवत् ‖ सूत्र - १०.७.१७ ‖
अप्राकृतत्वान्मैत्रावरुणस्याभक्षत्वम् ‖ सूत्र - १०.७.१८ ‖
स्याद्वा होत्रध्वर्युविकारत्वात्तयो कर्माभिसम्बन्धात् ‖ सूत्र - १०.७.१९ ‖
द्विभागः स्याद्द्विकर्मत्वात् ‖ सूत्र - १०.७.२० ‖
एकत्वाद्वैकभागः स्याद्भागस्याश्रुतिभूतत्वात् ‖ सूत्र - १०.७.२१ ‖
प्रतिप्रस्थातुश्च वपाश्ररणात् ‖ सूत्र - १०.७.२२ ‖
अभक्षो वा कर्मभेदात्तस्याः सर्वप्रदानत्वात् ‖ सूत्र - १०.७.२३ ‖
विकृतौ प्राकृतस्य विधेर्ग्रहणात्पुनः श्रुतिरनर्थिका स्यात् ‖ सूत्र - १०.७.२४ ‖
अपि वाऽग्नेयवद्द्विशब्दत्वं स्यात् ‖ सूत्र - १०.७.२५ ‖
न वा शब्दपृथक्त्वात् ‖ सूत्र - १०.७.२६ ‖
अधिकं वार्थवत्त्वात्स्यादर्थवादगुणाभावे वचनादविकारे तेषु हि तादर्थ्यं स्यादपूर्वत्वात् ‖ सूत्र - १०.७.२७ ‖
प्रतिषेधः स्यादिति चेत् ‖ सूत्र - १०.७.२८ ‖
नाश्रुतत्वात् ‖ सूत्र - १०.७.२९ ‖
अग्रहणादिति चेत् ‖ सूत्र - १०.७.३० ‖
न तुल्यत्वात् ‖ सूत्र - १०.७.३१ ‖
तथा तद्ग्रहणे स्यात् ‖ सूत्र - १०.७.३२ ‖
अपूर्वतां तु दर्शयोद्ग्रहणस्यार्थवत्त्वात् ‖ सूत्र - १०.७.३३ ‖
ततो ऽपि यावद्क्तं स्यात् ‖ सूत्र - १०.७.३४ ‖
स्विष्टकृद्भक्षप्रतिषेधः स्यात्तुल्यकारणत्वात् ‖ सूत्र - १०.७.३५ ‖
अतिषेधो वा दर्शनादिडायां स्यात् ‖ सूत्र - १०.७.३६ ‖
प्रतिषेधो वा विधिपूर्वस्य दर्शनात् ‖ सूत्र - १०.७.३७ ‖
शंय्विडान्तत्वे विकल्पः स्यात्परेषु पत्न्यनुयाजप्रतिषेधो ऽनर्थकः स्यात् ‖ सूत्र - १०.७.३८ ‖
नित्यानुवादो वा कर्मणः स्यादशब्दत्वात् ‖ सूत्र - १०.७.३९ ‖
प्रतिषेधार्थवत्त्वाच्चोत्तरस्य परस्तात्प्रतिषेधः स्यात् ‖ सूत्र - १०.७.४० ‖

प्राप्तेर्वा पूर्वस्य वचनादतिक्रमः स्यात् ॥ सूत्र - १०.७.४१ ॥
प्रतिषेधस्य त्वरायुक्तत्वात्तस्य च नान्यदेशत्वम् ॥ सूत्र - १०.७.४२ ॥
उपसत्सु यावदुक्तमकर्म स्यात् ॥ सूत्र - १०.७.४३ ॥
स्त्रोवेण वागुणत्वाच्छेपप्रतिषेधः स्यात् ॥ सूत्र - १०.७.४४ ॥
अतिषेझं वा प्रतिषिध्यप्रतिप्रसवात् ॥ सूत्र - १०.७.४५ ॥
अनिज्या वा शेषस्य मुख्यदेवतानभीज्यत्वात् ॥ सूत्र - १०.७.४६ ॥
अवभृथे बर्हिषः प्रतिषेधाच्छेषकर्म स्यात् ॥ सूत्र - १०.७.४७ ॥
आज्यभागयोर्वा गुणत्वाच्छेषप्रतिषेधः स्यात् ॥ सूत्र - १०.७.४८ ॥
प्रयाजानां त्वेकदेशप्रतिषेधाद्वाक्यशेषत्वं तस्मान्नित्यानुवादः स्यात् ॥ सूत्र - १०.७.४९ ॥
आज्यभागयोर्ग्रहणं वित्यानुवादो वा गृहमेधीयवत्स्यात् ॥ सूत्र - १०.७.५० ॥
विरोधिनामेकश्रुतौ नियमः स्यादग्रहणस्यार्थवत्त्वाच्छरवच्च श्रुतितो विशिष्टत्वात् ॥ सूत्र - १०.७.५१ ॥
उभयप्रदेशान्नेतिचेत् ॥ सूत्र - १०.७.५२ ॥
शरेष्वपीति चेत् ॥ सूत्र - १०.७.५३ ॥
विरोध्यग्रहणात्तथा शरेष्विति चेत् ॥ सूत्र - १०.७.५४ ॥
तथेतरास्मिन् ॥ सूत्र - १०.७.५५ ॥
श्रुत्यानर्थक्यमिति चेत् ॥ सूत्र - १०.७.५६ ॥
ग्रहणस्यार्थवत्त्वादग्रहणमप्रवृत्ते स्यात् ॥ सूत्र - १०.७.५७ ॥
अधिकं स्यादिति चेत् ॥ सूत्र - १०.७.५८ ॥
अधिकं स्यादिति चेत् ॥ सूत्र - १०.७.५९ ॥
नार्थाभावात् ॥ सूत्र - १०.७.६० ॥
तथैकार्थविकारे प्राकृतस्याप्रवृत्तिः प्रवृत्तौ हि विकल्पः स्यात् ॥ सूत्र - १०.७.६१ ॥
यावच्छ्रुतीति चेत् ॥ सूत्र - १०.७.६२ ॥
न प्रकृतावशब्दत्वात् ॥ सूत्र - १०.७.६३ ॥

विकृतौ त्वनियमः स्यात्प्रषदाज्यवदग्रहणस्य गुणार्थत्वादुभयोश्च प्रदिष्टत्वाद्गुणशास्त्रं यदेति स्यात् ॥ सूत्र - १०.७.६४ ॥
ऐकार्थ्याद्वा नियभ्येत श्रुतितो विशिष्टत्वात् ॥ सूत्र - १०.७.६५ ॥
विरोधित्वाच्च लोकवत् ॥ सूत्र - १०.७.६६ ॥
क्रतोश्चतद्गुणत्वात् ॥ सूत्र - १०.७.६७ ॥
विरोधिनाञ्च तच्छ्रुतावशब्दत्वाद्विकल्पः स्यात् ॥ सूत्र - १०.७.६८ ॥
पृषदाज्ये समुच्चयादग्रहणस्य गुणार्थत्वम् ॥ सूत्र - १०.७.६९ ॥
यद्यपिचतुरवत्तीति तु नियमे नोपपद्यते ॥ सूत्र - १०.७.७० ॥
क्रत्वन्तरे वा तन्नयायत्वात्कर्मभेदात् ॥ सूत्र - १०.७.७१ ॥
यथाश्रुतीति चेत् ॥ सूत्र - १०.७.७२ ॥
न चोदनैकत्वात् ॥ सूत्र - १०.७.७३ ॥

Sub Chapter 08

प्रतिषेधः प्रदेशे ऽनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वाद्वि कल्पःस्यात् ॥ सूत्र - १०.८.१ ॥
अर्थप्राप्तवदिति चेत् ॥ सूत्र - १०.८.२ ॥
न तुल्यहेतुत्वादुभयं शब्दलक्षणम् ॥ सूत्र - १०.८.३ ॥
अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधोनामेकदेशः स्यात् ॥ सूत्र - १०.८.४ ॥
अपूर्वे चार्थवादः स्यात् ॥ सूत्र - १०.८.५ ॥
शिष्ट्वा तु प्रतिषेधः स्यात् ॥ सूत्र - १०.८.६ ॥
न चेदन्यं प्रकल्पयेत्प्रक्लृप्तावर्थवादः स्यादानर्थक्यात्परसामर्थ्याच्च ॥ सूत्र - १०.८.७ ॥
पूर्वैश्चच तुल्यकालत्वात् ॥ सूत्र - १०.८.८ ॥
उपवादश्च तद्वत् ॥ सूत्र - १०.८.९ ॥
प्रतिषेधादकर्मेति चेत् ॥ सूत्र - १०.८.१० ॥
न शब्दपूर्वत्वात् ॥ सूत्र - १०.८.११ ॥
दीक्षितस्य दानहोमपाकप्रतिषेधो ऽविशेषात्सर्वदानहोमपाकप्रतिषेधः स्यात् ॥ सूत्र - १०.८.१२ ॥
अक्रतुयुक्तानां वा धर्मः स्यात्क्रतोः प्रत्यक्षशिष्टत्वात् ॥ सूत्र - १०.८.१३ ॥
तस्य वाप्यानुमानिकमविशेषात् ॥ सूत्र - १०.८.१४ ॥
अपि तु वाक्यशेषत्वादितरपर्युदासः स्यात्प्रतिषेधे विकल्पः स्यात् ॥ सूत्र - १०.८.१५ ॥
अविशेषेण यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य तत्सन्दिग्धमाराद्विशेषशिष्ट स्यात् ॥ सूत्र - १०.८.१६ ॥
अकरणे तु यच्छास्त्रं विशेषे श्रुयमाणमविकृतमाज्य भागवत्प्राकृतप्रतिषेधार्थम् ॥ सूत्र - १०.८.१७ ॥
विकारे तु तदर्थं स्यात् ॥ सूत्र - १०.८.१८ ॥
वाक्यशेषो वा क्रतुना ग्रहणात्स्यादनारभ्यविधानस्य ॥ सूत्र - १०.८.१९ ॥
मन्त्रेष्ववाक्यशेषत्वं गुणोपदेशात्स्यात् ॥ सूत्र - १०.८.२० ॥
अनाम्नाते च दर्शनात् ॥ सूत्र - १०.८.२१ ॥
प्रतिषेधाच्च ॥ सूत्र - १०.८.२२ ॥
अग्न्यतिग्राह्यस्य विकृतावुपदेशादप्रवृत्तिः स्यात् ॥ सूत्र - १०.८.२३ ॥
मासि ग्रहणञ्च तद्वात् ॥ सूत्र - १०.८.२४ ॥
ग्रहणं वा तुल्यत्वात् ॥ सूत्र - १०.८.२५ ॥
लिङ्गदर्शनाच्च ॥ सूत्र - १०.८.२६ ॥
ग्रहणं समानविधानं स्यात् ॥ सूत्र - १०.८.२७ ॥
मासिग्रहणमभ्यासप्रतिषेधार्थम् ॥ सूत्र - १०.८.२८ ॥

उत्पत्तितादर्थ्याच्चतुरवत्तम प्रधानस्य होमसंयोगादधिकमाज्यमतुल्यत्वाल्लोकवदुत्पत्तेर्गुणभूतत्वात् ॥ सूत्र - १०.८.२९ ॥
तत्संस्कारश्रुतेश्च ॥ सूत्र - १०.८.३० ॥
ताभ्यां वा सह स्विष्टकृतः सकृत्त्वे द्विपभिघारणेन तदाप्तिवचनात् ॥ सूत्र - १०.८.३१ ॥
तुल्यवच्चाभिधाय सर्वेषु भक्त्यनुक्रमणात् ॥ सूत्र - १०.८.३२ ॥
साप्तदश्यवन्नियम्येत ॥ सूत्र - १०.८.३३ ॥
हविषो वा गुणभूतत्वात्तथाभूतविवक्षा स्यात् ॥ सूत्र - १०.८.३४ ॥
पुरोडाशाभ्यामित्यधिकृतानां पुरोडाशयोरुपदेशस्तच्छ्रुतित्वाद्वैश्यस्तोमवत् ॥ सूत्र - १०.८.३५ ॥
न त्वनित्याधिकारो ऽस्ति विधौ नित्येनसम्बन्धस्तस्मादवाक्यशेषत्वम् ॥ सूत्र - १०.८.३६ ॥
सति च नैकदेशेन कर्तुः प्रधानभूतत्वात् ॥ सूत्र - १०.८.३७ ॥
कृत्स्नत्वात्तु तथा स्तोमे ॥ सूत्र - १०.८.३८ ॥
कर्तुः स्यादिति चेत् ॥ सूत्र - १०.८.३९ ॥
न गुणार्थत्वात्प्राप्ते न चोपदेशार्थः ॥ सूत्र - १०.८.४० ॥
कर्मणोस्तु प्रकरणे तन्न्यायत्वाद्गुणानां लिङ्गेन कालशास्त्रं स्यात् ॥ सूत्र - १०.८.४१ ॥
यदि तु सान्नाय्यं सोमयाजिनो न ताभ्यां समवायोस्ति विभक्तकालत्वात् ॥ सूत्र - १०.८.४२ ॥

अपि वा विहितत्वाद्गुणार्थायां पुनः श्रुतौ सन्देहे श्रुतिर्द्विदेवतार्था स्याद्यथानभिप्रेतस्तथाऽग्नेयो दर्शनादेकदेवते ॥ सूत्र - १०.८.४३ ॥
विधिं तु बादरायणः ॥ सूत्र - १०.८.४४ ॥
प्रतिषिद्धविज्ञानाद्वा ॥ सूत्र - १०.८.४५ ॥
तथा चान्यार्थदर्शनम् ॥ सूत्र - १०.८.४६ ॥
उपांशुयाजमन्तरा यजतीति हविर्लिङ्गाश्रुतित्वाद्यथाकामी प्रतीयेत ॥ सूत्र - १०.८.४७ ॥
ध्रौवाद्वा सर्वसंयोगात् ॥ सूत्र - १०.८.४८ ॥
तद्वच्च देवतायां स्यात् ॥ सूत्र - १०.८.४९ ॥
तान्द्रीणां प्रकरणात् ॥ सूत्र - १०.८.५० ॥
धर्माद्वा स्यात्प्रजापतिः ॥ सूत्र - १०.८.५१ ॥
देवतायास्त्वनिर्वचनं तत्र शब्दस्येह मृदुत्वं तस्मादिहाधिकारेण ॥ सूत्र - १०.८.५२ ॥
विष्णुर्वा स्याद्धौत्राम्नानादमावास्याहविश्च स्याद्धौत्रस्य तत्र दर्शनात् ॥ सूत्र - १०.८.५३ ॥
अपि वा पौर्णमास्यां स्यात्प्रधानशब्दसंयोगाद्गुणत्वान्मन्त्रो यथा प्रधान स्यात् ॥ सूत्र - १०.८.५४ ॥
आनन्तर्यञ्च सान्नाय्यस्य पुरोडाशेन दर्शयत्यमावास्या विकारे ॥ सूत्र - १०.८.५५ ॥
अगनीषामविधानासत्तु पौर्णमास्यामुभयत्र विधीयते ॥ सूत्र - १०.८.५६ ॥
प्रतिषिद्ध्यविधानाद्वा विष्णुः समानदेशः स्यात् ॥ सूत्र - १०.८.५७ ॥
तथा चान्यार्थदर्शनम् ॥ सूत्र - १०.८.५८ ॥
न चानङ्ग सकृच् छ्रुताव् उभयत्र विधीयोतासम्बन्धात् ॥ सूत्र - १०.८.५९ ॥

गुणानां च परार्थत्वात्प्रवृत्तौ विधिलिङ्गानि दर्शयति ॥ सूत्र - १०.८.६० ॥
विकारे चाश्रुतित्वात् ॥ सूत्र - १०.८.६१ ॥
द्विपुरोडाशायां स्यादन्तरार्थत्वात् ॥ सूत्र - १०.८.६२ ॥
अजामिकरणार्थत्वाच्च ॥ सूत्र - १०.८.६३ ॥
तदर्थमिति चेन्नतत्प्रधानत्वात् ॥ सूत्र - १०.८.६४ ॥
अशिष्टेन च सम्बन्धात् ॥ सूत्र - १०.८.६५ ॥
उत्पत्तेस्तु निवेशः स्याद्गुस्यानुपरोधेनार्थस्य नियमानत्वाद्विधानादन्तरार्थस्य नैमित्तिकत्वात्तदभावे ऽश्रुतौ स्यात् ॥ सूत्र - १०.८.६६ ॥
उभयोस्तु विधानात् ॥ सूत्र - १०.८.६७ ॥
गुणानाञ्च परार्थत्वादुपवेषवद्येति स्यात् ॥ सूत्र - १०.८.६८ ॥
अनपायश्च कालस्य लक्षणं हि पुरोडाशौ ॥ सूत्र - १०.८.६९ ॥
प्रशंसार्थमजामित्वम् ॥ सूत्र - १०.८.७० ॥

## Chapter 11

### Sub Chapter 01

प्रयोजनाभिसम्बन्धात्पृथक् सतौततः स्यादैककर्म्यमेक शब्दाभिसंयोगात् ॥ सूत्र - ११.१.१ ॥
शेषवद्वा प्रयोजनं प्रतिजनं प्रतिकर्म विभज्येत ॥ सूत्र - ११.१.२ ॥
अविधानात्तु नैवं स्यात् ॥ सूत्र - ११.१.३ ॥
शेषस्य हि परार्थत्वाद्विधानात्प्रतिप्रधानभावः स्यात् ॥ सूत्र - ११.१.४ ॥
अङ्गनान्तु शब्दभेदात्क्रतुवत्स्या त्फलानयत्वम् ॥ सूत्र - ११.१.५ ॥
अर्थभेदस्तु तत्राथेह्यैताथ्र्यदैककर्म्यम् ॥ सूत्र - ११.१.६ ॥
शब्दभेदान्नेति चेत् ॥ सूत्र - ११.१.७ ॥
कर्मार्थत्वात्प्रयोगे ताच्छब्यं स्यात्तदर्थत्वात् ॥ सूत्र - ११.१.८ ॥
कर्तृविधेर्नानार्थत्वाद्गुणप्रधानेषु ॥ सूत्र - ११.१.९ ॥
आरम्भस्य शब्दपूर्वत्वात् ॥ सूत्र - ११.१.१० ॥
एकेनापि समाप्येत कृतार्थत्वाद्यथा क्रत्वन्तरेषुप्राप्तेषुचो तरावत्स्यात् ॥ सूत्र - ११.१.११ ॥
फलाभावान्नेति चेत् ॥ सूत्र - ११.१.१२ ॥
न कर्मसंयोगात्प्रयोजनबशब्ददोषं स्यात् ॥ सूत्र - ११.१.१३ ॥
एकशब्यादिति चेत् ॥ सूत्र - ११.१.१४ ॥
नार्थपृथक्त्वात्.मत्वादगुणत्वम् ॥ सूत्र - ११.१.१५ ॥
विधेस्त्वेकश्रुतित्वादपर्यायविधानान्नित्यच्छ्रुतभूताभिसंयोगादर्थेन युगपत्प्राप्तेर्यथाप्रासं स्वशब्दो निवीतवत्स्प्वप्रयोगे प्रवृत्तिः स्यात्प मिमांसा-११.१.१६ ॥
तथा कर्मोपदेशत्वात् ॥ सूत्र - ११.१.१७ ॥
क्रत्वन्तरेषु पुनर्वचनम् ॥ सूत्र - ११.१.१८ ॥
उत्तरास्वश्रुतित्वाद्विशेषाणां कृतार्थत्वात्संदोहे यथाकामी प्रतीयेत ॥ सूत्र - ११.१.१९ ॥
कर्मण्यारम्भभाव्यत्वात्कृषिवत्प्रत्यारभ्भं फलानि स्युः ॥ सूत्र - ११.१.२० ॥
अधिकारश्च सर्वेषां कार्यत्वादुपपद्यते विशेषः ॥ सूत्र - ११.१.२१ ॥
सकृत्तु स्यात्कृतार्थत्वादङ्गवत् ॥ सूत्र - ११.१.२२ ॥
शब्दार्थश्च तथा लोके ॥ सूत्र - ११.१.२३ ॥
अपि वा संप्रयोगे यथाकामी प्रतायेताश्रुतित्वाद्विधिषप वचनानि स्युः ॥ सूत्र - ११.१.२४ ॥
एकशब्यात्तथाङ्गेषु ॥ सूत्र - ११.१.२५ ॥
लोके कर्मारऽथ लक्षणम् ॥ सूत्र - ११.१.२६ ॥
क्रियाणामर्थशेषत्वात्प्रत्यक्षतस्तन्निर्वृ त्यापवर्गः स्यात् ॥ सूत्र - ११.१.२७ ॥
घर्ममात्रे त्वदर्शनाच्छब्दार्थेनापवर्गः स्यात् ॥ सूत्र - ११.१.२८ ॥
क्रतुवच्चानुमानेनाभ्यासे फलभूमा स्यात् ॥ सूत्र - ११.१.२९ ॥
सकृद्वा कारणैकत्वात् ॥ सूत्र - ११.१.३० ॥
परिमाणं चानियमेन स्यात् ॥ सूत्र - ११.१.३१ ॥
फलस्यारम्भनिर्वृत्तेः क्रतुषु स्यात्फलान्यत्वम् ॥ सूत्र - ११.१.३२ ॥
अर्थवांस्तु नैकत्वादभ्यासः स्यादनर्थको यथा भोजन मेकस्मिन्नर्थस्यापरिमाणत्वात्प्रधाने च क्रियार्थत्वादनियमः स्यात् ॥ सूत्र - ११.१.३३ ॥
पृथक्त्वाद्विधितः परिमाणं स्यात् ॥ सूत्र - ११.१.३४ ॥
अनभ्यासो वा प्रयोगवचनैकत्वात्सर्वम्ययुगपच्छास्त्रा दफलत्वाच्च कर्मणः स्यात्क्रियार्थत्वात् ॥ सूत्र - ११.१.३५ ॥
अभ्यासो वा छेदनसंमार्गावदानेषु वचनात्सकृत्त्वस्य ॥ सूत्र - ११.१.३६ ॥
अनभ्यासस्तु वाच्यत्वात् ॥ सूत्र - ११.१.३७ ॥
बहुवचनेन सर्वप्राप्तेर्विकल्पः स्यात् ॥ सूत्र - ११.१.३८ ॥
दृष्टः प्रयोग इति चेत् ॥ सूत्र - ११.१.३९ ॥
भक्तयेति चेत् ॥ सूत्र - ११.१.४० ॥
तथोतरस्मिन् ॥ सूत्र - ११.१.४१ ॥
प्रथमं वा नियम्येत कारणादतिक्रमः स्यात् ॥ सूत्र - ११.१.४२ ॥
श्रुत्यर्थाविशेषात् ॥ सूत्र - ११.१.४३ ॥
तथा चान्यार्थदर्शनम् ॥ सूत्र - ११.१.४४ ॥
प्रक-त्या च पूर्ववत्तदासतेः ॥ सूत्र - ११.१.४५ ॥
उत्तरासु यावत्स्वमपूर्वत्वात् ॥ सूत्र - ११.१.४६ ॥
यावत्स्वं वान्यविधानेनावादः स्यात् ॥ सूत्र - ११.१.४७ ॥
साकल्यविधानात् ॥ सूत्र - ११.१.४८ ॥
बहूर्थत्वाच्च ॥ सूत्र - ११.१.४९ ॥
अग्निहोत्रे चाशेषवद्यवागूनियमः प्रतिषेधःकुमांराणाम् ॥ सूत्र - ११.१.५० ॥
सर्वप्रायिणापि लिङ्गेन संयुज्यते देवताभिसंयोगात् ॥ सूत्र - ११.१.५१ ॥
पूधानकर्मार्थत्वादङ्गानां तद्भेदात्कर्मभेदः प्रयोगे स्यात् ॥ सूत्र - ११.१.५२ ॥
क्रमकोपश्च यौगपद्यात् स्यात् ॥ सूत्र - ११.१.५३ ॥
तुल्यानां तु यौग पद्यमेकशब्दोपदेशात्स्याद्विशेषाग्रहणात् ॥ सूत्र - ११.१.५४ ॥
एकार्थ्यादव्यवायः स्यात् ॥ सूत्र - ११.१.५५ ॥
तथाचान्यार्थदर्शनं कामुकायनः ॥ सूत्र - ११.१.५६ ॥
तन्नयायत्वादशक्तेरानूपूर्व्यं स्यात्संस्कारस्य तदर्थत्वात् ॥ सूत्र - ११.१.५७ ॥
असंसृष्टो ऽपि तादर्थ्यात् ॥ सूत्र - ११.१.५८ ॥
विभवाद्वा प्रदीपवत् ॥ सूत्र - ११.१.५९ ॥
अर्थात्तु लोके विधितः प्रतिप्रधानं स्यात् ॥ सूत्र - ११.१.६० ॥
सकृदिज्यां कामुकायनः परिमाणविरोधात् ॥ सूत्र - ११.१.६१ ॥
विधेस्त्वितरार्थत्वात्सकृदिज्याश्रुतिव्यतिक्रमः स्यात् ॥ सूत्र - ११.१.६२ ॥
विधिवत्प्रकरणाविभागे प्रयोगं बादरायणः ॥ सूत्र - ११.१.६३ ॥
अपि चैकेन सन्निधानमविशेषकोहेतुः ॥ सूत्र - ११.१.६४ ॥
क्कतिद्विधानान्नेति चेत् ॥ सूत्र - ११.१.६५ ॥
न विधेश्चोदित्वात् ॥ सूत्र - ११.१.६६ ॥
व्याख्यातं तुल्यानां यौगपद्यमगृह्यमाणविशेषाणाम् ॥ सूत्र - ११.१.६७ ॥
भदर्तु कालभेदाच्चोदनाव्यवायात्स्याद्विशिष्टानां विधिप्रधानकात्वात् ॥ सूत्र - ११.१.६८ ॥
तथा चान्यार्थदर्शनम् ॥ सूत्र - ११.१.६९ ॥
विधिरिति चेन्न वर्तमानापदेशात् ॥ सूत्र - ११.१.७० ॥

### Sub Chapter 02

एकदेशकालकर्तृत्व मुख्यानामेकशब्दोपदेशात् ॥ सूत्र - ११.२.१ ॥

अविधिश्तेत्कर्मणामभिसम्बन्धः प्रतीयेत तल्लक्षणार्थाभिसंयोगाद्विधित्वाच्चेतरेषां प्रतिप्रधानभावः स्यात् ॥ सूत्र - ११.२.२ ॥
अङ्गेषु च तदभावः प्रधानं प्रतिनिर्देशात् ॥ सूत्र - ११.२.३ ॥
यदि तु कर्मणो विधिसम्बन्धः स्यादैकशब्यात्प्रधानार्थाभिधासंयोगात् ॥ सूत्र - ११.२.४ ॥
तथा तान्यार्थदर्शनम् ॥ सूत्र - ११.२.५ ॥
श्रुतिश्चैषां प्रधानवत्कर्मश्रुतेः परार्थत्वात् ॥ सूत्र - ११.२.६ ॥
कर्मणो ऽश्रुतित्वाच्च ॥ सूत्र - ११.२.७ ॥
अङ्गानि तु विधिनत्वात्प्रधानेनोपदिश्येरंस्तस्मात्स्यादे कगेशत्वम् ॥ सूत्र - ११.२.८ ॥

द्रव्यदेवतं तथेति चेत् ‖ सूत्र - ११.२.९ ‖
न चोदनाविधिशेषरवान्नियमार्थो विशेषः ‖ सूत्र - ११.२.१० ‖
तेषु समवेतानां समवायात्तन्त्रमङ्गानि भेदस्तु तद्भैदात्कर्मभेदः प्रयोगे स्यात्तेषां प्रधानशब्दत्वात्तथा चान्यार्थदर्शनम् ‖ सूत्र - ११.२.११ ‖
इष्टिराजसूयचातुर्मास्येष्वैककर्म्योदङ्गानां तन्त्रभावः स्यात् ‖ सूत्र - ११.२.१२ ‖
कालभेगान्नेति चेत् ‖ सूत्र - ११.२.१३ ‖
नैकदेशत्वात्पशुवत् ‖ सूत्र - ११.२.१४ ‖
अपि वा कर्मपृथक्त्वात्तेषां तन्त्रविधानात्साङ्गानामुपदेशः स्यात् ‖ सूत्र - ११.२.१५ ‖
तथा चान्यार्थदर्शनम् ‖ सूत्र - ११.२.१६ ‖
तथा तदवयवेषु स्यात् ‖ सूत्र - ११.२.१७ ‖
पशौ तु चेदनैकत्वात्तन्त्रस्य विप्रकर्षः स्यात् ‖ सूत्र - ११.२.१८ ‖
तथा स्यादध्वरकल्पेष्टौ विशेषस्यैककालत्वात् ‖ सूत्र - ११.२.१९ ‖
इष्टिरिति चैकवच्छ्रुतिः ‖ सूत्र - ११.२.२० ‖
अपि वाकर्मपृथकत्वात्तेषां च तन्त्रविधानात्साङ्गानामुपदेशः स्यात् ‖ सूत्र - ११.२.२१ ‖
प्रथमस्य वा कालवचनम् ‖ सूत्र - ११.२.२२ ‖
फलैकत्वादिष्टिशब्दो यथान्यत्र ‖ सूत्र - ११.२.२३ ‖
वसाहोमस्तन्त्रमेकदेवतेषु स्यात्प्रदानस्यैककालत्वात् ‖ सूत्र - ११.२.२४ ‖
कालभेदात्वावृत्तिर्देवताभेदे ‖ सूत्र - ११.२.२५ ‖ अन्ते यूपाहृतिस्तद्वत् ‖ सूत्र - ११.२.२६ ‖
इतरप्रतिषेधो वा ‖ सूत्र - ११.२.२७ ‖
अशास्त्रत्वाच्च देशानाम् ‖ सूत्र - ११.२.२८ ‖
अवभृथे प्रधाने ऽग्निविकारः स्यान्न हि तद्धेतुरग्निसंयोगः ‖ सूत्र - ११.२.२९ ‖
साङ्गो वा प्रयोदवचनैकत्वात् ‖ सूत्र - ११.२.३० ‖
लिङ्गदर्शनाच्च ‖ सूत्र - ११.२.३१ ‖
शब्दविभागाच्च देवतानपनयः ‖ सूत्र - ११.२.३२ ‖
दक्षिणे ऽग्नौ वरुणप्रधासेषु देशभेदात्सर्वं क्रियते ‖ सूत्र - ११.२.३३ ‖
अचोदनेतिचेत् ‖ सूत्र - ११.२.३४ ‖
स्यात्पौर्णमासीवत् ‖ सूत्र - ११.२.३५ ‖
प्रयोगचेदनेति चेत् ‖ सूत्र - ११.२.३६ ‖
इहापिमारुत्याः प्रयागश्चोद्यते ‖ सूत्र - ११.२.३७ ‖
आसादानमिति चेत् ‖ सूत्र - ११.२.३८ ‖
नोत्तरेणैकवाक्यत्वात् ‖ सूत्र - ११.२.३९ ‖
अवाच्यत्वात् ‖ सूत्र - ११.२.४० ‖
आमनायवचनं तद्वत् ‖ सूत्र - ११.२.४१ ‖
कर्तृभेदस्तथेति चेत् ‖ सूत्र - ११.२.४२ ‖
न समवायात् ‖ सूत्र - ११.२.४३ ‖
लिङ्गदर्शनाच्च ‖ सूत्र - ११.२.४४ ‖
वेदिसंयोगादिति चेत् ‖ सूत्र - ११.२.४५ ‖
न देशमात्रत्वात् ‖ सूत्र - ११.२.४६ ‖
एकवाक्यत्वात् ‖ सूत्र - ११.२.४७ ‖
एकाग्नित्वादपरेषु तन्त्रं स्यात् ‖ सूत्र - ११.२.४८ ‖
नाना वा कर्तृभेदात् ‖ सूत्र - ११.२.४९ ‖

पर्यग्निकृतानामुत्सर्गे प्राजापत्यानां कर्मोत्सर्गः श्रुतिसामानयादारण्यवत्तस्माद्भ्मसाम्नि चोदनापृथक्तवं स्यात् ‖ सूत्र - ११.२.५० ‖
संस्कारप्रतिषेधो वा वाक्यैकत्वो क्रतुसामान्यात् ‖ सूत्र - ११.२.५१ ‖
वाक्यैकत्वे क्रतुसामान्यात् ‖ सूत्र - ११.२.५२ ‖
वपानां चानभिघारणस्य दर्शनात् ‖ सूत्र - ११.२.५३ ‖
पञ्चशारदीयास्तथेति चेत् ‖ सूत्र - ११.२.५४ ‖
न चेदनैकवाक्यत्वात् ‖ सूत्र - ११.२.५५ ‖
यातयामत्वाच्च ‖ सूत्र - ११.२.५६ ‖
संस्कारणां च तद्दर्शनात् ‖ सूत्र - ११.२.५७ ‖
दशपेये क्रयप्रतिकर्षात्प्रतिकर्षस्ततः प्राचां तत्समानं तन्त्रं स्यात् ‖ सूत्र - ११.२.५८ ‖
समानवचनं तद्वत् ‖ सूत्र - ११.२.५९ ‖
अतिकर्षो वार्ऽथहेतुत्वात् ‖ सूत्र - ११.२.६० ‖
पूर्वस्मिंश्चावभृथस्य दर्शनात् ‖ सूत्र - ११.२.६१ ‖
समानः कालसामान्यात् ‖ सूत्र - ११.२.६२ ‖
विष्कासस्यावभृथे तदेकदेशत्वात्पशुवत्प्रदानविप्रकर्षः स्यात् ‖ सूत्र - ११.२.६३ ‖
अपनयो वा प्रसिद्धेनाभिसंयोगात् ‖ सूत्र - ११.२.६४ ‖
प्रतिपत्तिरिति चेन्न कर्मसंयोगात् ‖ सूत्र - ११.२.६५ ‖
उदयनीये च तद्वत् ‖ सूत्र - ११.२.६६ ‖
प्रतिपत्तिर्वातकर्मसंयोगात् ‖ सूत्र - ११.२.६७ ‖
अर्थकर्म वा शेषत्वाच्छ्रयणवत्तदर्थेनविधानात् ‖ सूत्र - ११.२.६८ ‖

## Sub Chapter 03

अङ्गानां मुख्यकालत्वाद्वचनादन्यकालत्वम् ‖ सूत्र - ११.३.१ ‖
द्रव्यस्य कर्मकालनिष्पत्तेः प्रयोगः सर्वार्थः स्यात्स्बकालत्वात् ‖ सूत्र - ११.३.२ ‖
यूपश्चाकर्मकालत्वात् ‖ सूत्र - ११.३.३ ‖
एकयूपं च दर्षयति ‖ सूत्र - ११.३.४ ‖
संस्कारास्त्वावर्तेरन्नर्थकालत्वात् ‖ सूत्र - ११.३.५ ‖
तत्कालस्तु यूपकर्मत्वात्तस्य धर्मविधानात्सर्वार्थानां च वचनादन्यकालत्वम् ‖ सूत्र - ११.२.६ ‖
सकृन्मानं च दर्शयति ‖ सूत्र - ११.२.७ ‖
स्वरुस्तन्त्रापवर्गः स्यादस्वकालत्वात् ‖ सूत्र - ११.२.८ ‖
साधारणे वानुनिष्पत्तिस्तस्य साधारणत्वात् ‖ सूत्र - ११.३.९ ‖
सोमान्ते च प्रतिपत्तिदर्शनात् ‖ सूत्र - ११.३.१० ‖
न चोत्पत्तिवाक्यत्वात्प्रदेशात्प्रस्तरे तथा ‖ सूत्र - ११.३.११ ‖
अहर्गणे विषाणाप्रासनं धरमविप्रतिषेधादन्ते प्रथमे वाहनि विकल्पः स्यात् ‖ सूत्र - ११.३.१२ ‖
पाणेस्त्वश्रुतिभूतत्वाद्विशाणानियमः स्यात्प्रातः सवनमध्यत्वाच्छिष्टे चाभिप्रवृत्तत्वात् ‖ सूत्र - ११.३.१३ ‖
शिष्ठे चाभिप्रवृत्तत्वात् ‖ सूत्र - ११.३.१४ ‖
वाग्विसर्गो हविष्कृता वीजभेदे तथा स्यात् ‖ सूत्र - ११.३.१५ ‖
यथाह्वानमपीतिचेत् ‖ सूत्र - ११.३.१६ ‖
पशौ च पुरोडाशे समानतन्त्रं भवेत् ‖ सूत्र - ११.३.१७ ‖
अङ्गप्रधानार्थोयोगः सर्वापवर्गे विमोकः स्यात् ‖ सूत्र - ११.३.१८ ‖
प्रधानापवर्गे वा तदर्थत्वात् ‖ सूत्र - ११.३.१९ ‖
अवभृथे च तद्वत्प्रधानार्थस्य प्रतिषेधो ऽपवृक्तार्थत्वात् ‖ सूत्र - ११.३.२० ‖
अहर्गणे च प्रत्यहं स्यात्तदर्थत्वात् ‖ सूत्र - ११.३.२१ ‖
सुब्पह्मण्या तु तन्त्रं दीक्षावदन्यकालत्वात् ‖ सूत्र - ११.३.२२ ‖
तत्कालात्त्वादावर्तेत प्रयागतो विशेषसम्बन्धात् ‖ सूत्र - ११.३.२३ ‖
अयोदाङ्गमिति चेत् ‖ सूत्र - ११.३.२४ ‖
प्रयोगनिर्देशात्कर्सृभेदवत् ‖ सूत्र - ११.३.२५ ‖
तद्भूतस्थानादग्निवदिति चेत्तदपरगस्तदर्थत्वात् ‖ सूत्र - ११.३.२६ ‖
अग्निवदिति चेत् ‖ सूत्र - ११.३.२७ ‖
न प्रयोगसाधारण्यात् ‖ सूत्र - ११.३.२८ ‖
लिङ्गदर्शनाच्च ‖ सूत्र - ११.३.२९ ‖
तद्धि तथेति चेत् ‖ सूत्र - ११.३.३० ‖
नाशिष्टत्वादितरन्यायत्वाच्च ‖ सूत्र - ११.३.३१ ‖
विध्येकत्वादिति चेत् ‖ सूत्र - ११.३.३२ ‖
न कृत्स्नस्य पुनः प्रयोगात्प्रधानवत् ‖ सूत्र - ११.३.३३ ‖
लौकिकेतु यथाकामी संस्कारानर्थलोपात् ‖ सूत्र - ११.३.३४ ‖

यज्ञायुधानि धार्येरन्प्रतिपत्तिविधानादृजीषवत् ‖ सूत्र - ११.३.३५ ‖
यजमानसंस्कारो वा तदर्थः श्रूयते तत्र यथाकामी तदर्थ त्वात् ‖ सूत्र - ११.३.३६ ‖
मुख्यधारणं वा मरणस्यानियत्वात् ‖ सूत्र - ११.३.३७ ‖
यो वा यजनीयेहनि म्रियेत सो ऽधिकृतः स्याद्पवेषवत् ‖ सूत्र - ११.३.३८ ‖
न शास्त्रलक्षणत्वात् ‖ सूत्र - ११.३.३९ ‖
उत्पत्तिर्वा प्रयोजकत्वादाशिपवत् ‖ सूत्र - ११.३.४० ‖
शब्दासामञ्जस्यमिति चेत् ‖ सूत्र - ११.३.४१ ‖
तथाऽशिरे ऽपि ‖ सूत्र - ११.३.४२ ‖
शास्त्रात्तु विप्रयोगस्तत्रैकद्रव्यचिकीर्षा प्रतावथेहापूर्वार्थवद्भूतोपदेशः ‖ सूत्र - ११.३.४३ ‖
प्रकृत्यर्थत्वात्पौर्णमास्याः क्रियेरन् ‖ सूत्र - ११.३.४४ ‖
अग्न्याधेये वाविप्रतिषेधात्तानि धारयेन्मरणस्यानिमित्तवात् ‖ सूत्र - ११.३.४५ ‖
प्रतिपत्तिर्वा यथान्येषाम् ‖ सूत्र - ११.३.४६ ‖
उपरिष्टात्सोमानां प्राजापत्यैश्र्तपन्तीति ‖ सूत्र - ११.३.४७ ‖
अङ्गविपर्यासोविनावचनादिति चेत् ‖ सूत्र - ११.३.४८ ‖
उत्कर्षः संयोगात्कालमात्रमितरत्र ‖ सूत्र - ११.३.४९ ‖
प्रकृतिकालासत्तेः शस्त्रवतामिति चेत् ‖ सूत्र - ११.३.५० ‖
न श्रुतिप्रतिषेधात् ‖ सूत्र - ११.३.५१ ‖
विकारस्थाने इति चेत् ‖ सूत्र - ११.३.५२ ‖
न चोदनापृथक्त्वात् ‖ सूत्र - ११.३.५३ ‖
उत्कर्षे सूक्तवाकस्य न सोमदेवतानामुत्कर्षः पश्वनङ्गत्वाद्यथा निष्कर्षेनान्वयः ‖ सूत्र - ११.३.५४ ‖
वाक्यसंयोगाद्वोत्कर्षः समानतन्त्रत्वादर्थलोपादन्नवयः ‖ सूत्र - ११.३.५५ ‖

### Sub Chapter 04

चोदनैकत्वाद्राजसूये ऽनुक्तदेशकालानां समवायात्तन्त्रमङ्गानि ‖ सूत्र - ११.४.१ ‖

प्रतिदक्षिणं वा कर्तृसम्बन्धादिष्टिवदङ्गभूतत्वात्समुदायो हि तन्निर्वृत्यातदेकत्वादेकत्वादेकशब्दोपदेशः स्यात् ‖ सूत्र - ११.४.२ ‖
तथा चान्यार्थदर्शनम् ‖ सूत्र - ११.४.३ ‖
अनियमः स्यादिति चेत् ‖ सूत्र - ११.४.४ ‖
नोपदिष्टत्वात् ‖ सूत्र - ११.४.५ ‖
प्रयोजनैकत्वात् ‖ सूत्र - ११.४.६ ‖
अविशेषार्था पुनः श्रुतिः ‖ सूत्र - ११.४.७ ‖
अवेष्टौ चैकतन्त्र्यं स्याल्लिङ्गदर्शनाद्वचनात् कामसंयोगेन ‖ सूत्र - ११.४.८ ‖
क्रत्वर्थायामिति चेन्न वर्णसंयोगात् ‖ सूत्र - ११.४.९ ‖
पवमानहविःष्वैकतन्त्. प्रयोगवचनैकत्वात् ‖ सूत्र - ११.४.१० ‖
लिङ्गदर्शनाच्च ‖ सूत्र - ११.४.११ ‖
वर्तमानापदेशाद्वचनात्तु तन्त्रभेदः स्यात् ‖ सूत्र - ११.४.१२ ‖
सहत्वे नित्यानुवादः स्यात् ‖ सूत्र - ११.४.१३ ‖
द्वादशाहे तु प्रकृतित्वादेकैकमहपरवृज्येत कर्मपृथक्त्वात् ‖ सूत्र - ११.४.१४ ‖
अह्नां वा श्रुतिभूतत्वात्तत्र साङ्गं क्रियेत यथा माध्यन्दिने ‖ सूत्र - ११.४.१५ ‖
अपि वा फलकर्तृसम्बन्धात्सह प्रयोगः स्यादाग्नेयाग्नीषोमीयवत् ‖ सूत्र - ११.४.१६ ‖
साङ्गकालश्रुतित्वाद्वा स्वस्थानानां विकारः स्यात् ‖ सूत्र - ११.४.१७ ‖
दीक्षोपसदां च संख्या पृथक्पृथक् प्रत्यक्षसंयोगात् ‖ सूत्र - ११.४.१८ ‖
वसतीवरीपर्यन्तानिपूर्वाणितन्त्र मन्यकालत्वादवभृथादीन्युत्तराणिदीक्षाविसर्गार्थत्वात् ‖ सूत्र - ११.४.१९ ‖
तथा चान्यार्थदर्शनम् ‖ सूत्र - ११.४.२० ‖
चोदनापृथक्त्वे त्वैकतन्त्र्यं समवेतानां कालसंयोगात् ‖ सूत्र - ११.४.२१ ‖
भेदस्तु तद्भेदात्करमभेदः प्रयोगे स्यात्तेषां प्रधानशब्दत्वात् ‖ सूत्र - ११.४.२२ ‖
तथा चान्यार्थदर्शनम् ‖ सूत्र - ११.४.२३ ‖
श्वासुत्यावचनं तद्वत् ‖ सूत्र - ११.४.२४ ‖
पश्वतिरेकश्च ‖ सूत्र - ११.४.२५ ‖
सुत्याविवृद्धौ सुब्रह्मण्यायां सर्वेषामुपलक्षणं प्रकृत्यन्व यादावाहनवत् ‖ सूत्र - ११.४.२६ ‖
अपि वेन्द्राभिधानत्वात्सकृत्स्याद्पलक्षणं कालस्यलक्षणार्थत्वात् ‖ सूत्र - ११.४.२७ ‖
अविभागाच्च ‖ सूत्र - ११.४.२८ ‖
पशुगणे कुम्भीशूलवपाश्रपणीनां प्रभुत्वात्तन्त्रमावः स्यात् ‖ सूत्र - ११.४.२९ ‖
भेदस्तु सन्देहाद्देवतान्तरे स्यात् ‖ सूत्र - ११.४.३० ‖
अर्ताद्वा लिङ्गकर्म स्यात् ‖ सूत्र - ११.४.३१ ‖
प्रतिपाद्यत्वाद्वसानांभेदः स्यात्स्वयाज्याप्रदानत्वात् ‖ सूत्र - ११.४.३२ ‖
अपि वा प्रतिपत्तित्वात्तन्त्रं स्यात्स्वस्याश्रुतिभूतत्वात् ‖ सूत्र - ११.४.३३ ‖
सकृदिति चेत् ‖ सूत्र - ११.४.३४ ‖
न कालभेदात् ‖ सूत्र - ११.४.३५ ‖
पक्तिभेदात्कुम्भोशूलवपाश्ररणीनांभेदः स्यात् ‖ सूत्र - ११.४.३६ ‖
जात्यन्तरेषु भेदः पक्तिवैषम्यात् ‖ सूत्र - ११.४.३७ ‖
वृद्धिदर्शनाच्च ‖ सूत्र - ११.४.३८ ‖
कपालानि च कुम्भीवत्तुल्यसंख्यानाम् ‖ सूत्र - ११.४.३९ ‖
प्रतिप्रधानं वा प्रकृतिवत् ‖ सूत्र - ११.४.४० ‖
सर्वेषां वाभिप्रथमं स्यात् ‖ सूत्र - ११.४.४१ ‖
एकद्रव्ये संस्काराणां व्याख्यातमेककर्मत्वात् ‖ सूत्र - ११.४.४२ ‖

द्रव्यान्तरे कृतार्थत्वात्तस्य पुनः प्रयोगान्मन्त्रस्य च तद्गुणत्वात्पुनः प्रयोगः स्यात्तदर्थेन विधानात् ‖ सूत्र - ११.४.४३ ‖
निर्वपणलवनस्तरणाज्यग्रहणेषु चैकद्रव्यवत्प्रयोजनैकत्वात् ‖ सूत्र - ११.४.४४ ‖
द्रव्यान्तरवद्वा स्यात्तत्संस्कारात् ‖ सूत्र - ११.४.४५ ‖
वेदिप्रोक्षणे मन्त्राभ्यासः कर्मणः पुनः प्रयोगात् ‖ सूत्र - ११.४.४६ ‖
एकस्य वा गुणविधिर्द्रव्याकत्वात्तस्मात्सकृत्प्रयोगः स्यात् ‖ सूत्र - ११.४.४७ ‖
कण्डूयने प्रत्.ङ्गं कर्मभेदात्स्यात् ‖ सूत्र - ११.४.४८ ‖
अपि वा चोदनैककालमैककर्म्यं स्यात् ‖ सूत्र - ११.४.४९ ‖
स्वप्ननदीतरणाभिवर्षणामेध्यप्रतमन्त्रणेषु चैवम् ‖ सूत्र - ११.४.५० ‖
प्रयाणे त्वार्थनिर्वृत्तेः ‖ सूत्र - ११.४.५१ ‖
उपरवमम्त्रस्तन्त्रं स्याल्लोकवद्वहूनचनात् ‖ सूत्र - ११.४.५२ ‖
न सन्निपातित्वादसन्निपातिकर्मणां विशेषग्रहणे का लैकत्वात्सकृद्वचनम् ‖ सूत्र - ११.४.५३ ‖
हविष्कृदधिगुपुरो ऽनुलाक्यामनोतस्यावृत्तिः कालभेदात् स्यात् ‖ सूत्र - ११.४.५४ ‖
अधिगोश्च विपर्यासात् ‖ सूत्र - ११.४.५५ ‖
करिष्यद्वचनात् ‖ सूत्र - ११.४.५६ ‖

## Chapter 12

### Sub Chapter 01

तन्त्रिसमवाये चोदनातः समानानामेकतन्त्र्यमतुल्येषु तुभेदः स्याद्विधिप्रक्रमतादर्थ्यात् श्रुतिकालनिर्देशात् ‖ सूत्र - १२.१.१ ‖
गिणकालविकाराच्च तन्त्रभेदः स्यात् ‖ सूत्र - १२.१.२ ‖
तन्त्रमध्ये विधानाद्वा मुख्यतन्त्रेण सिद्धिःस्यात्तन्त्रार्थस्याविशिष्टत्वात् ‖ सूत्र - १२.१.३ ‖
विकाराच्च न भेदः स्यादर्थस्याविकृतत्वात् ‖ सूत्र - १२.१.४ ‖
एकेषां वाशक्यत्वात् ‖ सूत्र - १२.१.५ ‖
आहोपुरीषकं स्यात् ‖ सूत्र - १२.१.६ ‖
एकाग्निवच्च दर्शनम् ‖ सूत्र - १२.१.७ ‖
जैमिनेः परतन्त्रत्वापत्तेः स्वतन्त्रप्रतिषेधः स्यात् ‖ सूत्र - १२.१.८ ‖
नानार्थत्वात्सोमे दर्शपूर्णमासप्रक-तीनां वेदिकर्म स्यात् ‖ सूत्र - १२.१.९ ‖
अकर्म वा कृतदूषा स्यात् ‖ सूत्र - १२.१.१० ‖
पात्रेषु च प्रसङ्गः स्याद्धोमार्थत्वात् ‖ सूत्र - १२.१.११ ‖
न्याय्यानि वा प्रयुक्तत्वादप्रयुक्ते प्रसङ्गः स्यात् ‖ सूत्र - १२.१.१२ ‖
शामित्रे च पशुपुरोडाशो न स्यादितरस्य प्रयुक्तत्वात् ‖ सूत्र - १२.१.१३ ‖

श्रपणं वाग्निहोत्रस्य शालामुखीये न स्यात्प्राजहितस्य विद्यनानत्वात् ॥ सूत्र - १२.१.१४ ॥
हविर्धाने निर्वपणार्थं साधयेतां प्रयुक्तत्वात् ॥ सूत्र - १२.१.१५ ॥
असिद्धिर्वान्यदेशत्वात्प्रधानवैगुण्यादवैगुण्ये प्रसङ्गः स्यात् ॥ सूत्र - १२.१.१६ ॥
अनसाञ्च दर्शनात् ॥ सूत्र - १२.१.१७ ॥
तद्युक्तत्व च कालभेदात् ॥ सूत्र - १२.१.१८ ॥
मन्त्राश्च सन्निपातित्वात् ॥ सूत्र - १२.१.१९ ॥
धारणार्थत्वात्सोमे ऽग्न्यन्वाधानं न विद्यते ॥ सूत्र - १२.१.२० ॥
तथा व्रतमपेतत्वात् ॥ सूत्र - १२.१.२१ ॥
विप्रतिषेधाच्च ॥ सूत्र - १२.१.२२ ॥
सत्यवदिति चेत् ॥ सूत्र - १२.१.२३ ॥
न संयोगपृथक्त्वात् ॥ सूत्र - १२.१.२४ ॥
ग्रहार्थं च पूर्वमिष्टेस्तदर्थत्वात् ॥ सूत्र - १२.१.२५ ॥
शेषवदिति चेन्न वैश्वदेवो हि स्याद्व्यपदेशात् ॥ सूत्र - १२.१.२६ ॥
न गुणार्थत्वात् ॥ सूत्र - १२.१.२७ ॥
सन्नहनञ्च वृत्तत्वात् ॥ सूत्र - १२.१.२८ ॥
अन्यविधानादारण्यभोजनं न स्यादुभयं हि बृत्त्यर्थम् ॥ सूत्र - १२.१.२९ ॥
शेषभक्षास्तथेति चेन्नान्यार्थत्वात् ॥ सूत्र - १२.१.३० ॥
भृत्वाच्च परिक्रयः ॥ सूत्र - १२.१.३१ ॥
शेषभक्षास्तथेति चेत् ॥ सूत्र - १२.१.३२ ॥
न कर्मसंयोगात् ॥ सूत्र - १२.१.३३ ॥
प्रवृत्तवरणात्प्रति तन्त्रवरणात्प्रतितन्त्रवरणं होतु क्रियेत ॥ सूत्र - १२.१.३४ ॥
ब्रह्मापीति चेत् ॥ सूत्र - १२.१.३५ ॥
न प्राङ्नियमात्तदर्थं हि ॥ सूत्र - १२.१.३६ ॥
विर्दिष्टस्येति चेत् ॥ सूत्र - १२.१.३७ ॥
न श्रुतत्वात् ॥ सूत्र - १२.१.३८ ॥
हीतुस्तथेति चेत् ॥ सूत्र - १२.१.३९ ॥
न कर्मसंयोगात् ॥ सूत्र - १२.१.४० ॥
यज्ञोत्पत्त्युपदेशे विष्ठितकर्मप्रयोगभेदात्प्रतितन्त्रं क्रियेत ॥ सूत्र - १२.१.४१ ॥
देशपृथक्त्वान्मन्त्रोव्यावर्तते ॥ सूत्र - १२.१.४२ ॥
सन्नहनहरणे तथेति चेत् ॥ सूत्र - १२.१.४३ ॥
नान्यार्थत्वात् ॥ सूत्र - १२.१.४४ ॥

## Sub Chapter 02

विहारो लौकिकानामर्थं साधयेत्प्रभुत्वात् ॥ सूत्र - १२.२.१ ॥
मांसपाकप्रतिषेधश्च तद्वत् ॥ सूत्र - १२.२.२ ॥
निर्देशाद्वा वैदिकानां स्यात् ॥ सूत्र - १२.२.३ ॥
सति चोपासनस्य दर्शनात् ॥ सूत्र - १२.२.४ ॥
अभावदर्शनाच्च ॥ सूत्र - १२.२.५ ॥
मांसपाको विहितप्रतिषेधः स्यादाहूतिसंयोगात् ॥ सूत्र - १२.२.६ ॥
वाक्यशेषो वा दक्षिणस्मिन्नमारभ्यविधानस्य ॥ सूत्र - १२.२.७ ॥
सवनीये छिद्रापिधानार्थत्वात्पशुपुरोडाशो न स्यादन्येषामेवमर्थत्वात् ॥ सूत्र - १२.२.८ ॥
क्रिया वा देवतार्थत्वात् ॥ सूत्र - १२.२.९ ॥
लिङ्गदर्शनात् ॥ सूत्र - १२.२.१० ॥
हविष्कृत्सवनीयेषु न स्यात्प्रकृतौ यदि सर्वार्था पशुं प्रत्याहूता सा कुर्याद्व्यमानत्वात् ॥ सूत्र - १२.२.११ ॥
पशौ तु संस्कृते विधानात् ॥ सूत्र - १२.२.१२ ॥
योगाद्वा यज्ञाय तद्विमोके विसर्गः स्यात् ॥ सूत्र - १२.२.१३ ॥
निशि यज्ञे प्राकृतस्याप्रवृत्तिः स्यात्प्रत्यक्षशिष्टत्वात् ॥ सूत्र - १२.२.१४ ॥
कालवाक्यभेदाच्च तन्त्रभेदः स्यात् ॥ सूत्र - १२.२.१५ ॥
वेद्युद्धननव्रतंविप्रतिषेधात्त देव स्यात् ॥ सूत्र - १२.२.१६ ॥
तत्रंमध्ये विधानाद्वा तत्तन्त्रा सवनीयवत् ॥ सूत्र - १२.२.१७ ॥
वेगुण्यादिध्मवर्हिर्नसाधयेदग्न्य्वाधानं च यदि देवतार्थम् ॥ सूत्र - १२.२.१८ ॥
अग्न्यन्वाधानं च यदि देवतार्थम् ॥ सूत्र - १२.२.१९ ॥
आरम्भणीया विकृतौ न स्यात्प्रकृतिकालमध्यत्वात् कृता पुमस्तदर्थेन ॥ सूत्र - १२.२.२० ॥
सकृदाऽरम्भसंयोगात् ॥ सूत्र - १२.२.२१ ॥
स्याद्वा कालस्याशेषभूतत्वात् ॥ सूत्र - १२.२.२२ ॥
आरंभविभागाच्च ॥ सूत्र - १२.२.२३ ॥
विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मकत्वम् ॥ सूत्र - १२.२.२४ ॥
मुख्यं वा पूर्वचोदनाल्लोकवत् ॥ सूत्र - १२.२.२५ ॥
तथा चान्यार्थदर्शनम् ॥ सूत्र - १२.२.२६ ॥
अङ्गगुणविरोधे च तादर्थ्यात् ॥ सूत्र - १२.२.२७ ॥
परिधेद्व्यर्थत्वाद भयधर्मा स्यात् ॥ सूत्र - १२.२.२८ ॥
यौप्यस्तु विरोधे स्यान्मुख्यानन्तर्यात् ॥ सूत्र - १२.२.२९ ॥
इतरो वा तस्य तत्र विधानादुभयोश्चाङ्गसंयोगः ॥ सूत्र - १२.२.३० ॥
पशुसवनीयेषु विकल्पः स्याद्वैकृतश्तेदुभयोपश्रुतिभूतत्वात् ॥ सूत्र - १२.१.३१ ॥
पाशुकं वा तस्य वैशेषिकाम्नानात्तदनर्थकं विकल्पे स्यात् ॥ सूत्र - १२.१.३२ ॥
पशोश्च विप्रकर्षस्तन्त्रमध्ये विधानात् ॥ सूत्र - १२.२.३३ ॥
अपूर्वं च प्रकृतौ समानतन्त्रा चेदनित्यत्वादनर्थकं हि स्यात् ॥ सूत्र - १२.२.३४ ॥
अधिकश्च गुणः साधारणे ऽविरोधात्कांस्यभोजिवदमुख्ये ऽपि ॥ सूत्र - १२.२.३५ ॥
तत्प्रवृत्त्या तु तन्त्रस्य नियमः स्याद्यथा पाशुकं सूक्तपाकेन ॥ सूत्र - १२.२.३६ ॥
न वाविरोधात् ॥ सूत्र - १२.२.३७ ॥
अशास्त्रलक्षणत्वाच्च ॥ सूत्र - १२.२.३८ ॥

## Sub Chapter 03

विश्ववजिति वत्सत्वङ्नामधेयादितर था तन्त्रभूय त्वादहतं स्यात् ॥ सूत्र - १२.३.१ ॥
अविरोधी वा उपरिवासो हि वत्सत्वक् ॥ सूत्र - १२.३.२ ॥
अनुनुर्वाप्येषु भूयस्त्वेन तन्त्रनियमः स्याच्छिवष्ठकृद्दर्शनाच्च ॥ सूत्र - १२.३.३ ॥
आगन्तुकत्वाद्वा स्वधर्मा स्याच्छ्रुतिविशेषादितरस्य च मुख्यत्वात् ॥ सूत्र - १२.३.४ ॥
स्वस्थानत्वाच्च ॥ सूत्र - १२.३.५ ॥
स्विष्टकृच्छ्रपणान्नेतिचोद्विकारः पवमानवत् ॥ सूत्र - १२.३.६ ॥
अविकारो वा प्रकृतिवच्चोदनां प्रति भानाच्च ॥ सूत्र - १२.३.७ ॥
एक कर्मणिशिष्टत्वाद्गुणानां सर्वकर्म स्यात् ॥ सूत्र - १२.३.८ ॥
एकार्थास्तुविकल्पेरन्.मुच्चये ह्यावृत्तिः स्यात्प्रधानस्य ॥ सूत्र - १२.३.९ ॥
अभ्यस्योतार्थवत्त्वादिति चेत् ॥ सूत्र - १२.३.१० ॥
नाश्रुतत्वाद्धि विकल्पवच्चदर्शयति कालान्तरे ऽर्थवत्त्वं स्यात् ॥ सूत्र - १२.३.११ ॥
प्रायश्चित्तेषुचैकार्थ्यान्निष्पन्नेनाभिसंयोगस्तस्मात् सर्वस्य निर्घातः ॥ सूत्र - १२.३.१२ ॥
समुच्चयस्तु दोषार्थः ॥ सूत्र - १२.३.१३ ॥
मन्त्राणाङ्कर्मसंयोगः स्वधर्मेण प्रयोगः स्याद्धर्मस्य तन्निमित्तत्वात् ॥ सूत्र - १२.३.१४ ॥
विद्यांप्रतिविधिनाद्वा सर्वकारणं प्रयोगः स्यात् कर्मार्तत्वात् प्रयोगस्य ॥ सूत्र - १२.३.१५ ॥
भाषास्वरोपदेशादैरवत् प्रायवचनप्रतिषेधः ॥ सूत्र - १२.३.१६ ॥
मन्त्रोपदेशोवा न भाषिकस्य प्रायोपपत्तेर्भाषिकश्रुतिः ॥ सूत्र - १२.३.१७ ॥
विकारः कारणाग्रहणे तन्न्यायत्वाद् दृष्टे ऽप्येवम् ॥ सूत्र - १२.३.१८ ॥
तदुत्पत्तेर्वा प्रवचनलक्षणत्वात् ॥ सूत्र - १२.३.१९ ॥
मन्त्राणां करणार्थत्वान्मन्त्रान्तेन कर्मादिसन्निपातः स्यात्सर्वस्य वचनार्थत्वात् ॥ सूत्र - १२.३.२० ॥
सन्ततवचनाद्धारायामादिसंयोगः ॥ सूत्र - १२.३.२१ ॥
करमसन्तानो वा नानाकर्मत्वादितरस्याशक्चत्वात् ॥ सूत्र - १२.३.२२ ॥
आघारे च दीर्घधारत्वात् ॥ सूत्र - १२.३.२३ ॥ मन्त्राणां सन्निपातित्वादेकार्थानांविकल्पः स्यात् ॥ सूत्र - १२.३.२४ ॥
संख्याविहितेषु समुच्चयो ऽसन्निपातित्वात् ॥ सूत्र - १२.३.२५ ॥
ब्राह्मणविहितेषु च संख्यावत्सर्वेषामुपदिष्ठत्वात् ॥ सूत्र - १२.३.३६ ॥

याज्यावषद्कारयोश्र्त समुच्चयदर्शनं तद्वत् ॥ सूत्र - १२.३.२७ ॥
विकल्पो वा समुच्चयस्याश्रुतित्वात् ॥ सूत्र - १२.३.२८ ॥
गुणार्थत्वादुपदेशस्य ॥ सूत्र - १२.३.२९ ॥
वषट्कारे नानार्थत्वात्समुच्चयो हौत्रास्तु विकल्पेरन्नेकार्थत्वात् ॥ सूत्र - १२.३.३० ॥
क्रियमाणानुवादित्वात् समुच्चयो वा हौत्राणाम् ॥ सूत्र - १२.३.३१ ॥
समुच्चयं च दर्शयति ॥ सूत्र - १२.३.३२ ॥

## Sub Chapter 04

जपाश्चाकर्मसंयुक्ताः स्तुत्याशीरभिधानाश्च याजमानेषु समुच्चयः स्यादाशीःपृथक्त्वात् ॥ सूत्र - १२.४.१ ॥
समुच्चयं च दर्शयति ॥ सूत्र - १२.४.२ ॥
याज्यानुवाक्यासु तु विकल्पः स्याद्देवतीपलक्षणार्थत्वात् ॥ सूत्र - १२.४.३ ॥
लिङ्गदर्शनाच्च ॥ सूत्र - १२.४.४ ॥
क्रयेषु ति विकल्पः स्यादेकार्थत्वात् ॥ सूत्र - १२.४.५ ॥
समुच्चयो वा प्रयोगद्रव्यसमवायात् ॥ सूत्र - १२.४.६ ॥
समुच्चयञ्चदर्शयति ॥ सूत्र - १२.४.७ ॥
संस्कारे च तत्प्रधानत्वात् ॥ सूत्र - १२.३.८ ॥
संख्यासु तु विकल्पः स्याच्छुतिप्रतिधात् ॥ सूत्र - १२.३.९ ॥
द्रव्यविकारात्तु पूर्ववदर्थकर्म स्यात्तया विकल्पेन नियमप्रधानत्वात् ॥ सूत्र - १२.३.१० ॥
द्रव्यत्वे ऽपि समुच्चयो द्रव्यस्य कर्मनिष्पत्तेः प्रतिपशु कर्मभेदादेवं सति यथाप्रकृति ॥ सूत्र - १२.४.११ ॥
कपाले ऽपि तथेतिचेत् ॥ सूत्र - १२.४.१२ ॥
न कर्मणः परार्थत्वात् ॥ सूत्र - १२.४.१३ ॥
प्रतिपत्तिस्तु शेषत्वात् ॥ सूत्र - १२.४.१४ ॥
शृते ऽपि पूर्ववत्स्यात् ॥ सूत्र - १२.४.१५ ॥
मवायात्तसमात्तेनार्थकर्म स्यात् ॥ सूत्र - १२.४.१६ ॥
उखायां काम्यनित्यसमुच्चयो नियोगे कामदर्शनात् ॥ सूत्र - १२.४.१७ ॥
तस्यत देवतार्थत्वात् ॥ सूत्र - १२.४.१८ ॥
विकारो वा नित्यस्याग्नेः काम्येन तदुक्तहेतुः ॥ सूत्र - १२.४.१९ ॥
वचनादसंस्कृतेषु कर्म स्यात् ॥ सूत्र - १२.४.२० ॥
संसर्गे चापि दोषः स्यात् ॥ सूत्र - १२.४.२१ ॥
वचनादिति चेदथेतरस्मिन्नुत्सर्गापरिग्रहः कर्मणःकृतत्वात् ॥ सूत्र - १२.४.२२ ॥
स आहवनीयः स्यादाहूतिसंयोगात् ॥ सूत्र - १२.४.२३ ॥
अन्यो वोद्धृत्याहरणात् तस्मिन्त्संस्कारकर्म शिष्टत्वात् ॥ सूत्र - १२.४.२४ ॥
स्थानात्तु परिलुप्येरन् ॥ सूत्र - १२.४.२५ ॥
नित्याधारणे विकल्पो न ह्यकस्मात्प्रतिषेधः स्यात् ॥ सूत्र - १२.४.२६ ॥
नित्यधारणाद्वा प्रतिषेधो गतश्रियः ॥ सूत्र - १२.४.२७ ॥
परार्थान्योकः प्रतियन्तिवत् सत्राहीनयो यजमानगणे ऽनियमो ऽविशेषात् ॥ सूत्र - १२.४.२८ ॥
मुख्यो वाविप्रतिषेधात् ॥ सूत्र - १२.४.२९ ॥
सत्रे गृहपतिरसंयोगाद्धौत्रवदाम्नायवचनाच्च ॥ सूत्र - १२.४.३० ॥
सर्वैः वा तदर्थत्वात् ॥ सूत्र - १२.४.३१ ॥
विप्रतिषेधे परम् ॥ सूत्र - १२.४.३२ ॥
हौत्रे परार्थत्वात् ॥ सूत्र - १२.४.३३ ॥
वचनं परम् ॥ सूत्र - १२.४.३४ ॥
प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यात् ॥ सूत्र - १२.४.३५ ॥
स्मृतेर्वा स्याद्ब्राह्मणानाम् ॥ सूत्र - १२.४.३६ ॥
फलचमसविधानाच्चेतरेषाम् ॥ सूत्र - १२.४.३७ ॥
सान्नाय्येप्येवं प्रतिषेधः सौमपीयहेतुत्वात् ॥ सूत्र - १२.४.३८ ॥
चतुर्धाकरणे च विर्देशात् ॥ सूत्र - १२.४.३९ ॥
अन्वाहहर्ये च दर्शनात् ॥ सूत्र - १२.४.४० ॥